शोणिमा शोणस्य भावः शोणिमा रक्ततेत्यर्थः यस्य जागरस्तन्नेत्र एव रक्तत्वमुचितं इह तु वि
परीतमिति चित्रमिति भावः ॥ तथा भवता त्वया [illegible] तं बकुमधु मद्यं निपीतं पीतमिति कर्म
णि क्तः घूर्मास्यैतील्लं ॥ अन्यया सहेत्यर्थः ॥ मे पुनः मनः हृदयं व्याघूर्णितं अतिशयेभ्रां
तं अत्रापि चित्रार्थः पूर्ववत् ॥ यद्वा प्रविततं महरपि मनः व्याघूर्णितं ॥ एवं चापराधाधि
क्यमावेद्यते प्रविततं व्याघूर्णितमिति टिप्पिकेचित् ॥ तथा भ्राम्यद्भृंगघने भ्राम्यंतश्चप
लाः ॥ बाभाशेतिश्यनुशश्मामप्रानामिति दीर्घः ॥ भृंगाः भ्रमरास्तैर्घने निबिडे निकुंजभ
वने लतापिहितोदरसदने त्वया श्रीफले लब्धं बिल्वफलं ॥ बिल्वे शांडिल्यशैलूषौ मा
लूरश्रीफलावपीत्यमरः ॥ श्रीफलस्यावयवः फलमित्युत्पन्नस्यावयवे च प्राण्योष
धिवृक्षेभ्य इत्यणः फले लुगिति लुक् ॥ अत्र भ्राम्यद्भृंगघने श्रीफले मिति चपद्यो
र्वाच्यार्थस्य विवक्षितानुपयुज्यमानत्वात् सादृश्यसंबंधेन विलोललोचनकामिनी

॥३०॥ केतकं केतकीमध्ये कुसुमं तस्य गर्भः तस्यातिगौरत्वादिति भावः ॥ तस्माद्गौरि ततोऽधिकृत
रगौरवर्णशालिनि गौरपदेन सखीषु पिकोपगोपनकारितया उक्तेयं हृदयत्वमावे
द्यते ॥ तल्पं पर्य्यंकं नो भजसे सुनाथ यत्र लिन केवलं प्रियतमाधिष्ठिततल्पसमीपानवस्थि
तिरपि तु दूरतोऽपि सुधाधारानुकाराः पीयूषसमूहसदृशाः ॥ यद्वा सुधायाः आधारः
समुद्र इत्यर्थः ॥ तरंगानुकाराः लसत्तरस्तरवर्णावलीरित्यर्थः अथवा गंभीरा इत्यर्थः
गिरः वाचो न जल्पसि वदसि एवं च नयनत्रसंलापोऽपि तत्र आलिंगनचुंबनादीतिरत्ता वो
दास्यमावेद्यते ॥ आस्तां संलापोऽपि तु तेनावलोकयस्य पीत्याह ॥ दृश्यातं नेत्रनि
पतनमपि न वाकुरुषे बुद्धिपुरःसर सरस विलोकनं दूरपराहतमिति भावः ॥ इत्थं अनु
नापकारेणारयिते कोपस्य प्रियतमविषयकक्रोधस्य परिजनकोपप्रकाशच्छला ॥
न्निकटवर्त्तिस्वजनविषयककोपप्रदर्शनमिषात् वस्तुधर्मान्यास्वाधीने जने न कोप
इति भावः प्रकाशस्यते ज्ञोधर्मत्वात्कोपे वाधात्तीव्रत्वं लक्ष्यते तेन चतुःसहत्वं ध्वन्यते ॥३०॥

यत्संगोपनं आच्छादनं मयि तस्मिन्याते तदास्यात् चेत् यदि पुनः सहचरी सहसा ईदृचर त्विग
त्यति ॥ अहर्निशं त्वत्समागमवतीत्यर्थः ॥ पचादिषु चरेष्टिः करणात् ङीप् ॥ अत एव अनु
चरतीति पचादिषु चरेष्टित्वात् ष्टितिवामनोपि ॥ इत्थं चेयं त्वदीय निखिलरीति विज्ञेयेति भा
वः ॥ एवं चैतस्याः स्मितेन कोपगोपनेव्यर्थत्वान्यथा त्वनिर्णयो स्माकमिति ध्वन्यते ॥ यत्तु स
हचरी सखीत्याहुः तत्र सख्याः कथनोत्तरमेव ज्ञानं सहचर्य्याः स्वकथने पीति तयोर्भेदात्
सा चिवकं वदनं विलोक्येत्यर्थः ॥ सा चिपदेन नायकं प्रति नायिकाकोपगोपनरक्षाकारित्वं द्यो
त्यते ॥ स्मितं हास्यविशेषं एकवचनेनाल्पत्वं ॥ तेन च नायिकातः सहचर्य्याभीतिरथवा ना
यिका हृदतेज्ञानसंगोपनं व्यज्यते न कुर्वीतविरुद्धीत ॥ इत्यमोदास्यशालिन्यास्तव प्रियवि
हिताऽपराधजनितकोपस्यान्यनिमित्तजन्त्वप्रदर्शनमिषेणाच्छादनं तदास्याः ॥ यदि त्वद्रहस्य
विज्ञेयं प्रियविषयककोप एवैतस्या नान्यविषयक इति सूचकं हसितं ना करिष्यत ॥ एवं
चाधुना त्वत्प्रियतमेनाप्येतद्ज्ञातं त्वत्प्रसादसंपादनायस एव तल्पादत्रायातीत्युभो

॥३१॥ दस्मात्स्मात्क्रमितोगमनायेतिभावः॥ यद्वादयितेप्रियतमेमयिकोपगोपनंतदास्यादित्याद्विनायिकोक्ति
रेव॥दयितपदेकोपगोपनस्यौचितींध्वनयति॥केचित्तुदयितेइतिसंबुद्धिपदंमत्वानायकोक्तिरिय
मित्याहुः॥ शार्दूलविक्रीडितंवृत्तं॥१५॥प्रौढांअधीरामुदाहरति॥प्रतिफलमिति॥हरशिरसि
शिवमस्तकेइन्दोश्चन्द्रस्यकलायांशकलेस्वीयमात्मीयंप्रतिफलंप्रतिबिंबंअवलोक्यदृष्ट्वानतु
विचार्य्येत्यर्थः॥तस्याःअतिस्वच्छत्वादिभावः॥परस्याःअन्यस्याःवासंस्थितिंनत्वागमनमा
त्रं॥आशंकमानावितर्कयंतीस्वप्रतिबिंबानभिन्नत्वेनेतिभावः॥अतएवअचलकन्या
पर्वतपुत्रीपार्वती॥यद्वाकन्यैवकन्याएवमप्यविचार्य्यकार्यकारित्वंध्वन्यते॥अत्र
प्रसिद्धाविशेषप्रतिभावनाद्विशेषणमात्रप्रयोगेनदोषायगिरिशंगिरिंपर्वतंश्यतिउ
पभोगेनतनूकरोतीतिगिरिशः॥अतेत्तुपसर्गेकइतिकः॥गिरिरस्यास्तीतिगिरिश
इतिवा॥लोमादित्वाच्छः॥शिवंकंपप्रचलवलयचंचत्कान्तिभाजाकंपेनकोपावेशादि
तिभावः॥प्रचलानिअतिशयचांचल्यभाञ्जियानिवलयानिकंकणानितेषांचंचत्यः॥३१॥

अनुरागवत्यपिमादृशेजनेअनुरागाभावमावहसीतियोग्योसीतिकाकाक्षपरुषवागभि
व्यज्यते॥नाथोसीतिपाठेप्रभुरसीत्यर्थः॥तथाचानुचितकार्य्यकारित्वेप्यवर्जनीयत्वं
द्योत्यतेनकेवलमेतावन्त्येवतथीनत्वेप्रयोजकान्यपित्वदंन्यदपीत्याह॥किंचनवयोव
नभूषितोसिनवयोवनेनअभिनवोमादृशालिवयोवस्थाविशेषेणभूषितोसिअ
लंकृतोसिकेवलयौवनमेवनतवालंकारकंनश्रुतिविनयादीतिवक्रोक्तिः॥सुदृशाना
यिकयाइत्थंएवंप्रकारेणोक्त्वानिश्वस्यनिश्वासमुत्सृज्यदुःखोद्रेकवशादनिवारणी
यत्वाद्वेतिभावः॥प्रियस्यभर्त्तुःवदनेनाष्पलुलिताःपूर्णबाष्पाःदृगंताःदृक्प्रांताः
निहिताःप्रेरिताः॥अत्रापिपूर्वश्लोकवत्ध्वनिरवगंतव्यः॥उक्तलक्षणानुप्रासानु
प्राणितोवक्रोक्तिरलंकारः॥लक्षणंतूक्तं॥वसंततिलकावृत्तम्॥एतेमुदाहरणेषु
मध्यात्वसंगतिश्चिन्त्या॥१४॥लब्धावसरतयाप्रगल्भांधीरामुदाहरति॥प्रौढा
धीरायथेत्यादि॥नोतल्पमिति॥काचित्सखीनायिकांप्रतिवदति॥हेकेतकागर्भगौरि

॥३२॥ तथा प्रियतमे का कुव्याकुलवासि सतिकाकुध्वेति विकारः॥ यदीयमेतादृशी लक्ष्यते
तोमलकृतापराध्यसानात् कुपितेति भियेतिभावः॥ अतएव व्याकुला कृटिति वक्तुमश
क्या॥ अन्यथा वा दादि रचनयेतिभावः॥ वाकुयस्यतस्मिन्सतीत्यर्थः॥ साचिहासित
स्फूर्जत्कपोलश्रिया साचितिर्यक्कुम्रता कथम यसा परा धोपि बाबालतया मानमनप
राधिनमिवदर्शयतीति विस्मयेन नेयतहसितं न तु तोषेण॥ अग्रे कोपावेविघूरणात
तेन स्फूर्जन्ती अतिशयशालिनी कपोलयोः गंडयोः श्रीः शोभा यस्यास्तया तथा प्रि
यतमे पुनः हस्तन्यस्तकरे स्वहस्ताक्षिप्तकरे सतियदीयं हसितं अकरोत्तर्हि प्रसन्नै
वेतिस्मभस्येनेतिभावः॥ प्रगदृशा चपलैनेत्रयालाक्षारसक्षालितप्रोष्ठीपृष्ठम विशाल
पृथमांसलरुचः लाक्षारसेन अलक्तकेनक्षालितं निर्मलीकृतं लिप्तमिति यावत
प्रोष्ठीपृष्ठं [illegible] सफरीपृष्ठं प्रोष्ठी तु शफरी द्वयोरित्यमरः॥ तस्य येमपूषाः किरणाः
तद्वन्मांसलाः मांसलत्वस्य चेतनधर्मत्वाद्दीप्तिषु बाधादाधिक्यं लक्ष्यते तेन चडुः ॥३२॥

सहत्वे ध्वन्यते तथा चाधिकाद्रत्यर्थः॥ सिध्मादिभ्यश्चेति लच्॥ रुचः दीप्तयोयासांताः
प्रोष्ठीपृष्ठस्य स्वत एवारुणत्वेपि लाक्षारससंपर्कादत्यंतारुणत्वं यथा तथा चक्षुषः
स्वाभाविकारुणत्वेपि कोपवशादधिकारुणत्वं॥ अथवाश्वेते अलक्तकदानेनारुणस्यव्य
क्तता यथा तथासितायां दृष्टौ कोपकृतारुण्यस्यव्यक्तत्वमिति भावः॥ प्रोष्ठीपदेन प्रिय
तमः कृतापराधोप्ययमकस्मादेवास्मत्करग्रहणं करोति॥ कुतु किनी भिरिवभवती भि
स्तु हर्मीस्थीयते किमिदमुचितं भवती नाम पिसखीजनमपि पश्यतीति चपलत्वं ध्व
न्यते पृष्ठपरेनकदिनत्वमावेद्यते दृष्टयः कटाक्षाः विस्फारिताः प्रसारिताः एवं च कुत्र
स्मादेवैचित्र्यं द्योत्यते॥ कृतापराधोप्यसौ निःशंकमकस्मादेव करग्रहणं करोतीति
कोपेनेतिभावः॥ अत्रतादृग्रूपवस्तु नाप्रियापराधप्रकाशनरूपवस्तुध्वनिः॥ लुप्तोप
मानुप्रासानुप्राणितः प्रियचेष्टाख्याबाह्यार्थप्रतिहेतुत्वात्काव्यलिंगं॥ हेतोर्वाक्यपदा
र्थतेति लक्षणलक्षितकाव्यलिंगमलंकारः॥ शार्दूलविक्रीडितं वृत्तं॥ ३७॥ केचित्तु धी

॥३३॥ राधीराधीराअधीराचेतिविभागमुक्त्वा ॥ उत्कृष्टगुणाधीरातदपकृष्टगुणाधीराधीरात
दपकृष्टगुणाअधीरा ॥ धीरामध्यावक्रोक्त्यावदति ॥ धीराधीरामध्यासाश्रुकिंचिद्वक्रो
क्त्यावदति ॥ इदंचस्फुटोपलक्षणं ॥ अधीरामध्यापरुषंवक्ति ॥ इदंचसर्वोपलक्षणं ॥ एवंचप्रो
ढाधीराकोपगोपनादरसुरतौदासीन्यवती ॥ धीराधीराप्रगल्भाकोपप्रतीतिमात्र
जनकवक्रोक्तिमती ॥ अधीराप्रगल्भातर्जनताडनादिकारिणीतिक्रमः ॥ अत्रापिपूर्वव
दुत्तरोत्तरंमपकृष्टंबोध्यम् ॥ एवंद्वादितान्येवचतल्लक्षणानीत्याहुः ॥ उदाहरणान्यपि
तत्रैवानुसं[illegible]धेयानि ॥ एवंधीरादिभेदानुक्त्वासंप्रतितेपिप्रकारांतरेणभिद्यंतइत्या
ह ॥ एतेचेति ॥ षड्भेदाः मध्याप्रौढाविषयत्वेनेत्यर्थः ॥ इदमपिप्राचीनसंप्रदायानुरो
धेन ॥ नत्रज्येष्ठालक्षयति ॥ परिणीतत्वेसतीतिसत्यंतसामर्थ्यात् ॥ यन्निरूपितवि
धिवत्पाणिग्रहणजन्यसंस्कारवत्वंतत्कृतकसपत्नीप्रतियोगिकाधिकस्नेहवत्वमि
त्यर्थः ॥ भर्तृपदस्यपोषकमात्रार्थकत्वात् ॥ संस्कारश्चपरपुरुषानुरागाभावविशि ॥३३॥

प्रसर्पत्यःआश्रयचांचल्यादितिभावः यांकांतयः नानाविधमणिमरीचयस्तज्जातानु
कौकनकेरणोहस्तेनतर्जयामासनिरभर्त्सयत् ॥ नानाविधमणिमरीचिनिचयभास्वरकंक
णगणक्वाणवत्करजन्यतयातर्जनस्यातिभीतिप्रदत्वंध्वन्यते ॥ अत्रसंशयोभ्रांति
र्वालंकारः ॥ लक्षणंतूक्तं ॥ मालिनीवृत्तं ॥ द्विजकुसुमसुरूपाकर्णताटंकयुक्ताकनक
वलयहारैर्मंडितायुक्तशोभा ॥ सुललितरसनासौनूपुरश्रीसमेताहरतिरसिकचित्तं
मालिनीकामिनीवेतितल्लक्षणात् ॥१६॥ प्रौढांधीरामुदाहरति ॥ तल्पोपांतमिति ॥
काचित्सखीनायिकावृत्तांतंस्वसखींप्रतिवदति ॥ सखीतिसंबुद्धिरध्याहर्तव्या ॥ प्रियतमेआस्पं
दंप्रेमास्पदेनायकेप्रियतमपदेनावर्जनीयत्वमावेद्यते ॥ तल्पोपांतंपर्यंकसमीपदेशंने
तुपर्यंकं उपेयुषिप्राप्नुवतिनतत्रप्रविष्टे ॥ एवंचदूरतएवदर्शनसमसमयमेवतत्कृता
पराधस्मृतिरभिव्यज्यते ॥ वक्रीकृतग्रीवयावक्रीकृतातिर्यग्विहिताग्रीवायन्या
तयातयासापराधस्यास्पर्शादस्याभिमुखमवस्थितिरपिनोचितेतिकोपेनेतिभावः

॥३४॥ लेऽप्यत्र वेदितव्ये॥ इति प्रथमगणुदाहरणान्नन्न्यन्तत्वशंका॥ उत्कंधरः उद्ग्रीवः नतु स्थितः क
दाचिदियं द्रक्ष्यतीति भियेति भावः दृष्टवान्॥ अवलोकितवान्॥ ततः स एव अन्यस्याः सवि
धं निकटं समेत्य सम्यक् कुमेरस्मंदपदन्यासेनेति भावः एत्य आगत्य॥ निभृतं गुप्तं तदीयो
त्तरीयवसनोत्तरितत्तयेति भावः॥ अथ लोलाः चंचलाः नायककरयोगादिति भावः॥ याह
स्तांगुलयः नतु हस्ताः॥ अन्यथाकं कणरणत्कारेणाकनिष्टायाः स्वापच्युतिर्भविष्यती
तिधियेति भावः॥ तासां व्यापारैश्च स्थितैः चकुक्वचनेन एकतद्व्यापारेण स्वापच्युताव
पि नेत्रोन्मीलनमकरोदिति॥ पुनःपुनः तत्करणमतोरत्ताहुदासीनत्वं ध्वन्यते॥ स्वा
पस्खलेनांतर्गतकोपसंगोपनतया व्यंग्यकोपप्रकाशात्वं व्यज्यते॥ वसनांचले पे
सनप्रांतं नतु वासः आकस्मिकवसनसमाकर्षतो संभ्रमो भविष्यतीति भियेति भावः
चपलयन् शिथिलयन् नतु आकर्षयन्॥ कुपितायाः वसनांचलाकर्षतो कदाचिद्धि
कृष्ण कोपो भविष्यतीति भियेति भावः॥ यद्वा निभृतव्यालोलहस्तांगुलिव्यापारैः ॥३४॥

एवं चकनिदर्शनभियोपवेशनं व्यज्यते॥ विनीतत्वं वा वसनांचले चपलयन्नित्यर्थः॥ स्वा
पच्युतिं निद्राभंगं कृतवान् अकार्षीत्॥ स्विंरंशयेति भावः॥ अत्र पूर्वार्द्धे क्रीडोत्सुक्या
भावात् स्नेहस्नेहवत्वेन कनिष्टात्वं॥ उत्तरार्द्धे क्रीडोत्सुक्यात्स्नेहाधिक्येन ज्येष्टात्वमित्य
वगन्तव्यम्॥ शार्दूलविक्रीडितं वृत्तम्॥ १८॥ अधीराज्येष्ठाकृतिष्टेउदाहरति॥ अ
तः कोपेति॥ काचित्सखी स्वसखीं प्रत्याह॥ कोपिचतुरः प्रियतमेनायिके एकस्याः प्री
त्यतिशयाभावात्॥ तमपू अविवक्षितार्थः॥ वस्तुतोज्येष्ठातः त्वत्त प्रीतिमत्वेपि अन्या
ति पेक्षया प्रेमाँशयत्वातक निष्टाया मपित्त दर्थवाधः॥ यद्वा प्रियतमे इतिज्ञानन विरो
धाणां प्रियेत्स्यध्याहारः॥ कोपकषायिते क्रोधेन कलुषीकृते तत्करोतीति णिजंतात् क्तप्र
ययश्चान्निष्ठायां सेडिति णिलोपः पश्यन् परुषवचनतर्जनताडनादिना तयोः कोपं
प्रत्यक्षमिवाकलयन्नित्यर्थः एकांतयोर्मध्येइत्यर्थः॥ पुष्पस्य एकत्वमविवक्षितं
अवचयाय ग्रहणाय नम्रवदनो अधःकृतमुखो स्वत एवेति भावः॥ अथवा नायकं प्र
ति कोपादिति भावः॥ घने निविडे कानने वने अन्तः अभ्यंतरे निविडवनमध्ये इत्यर्थः॥

आदावेवैनं निविडं तत्रापि तन्मध्यप्रविष्टयास्वचरितं किमपि वक्तुं शक्यमिति धियेति भावः
॥३५॥ केचित्तु अतः कोपकषायितेऽन्यत्र कृपरतया व्याचख्युस्तन्न तेऽधीराख्यपतीति कृपामिति विभा
व्यं ॥ समायोजयत सम्यक् तया प्रसादनपुरःसरमित्यर्थः ॥ आयोजयत प्रेरयामास स्वतः
पुष्पावचयाय प्रवृत्तायाः केवलं विनयपुरःसरं कानन मध्ये मया त्वं पुष्पसमुदाय स्तत्रैव पु
ष्पावचयं कुर्विति नियोजयामासेति भावः ॥ एवं च नम्रवदनामित्यस्य न वैयर्थ्यशंका ॥ त
तोऽर्द्धोन्मीलितलोचनां चलच्चमत्कारामभिरामाननां ॥ अर्द्धं स्वल्पमुन्मीलिते निमीलिते ये
लोचने नेत्रे तयोर्ये अचलच्चमत्काराः प्रांतविभ्रमास्तैरभिरामं स्वहृदयं आननं वदनं यस्यास्तां
अर्द्धमुकुलेयं दृष्टिः स्तोकोन्मीलिततारा यामलकुंचत्पुरोमया ॥ किंचिद्व्याकुलपक्ष्माग्राहृष्टसा
र्द्धमुकुला मुखे इति तल्लक्षणात् ॥ स्मेरार्द्धाधरपल्लवां ॥ अधरस्य अर्द्धं अर्द्धाधरं अर्द्धं नपुंसक
मिति समासः स एव पल्लव इति रूपकं स्मेरः स्मितविकस्वरः ॥ अर्द्धाधरपल्लवो यस्यास्तां कथ
मियमनेन प्रतारितेति विस्मयात् ॥ स्मितमकरोदिति भावः ॥ कथमियमनभिलषितं तत्कृतप्र
तारणमपि न जानातीति स्मयात् स्मितमकरोदिति भावः ॥ अथवा स्मेरं अर्द्धं यस्य सः स्मे
रार्द्धः तथा अधरपल्लवो यस्यास्तामिति स्मेरार्द्धपदेन सलज्जत्वमावेद्यते ॥ पल्लवपदेन को ॥३५॥

रवोध्यः ॥ तेन परकीययोर्विधिवत्पाणिग्रहणाकर्त्तुः संभवेपि नातिव्याप्तिः ॥ कनिष्ठालक्षण
मप्येवमूह्यं ॥ लक्षणद्वयेपरिणीतपरत्वाव्यर्थमाह ॥ अधिकस्नेहास्विन्यादि ॥ सामा
न्यवनितास्विति परकीयाया अप्युपलक्षकं ॥ धीराज्येष्ठाकनिष्ठे उदाहरति ॥ एकस्मि
न्निति ॥ काचित्सखी सखीं प्रतिवदति हे सखि सदक्षिणो नायकः कोपवशात्वानपे
क्षितवान् सरोरुहदृशोः कमलनयनयोर्नायिकयोः सरोरुहपदेन विशालत्वं दृक्पदेन वि
वेकवत्वं व्यज्यते ॥ एकस्मिन् शयने तल्पे नायककृततुल्यापराधतया संजातमैत्रीक
त्वादिति भावः निद्रां स्वापं विस्राय तयोर्मध्ये एकां पुलकितामवगुंठनपरां स्वयमेव स्व
भावेन यद्वा कृतापराधस्य नायकस्य दर्शनं माभवत्विति तु आपद्यावितः आपाद
तलमस्तकं विस्तारितः अवगुंठनपटः आच्छादनपटो ययातां ॥ अवगुंठनपरेत्य
नेन कृतप्रतिपादनद्वारा व्यंग्यकोपप्रकाशकत्वं ध्वन्यते ॥ पुलकितपदेन तदीय
करस्पर्शासहिष्णुत्वमावेद्यते तेन चरतानुदासीनत्वं व्यज्यते ॥ एतदीत्यामध्याप्रग

मलत्वमरुणत्वं ध्वन्यते स्मेरार्द्राधरपल्लवामिति पाठे स्मेरपदस्य धर्मपरतया स्मेरेण स्मितेने
त्यर्थः एवं च स्मितेन अमृतरूपत्वं द्योत्यते स्मेरो विकसितः आर्द्र अधरपल्लवो यस्यास्तां आ
र्द्रपदेन सुधाद्रवरूपत्वमधरे व्यज्यते ॥ इत्यपि ॥ कश्चिन्नववधूः अभिनवयौवनां नायि
कां अन्यां अपरां समालिंगति लटा वर्तमानत्वं प्रतिपाद्यते तेनातिप्रियत्वं आलिंगने
ध्वन्यते ॥ अत्रापि पूर्वोक्तरीत्या ज्येष्ठाकनिष्ठे बोध्ये ॥ शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥ धी
राधीरास्ये ज्येष्ठाकनिष्ठे उदाहरति ॥ धैर्याधैर्येति ॥ कौचित्कौ चित्स्त्याह ॥ धैर्याधैर्यपरि
ग्रहग्रहिलयोः ॥ धैर्यमधैर्यं च धैर्याधैर्ये तयोः परिग्रहो अंगीकारस्तत्र ग्रहिले आग्रह
शीले तयोः ॥ तदाग्रहवत्योरित्यर्थः ॥ एणीदृशोर्नायिकयोः एणीपदं चांचल्यविस्तार
वत्वादिकं व्यंजयति प्रीतये संतोषाय ॥ आनंतकांतिरुचिरं दीप्तिविशेषसुन्दरं रत्न
द्वंद्वं मणिद्वये रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिके चेत्यर्थः ॥ मुष्टिद्वये बद्धकर इति
विभुः ॥ मुष्टिपदेन शीघ्रग्रहणयोग्यत्वं तेन च चिरतरं ज्येष्ठाकुचकलशसंस्पर्शो ना
स्तीति ध्वन्यते न्यस्तवान् ॥ स्थापितवान् परं तु प्रथमतः आरोप्य एकस्याः कनिष्ठायाः करे

॥३६॥ हस्तेरत्नंकलयन्नग्राहयन् ॥ परस्याः ज्येष्ठायाउत्कर्षः ॥ हस्ताहस्तिमिषात् ॥ हस्तेहस्तेगृहीत्वा
इतिहस्ताहस्तितद्व्याजात् ॥ नचसमासस्यशास्त्रेणादेष्टुं प्रवृत्तमित्यस्मिन्नर्थे समासवि
धानात् ॥ प्रकृतेचतद्भावान्नसमासइतिवाच्यम् ॥ वादिप्रतिवादिनोर्युग्मन्तीतिप्रयो
गात् ॥ वाग्वादरूपयुद्धमिवप्रसभंपरस्परहस्तग्रहणे क्रियाप्रतिक्रियाश्लेयरूपयुद्ध
प्रवृत्तेर्भवत्येवसमासः ॥ वस्तुतस्तुकर्णाकर्णिप्रथितमित्यादिमहाकविप्रयोगान्नदो
षः ॥ कुचतटीं स्तनतटीं स्त्रीलिंगनिर्देशेनकामुकस्यातिशयितप्रेमास्पदत्वंध्वन्यतेस्प
शानू आनंदसंतोषं आविं इतिप्राप्नोति ॥ अत्रज्येष्ठाकनिष्ठेस्फुटेएव ॥ उदाहरणत्रये
पिछल्लमलंकारः ॥ छलमन्यानुरोधेनमुधान्यस्यप्रकाशनमितितल्लक्षणात् ॥ शा
र्दूलविक्रीडितं वृत्तम् ॥२०॥ ॥इतिश्रीत्र्यम्बकपण्डितात्मजानन्तपण्डि
तविरचितायांरसमञ्जरीव्यङ्ग्यार्थकौमुद्यांसपरिकरंस्वीयानिरूपणंसमा
प्तिमगात् ॥ शुभमस्तु ॥ ॥३६॥

॥३७॥ पितःखल्ववत्तयापरकीयात्वंकन्यकावाइतिभावः॥तत्रपरोढामुदाहरति॥अयमिति॥काचिद्वा
यिकानिकुंजाद्युद्दीपनविभावदर्शनसमसमयसंजाततपरपुरुषानुरागा भंग्यन्तरेण स्वाकू
तंसखींप्रत्याह॥हेसखिविश्रंभपात्रभूते॥आलिसखीपदेनरहस्यकथनार्हत्वंध्वन्यते॥अ
यंनिकटवर्त्ती॥एवंचगतागतश्रमाभावोव्यज्यते रेवाकुंजः रेवासमंथीलतापिहितप्रदेशः
रेवापदेनशीतलत्वंकुंजेदेनंदिनस्नानागमनार्हं तयान्यथाजनशंकापरिहारक्षमत्वंसंके
ति॥तनायकसुलभागमनार्हत्वंचद्योत्यते निकुंजपदेनान्यानवलोकनीयतया निःशंककेे
लियोग्यतावेद्यते॥कुसुमशरासेवासमुचितः॥मदनस्यसेवासंतोषजननंकंकर्मविवि
धसुरतमितियावत्॥तत्रसमुचितःयोग्यः॥ननुतत्समीपवस्थातुंद्रष्टुंवेतिभावः॥नैकेवलं
कुंजमात्रमुद्दीपकमपितुअन्यदपीत्याह॥वेलादरविदलदेलापरिमलः वेलायांयथा
कालंपरिपक्वतादशायामित्यर्थः॥एवंचगंधसौरभ्यंध्वन्यते यद्वावेलायांकुंजमर्य्या
दायांतत्प्रान्तइतियावत् वेलाकालमर्य्यादयोरपीति उभयत्राप्यमरः॥वेलाशब्दस्यो
दधिमर्य्यादायांप्रसिद्धावप्यत्रापिद्वयोगेनदोषः॥कोशादौतथानियमाभावात्॥ ॥३७॥

दरईषत्विदलन्त्योविकसंत्यःएलाःएलाफलानि।तासांपरिमलःतत्संबंधलब्धगन्धःयस्मि
न्सः॥नवेतिपाठेनवोऽभिनवोविदलदेलापरिमलोयत्रेत्यर्थःयद्वानूतनविदलवंत्योयाःए
लाःतत्परिमलोयस्मिन्सः॥एवंचसौगंध्यातिशयोव्यज्यते॥अयंसमीपवर्त्तीत्यर्थः॥तेन
परिहरणीयत्वंध्वन्यते॥समीरोवायुरपिवरीवर्त्ति॥सम्यक्ईरयतिप्रेरयतिकाममिति
सुलम्यत्यामदनबाधातिशयजनकत्वंद्योत्यते॥एवंचविविधसुरतश्रमापनोदननिपुण
समीपवर्त्तिसमीरवत्तयापिसुरतयोग्यत्वंध्वन्यतेकुंजे॥किंचनववजलदविन्यासचतुरा
नवानूतनाःस्रजलाइतियावत्येजलदाःपयोदास्तेषांविन्यासोरचनातत्रचतुरानि॥
पुणा॥अतएवधन्यामदुपकारकत्वेनपुण्यवतीयंपुरोविलसन्तीप्रावृट्वर्षासमयोप्य
स्ति॥एवंवागामिजलपिच्छलरेवातटनिकटकुंजस्यजनसंचारायोग्यतयानिःशंकप
रपुरुषसहविहारयोग्यत्वमितिभावः॥स्त्रीलिंगनिर्द्देशेननववजलदविन्यासेननिविडांध
कारसंपादकतयास्वकर्त्तव्यतानुकूलकार्यकारित्वात्सखीत्वमावेद्यते॥यद्वानव
जलदसमागमशालितयेयंप्रावृट्सौभाग्यवतीअहंतुपरपुरुषसंगतिविहीनाअथ

३८ न्येतिध्वन्यते॥ अथवा॥ इयंनव जलदविन्यासचतुराधारदृ धन्यास्त्वं तु परपुरुषसंगतिसं
पादनानभिज्ञा अधन्येति सख्युपालंभो द्योत्यते॥ एवं विधोद्दीपनविभावे सति पराधीनं
श्वसुराधने कपरतंत्रं चेतः किमपि विशिष्य वक्तुमशक्यं कर्त्तुं मृगयते॥ एवं च चेतो न तूष्णीं
भवतिष्ठते परतंत्रताचेवं विदितैव विदिता तथा यथा न कस्यापि ज्ञानं भविष्यति तथा
कामुकोऽवश्यमानेय इति प्रच्छन्नकामुकाभिलाषो ध्वन्यते॥ यद्वा परास्मिन्पुरुषे अधी
नं नियंत्रितं परपुरुषानुरागगुणस्यूतं चेतः ममेति पदा॰ नुपादानं दुःखजननोऽयुक्तेम
नस्यात्मीयत्वाभावमावेदयति॥ किमपि अनिर्वचनीयं अनुचितप्राणवियोगं जन॥
यितुं मृगयते विचारयति॥ एवं च यावत्कालमेतच्चिंतनं तदुत्पादयति तावन्मध्ये पर
पुरुषसमागमार्थं यत्नं कुरुष नो चेद् प्रेमभजीवनं न संभवतीति ध्वन्यत इति सखी
प्रतिगुप्ततयास्वहृदताभिधानं लोके प्रतितु॥ अयं रेवाकुंजः रेवापदेन रेवातीरे त
पः कुर्यादिति पुराणात्॥ पावनत्वं ध्वन्यते॥ कुसुमशरसेवासमुचितः॥ कुसुमैः पु ३८
ष्पैरेव न तु रालोरिभिः शंखुरवरात्यंगी करोति एतादृशास्य भक्तिमात्र प्रियस्य परमे

श्राभावसरत्वात्परकीयां लक्षयति॥ अप्रकटेति॥ परपुरुषविषयास्फुटानुरागवत्त्वं परकीया
त्वमित्यर्थः॥ अ॰ स्फुटपदोपादानात्सामान्यवनितायां नातिव्याप्तिः॥ परपदोपादानान्न
मुग्धायां यत्तु अप्रकटितइति पाठः॥ एवं च॥ लीलामैत्री सहजमधुरा याति भिल्लीवितानैः क
र्णं कर्णे ग्रथितमयशो वैन्धुवर्गैरभाणि॥ सम्बन्ध्येवं तदपि नमनाक् कुंचति प्राणनाथं कोजा
नीते कुवलयदृशः कीदृशः प्रेमबंध इति वर्णनात्लोकैः परपुरुषानुरागे ज्ञातेऽपि यास्वयं न प्र
कटीकरोति अहमस्मिन्नासक्तेति सा परकीयेति तन्न॥ अहमस्मिन्नासक्तेति चित्तमात्रानु
पाधिकप्रकटितपरपुरुषानुरागायाः कान्तभार्यां वद्गति दोषापत्तेः॥ कन्यकायामनुभावि पुरुषा
पेक्षया परत्वमवसेयम्॥ ममतु चित्तमात्रानुपाधिकपरपुरुषानुरागवत्त्वं परकीयात्वमि
तियुक्तमाभाति॥ एवं च चित्तमात्रानुपाधिकप्रकटितपरपुरुषानुरागवत्याः कान्तभार्या व
इति न शंकावकाशः प्राकट्यविशेषाभाव एवात्र विवक्षित इति आर्जवः॥ नो बिभज्जनेत सा चेति
तमेवाह॥ परोढेत्यादि॥ परोढा परिणीतेत्यर्थः॥ ननु परस्येयं परकीयेति योगात् परस्व
त्ववत्याः॥ परिणीताया एव परकीयात्वमुचितं न त्वपरिणीतायाः इत्यत आह॥ कन्यकायाइति

॥३९॥ इष्टहानिजनितानुतापवत्त्वमनुशयानात्वम्॥ प्रभृतीनामिति॥ एतत्प्रकाराणामन्यासामपि
र्थः॥ ततः पार्श्वस्थितेषामनुपलंभादिति भावः॥ परकीयायामेवेति॥ परोढायामेवेत्यर्थः
परोढोदाहरणोत्तरमेवेतासामुदाहरणोपन्यासात्तदुदाहरणेषु पश्चादिति पदोपा
दानाच्च॥ गुप्तां विभजते॥ गुप्तेति॥ त्रैविध्यमेवाह॥ वृत्तेत्यादि॥ वृत्तमात्ररतगोपना वर्त्तिष्यमा
णमात्ररतगोपना उभयगोपना चेत्यर्थः॥ त्रयमप्युदाहरति॥ श्वश्रूरिति॥ कापि परपुरु
षोपभोगचिह्नान्युपलक्षितुं सखीं प्रत्याह॥ हे सखि सखीत्वेन स्वचरितकथनार्हत्वेपि तद्
गोपनादत्यंतगंभीरत्वमावेद्यते॥ श्वश्रूर्भर्तृजननी कुंठं कुप्यतु॥ श्वश्रूपदेन तत्कृतको
पसहनयोग्यत्वं स्वस्मिन्ध्वन्यते॥ किंच सुहृदो मित्राणि विद्विषंतु मा प्रीणंतु सुहृत्पदेन त
त्प्रीतिजनककर्मकरणयोग्यत्वेपि स्वयं तदकरणात्तत्सदनस्वापस्यातिदुःखदत्वं व्यज्य
ते॥ तथा यातरो देवरपत्न्योपि भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः॥ निंद
तु अपवदन्तु तद्वचनाकरणमेव क्रोधादिप्रयोजकहेतुः॥ किन्तु तस्मिन्नामिरादृष्टे मन्दिरे सखि पुनः
अन्यवारं स्वापो निद्रा नैव विधेयः कार्यः॥ निद्राभावविधानेनिदानमाह॥ आखोः मूषकस्य॥ उंदु
रुर्मूषक आखुरित्यमरः॥ एकवचनेनातिदुर्लभतया उड्डानवाकुल्यमभिव्यज्यते॥ आक्रमण ॥३९॥

यस्यांगीकरणाय जिघांसयेति भावः॥ कोणकुहरात्॥ गृहैकदेशशंकटप्रदेशात्॥ कुहरपदेन
जागरावस्थायां तत्रावस्थिताया अपि मार्ज्जार्या अदर्शनमावेद्यते॥ तेनानिवारितत्वं॥ उत्काले
उड्डानं॥ एकवचनं सजातीयत्वप्रतिपादनद्वारा नखक्षतानां नियतस्थानकत्वं व्यंजयति॥ आ
तन्वती विस्तारयन्ती॥ एवमुड्डानवाकुल्यप्रतिपादनेन नखक्षतवाकुल्यं द्योत्यते॥ मार्जारी
विडाली मार्ज्जारीति स्त्रीलिंगनिर्देशेन पश्चुपरुषकरस्पर्शाभावोपदर्शनात्स्वस्मिन्सतीत्व
मावेदयति॥ तेन गुप्तपरपुरुषानुरागवत्त्वं ध्वन्यते खरैस्तीक्ष्णैः खरपदं दुःसहत्वं व्यंजयति
नखरैः नखैः नखोऽस्त्री नखरोस्त्रियामित्यमरः॥ मे मम कांकां विशिष्य वक्तुमशक्यामित्यर्थः॥
दुर्दशां विडंबनां न कृतवती अकार्षीत्॥ अपि तु या दुर्दशा कृता सा ते अस्ति विदितेति भावः॥
पुनः स्वापो न विधेय इत्यनेन एकदाज्ञानात् स्वापः कृतस्तेनेयमवस्था संजातेति विरत्तरत॥
गोपनात्॥ पुनः श्वश्रूप्रभृतिभिर्वलात्तत्रैव स्वापार्थं प्रेषिता चेत्तर्हि एवमेव भावीति वर्त्तिष्य
माणरतगोपनादुभयरतगोपनस्यापि समानत्वसिद्धत्वादुदाहरसंगतिः वस्तुतस्तु आर्थसमाज
सिद्धत्वादेव न तृतीयो भेद इत्याप्याहुः॥ अत्र व्याजोक्तिः छेकमानस्य छद्मना वस्तुगोपनमिति
लक्षणलक्षितव्याजोक्तिरूपालंकारेण परपुरुषसंभोगचिह्नगोपनरूपवस्तुध्वनिः॥ शार्दूल

॥४०॥ विक्रीडितं वृत्तम् ॥२२॥ विदग्धो विभजते ॥ विदग्धा चेति ॥ द्वैविध्यमेवाह ॥ वाग्विदग्धेति ॥ प्रथमोद्दि
ष्टत्वाद्वाग्विदग्धामुदाहरति ॥ निविडेति ॥ संकेतस्थलमुपदिशंती काचित्कं चित्प्रत्याह ॥ हे पांथि
क पांथ पथिक पदं वसति स्थलं कथनयोग्यत्वं मार्गांतरवर्त्तिनदीतीरनिवासयोग्यत्वं च व्यं
जयति सवितरि सूर्ये तीव्रे ॥ अतिशयिततापकारिणि सति मध्याह्न इत्यर्थः ॥ एवं चाहिमकर
खरकरनिकरभीत्या जनसंचाराभावस्तया अग्रिममार्गस्यातिदुर्गमत्वमावेद्यते निविड
तमतमालमल्लिवल्ली विचकिलराजिविराजितोपकंठे ॥ निविडतमं ॥ अतिशयेन निविडं इति
निविडतमं ॥ यद्वा अतिशयेन निविडाः इति निविडतमाः ॥ अतिशायितत्वेनैरंतर्यशालिन इत्यर्थः
ये तमाला वृक्षविशेषास्तान् वल्यंते वेष्टयन्ति ॥ वल्लङ् संवरणे इत्यस्मात्क्विपि निः ॥ तास्तमालवल्लिन्य
ताश्च ता वल्यो लता मल्लिवल्लीतिपाठे मल्लंते अवलंबंत इति ॥ मल्लङ् धृतावस्मात् णिनिः वल्ल्य
श्च विचकिलाश्च ॥ द्विपुटो मल्लीप्रभेदो विचकिलः स्मृतो विचकिलो मल्लीप्रभेदे दमदनेऽपि चे
ति विश्वः ॥ निविडतमतमालमल्लिवल्लीतिपाठः ॥ तेषां राजयः श्रेण्यस्ताभिर्विराजितो वि
भूषित उपकंठोंतिकप्रदेशो यस्य तस्मिन् ॥ उपकंठांतिकाभ्यर्णमित्यमरः ॥ निविडतमपरम ॥४०॥
न्यजनानवलोकनीयत्वं व्यंजयति ॥ वल्लिपदं यत्राचेतनयोरपि परस्परमालिंगनं तत्र किमु च

श्वरस्याराधनोचितः ॥ तथा वेलानवविदलदेलापरिमलः ॥ वेलायां ऋतुबोधसमयेन नवविदलदेला
गंधः समीरोऽप्यस्ति स एवं तत्तज्जनको भविष्यतीत्यत्र हारीतरविवक्षात्वात्र परमेश्वरभजनं क
र्त्तुं शक्यमिति भावः ॥ तथा नवजलदविन्यासश्चतुरा धन्या छाया सम्पादकतया नापसोपकारि
त्वादिति भावः ॥ प्रावृडप्यस्ति ॥ एवंविधपरमेश्वरोपासनानुकूलपदार्थवत्यप्यस्मिन्प्रदेशे प
राधीनं परः सर्वोत्कृष्टोस्मदीयः प्राणप्रियस्तदधीनं तच्चरणारविंदासक्तं चेतः किमपि कर्त्तुं
मृगयत इति काकानकिमपिकर्त्तुं मृगयत इत्यर्थः ॥ एवं चास्माकं स्वाम्येवोपास्य इत्यभिधाना
ल्लक्षणसंगतिः ॥ अत्रैवमुपन्यासरूपवस्तुना परपुरुषप्रच्छिन्नानुरागित्वप्रकाशनरूप
वस्तुध्वनिः ॥ शिखरिणी वृत्तम् ॥ ध्वजः कर्णे हारो द्विजवरगणस्योरस्सयुतः समुद्रो रत्नेच प्रभ
वति यस्यास सदृशभिः ॥ भुजंगेंद्रो दिष्टा विबुधहृदयाह्लादजननी रसे रुद्रैर्यस्यां विरतिरिह
सैषा शिखरिणीति लक्षणात् ॥२३॥ ननु परकीयायाः गुप्तादिभेदसत्वात्तदानभिधाना
न्न्यूनतेत्यत आह ॥ गुप्तेति ॥ गेति वृत्तिसुरतगोपनं व्येति चकारस्यानुक्तसमुच्चायकत्वाद्वर्त्त
माने कर्त्तरि क्तः ॥ स्वरतगोपनकर्तृत्वं गुप्तात्वमिति फलितोऽर्थः ॥ पुंश्चलीभावनिपुणत्वं विद
ग्धात्वं ॥ नारसम्भ्रमत्वं कुलितं लटतिव्रतीति युक्तस्याकुलितभावित्वं वा कुलटात्वम्

॥४१॥ तरतपनतापितस्य मार्गश्रांतस्य भवतो ग्रीष्मसमये चंद्रोपलकलशाभ्यामिव पयो
धराभ्यामाभ्यामतिशीतलं विचकिलमालासुरभिमद्धृदयमेव तल्पमेव तापहरणप्र
वणमिति भावः ॥ तनसंचारविरहितेन शीतलतरेरस्तुचिते नदीतीरे मध्याह्ने मत्वत्प्रतीक्ष
यास्थेयम् ॥ अहमपि तस्मिन्नेवावसरे समागत्य त्वामतिगाढमालिंगामीति नदीती
रमेव संकेतस्थलमिति पथिकं प्रति साभिप्रायवचनरचनाविशेषेण वक्तीति वाग्विद
ग्धेयम् ॥ अत्रैवं वाकूरूपवस्तुना संकेतदानरूपवस्तुध्वनिः ॥ न चात्र असमस्तपदप्रा
यावैदर्भीति लक्षणलक्षितायाः शृंगारोपयोगिन्याः वैदर्भीरीतेरनादरादोजः कांति
मती गौडीति लक्षणलक्षितायाः रौद्ररसोपयोगिन्याः गौडीरीतेर्निबंधाद्दनौचित्य
मिति वाच्यं प्रायः पदेन क्वा॰ विद्दीर्घसमासवत्वेपि तस्यानुज्ञानात् ॥ परं तु सुकुमारक
ठिनवर्णवत्वादेवानयोर्भेदः ॥ पुष्पिताग्रा छंदः ॥ २३ ॥ क्रियाविदग्धामुदाहरति ॥ दासा
येति ॥ काचित्कांचिन्नृत्याह ॥ भवननाथ गरहपतौ नतु प्रियेऽवं चैताहशाकर्तव्यस्यो
चित्यं ध्वन्यते दासायसेवकायनत्वन्यस्मै ॥ एवं चावश्यं भावि वदरीविच्छेदभियाकुठा ॥४१॥

रगोपनमुचितमिति भावः ॥ वदरीं स्वचौर्यरक्षणस्थानभूतां ॥ कं कं धु वंदरी कोलिरित्य
मरः ॥ अपनेतुं आमूलं छेत्तुं आदिशति आज्ञापयति स्म तिह हरिणाक्षी चंचललोचना संकेत
निकेतभंगभियेति भावः ॥ यद्वा कुत्र कुठारस्याज्ञा यत्र नैकेनापि ज्ञेय इति स्थलगवेषणा
र्थमिति भावः ॥ झटिति कुठारदुरीकरणार्थमेवेति भावः हेमंते हेमंतर्त्तौ तत्र जलस्य
तिशायितशीतलत्वादिति भावः ॥ पयसि जलमध्ये न तु तीरे एवं च दुःप्रापत्वं व्यज्यते।
कुठारं स्वधितिं वदरीछेदनकारणमिति भावः द्वयोः कुठारः स्वधितिरित्यमरः ॥ विनिक्षिप रि
ति गोपायतीत्यर्थः ॥ गवेषयन्नपि दासो न जले संभावयेत्संभावयन्वाशीतकातरतया
न करं क्षिपेदित्येतत् कालातिक्रमे कार्यांतरेण विस्मृतिरेव स्यादिति धिया ॥ युक्तमेव
तत्र तद्गोपनमिति तत्कर्मीमेव स्वकौर्यसाधकतया क्रियावैदग्ध्यम् ॥ अत्र कुठारगोपन
वस्तुना स्वचौर्यरतसंकेतनिकेतगोपनरूपवस्तुध्वनिः ॥ गाथोत्तरदलतुल्यं पूर्वदलं य
दि भवति बाले ॥ तामिह फणिपतिभणितां तामुपगीतिं वर्णयंति जनाः ॥ इति लक्षणलक्षि
तमुपगीतिर्छंदः ॥ २४ ॥ लक्षितामुदाहरति ॥ यद्भूतमिति ॥ काचित्त्वं प्रति निवारणकारि

॥४२॥ लीं अन्यत्र तत्रोपनकारिणीं सखीं प्रत्याह ॥ हे सखि यद्भूतं यज्जातं विचार्य्याविचार्य यदनुष्ठितमित्य
र्थः ॥ विचार्याविचार्य वा तद्भूतमेव जातमेव ॥ जातस्योपायशतैरप्यनिवर्त्तनीयत्वादिति
भावः ॥ सबाधकमिदमतो न पुनः कर्त्तव्यमित्य[illegible] आह ॥ यद्भूयादिति ॥ यदरिष्टं भूयात्तभ
विष्यति ॥ तदपि भूयादेव भविष्यत्येव भाविपदार्थस्यैव भाविपदार्थस्य केनापि निवा
रयितुमशक्यत्वादिति भावः ॥ ननु यद्भाव्यो विनश्यतीतिन्यायात् ॥ देवमात्रशरण
तानोचितेत्यत आह ॥ यद्भवति यदाचर्यते तद्भवति च आचरितव्यमेवेत्यर्थः अ
नारंभो मनुष्याणां प्रथमं बुद्धिलक्षणम् ॥ आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्ष
णमितिनीतिरीतिनिपुणस्मरणादेतादृशाचरणमेव नारंभणीयं ॥ आरब्धे तु बा
धकसंभावनया नोचितस्यागइति भावः ॥ यद्वा भाव्यरिष्टस्यावारणीयतया
यद्भवति तत्क्रियते तद्भवत्येव तत्कर्त्तव्यमेवेत्यर्थः ॥ अरिष्टस्यावश्यं भावित्वा
दितदनाचरणादाचरणमेव वरमिति भावइत्यर्थः ॥ गोपनमपि न कार्य्यमित्याह
कोपि विशिष्य वक्तुमशक्योपि गोपनायासः गोपनप्रयासः विफलः व्यर्थः लक्षित ॥४२॥

व्यं सचेतनयोरिति अतिशयितोद्दीपकत्वं नदीतरस्य ध्वनयति ॥ तत्र मार्गवर्त्तिनि ॥ यद्वा प्रसि
द्ध एवं च केन यथाकथं वा तत्र गंतव्यमिति मनसि न विधेयमिति भावः ॥ सरित्तटे नदीतीरे अत्य
द्धिने ॥ अद्येत्यावश्यकत्वं द्योतयति ॥ निवासः निवसतिस्म उचिते सम्यक् उचितः योग्यः एवं
च तत्र वसता वनौचित्यं नाशंकनीयमिति ध्वन्यते ॥ तपनखरकरसंतप्तस्य निविडछाय
शीतलजलवत्प्रदेशे वसतिरुचितेव तत्वेति भावः ॥ एवं च तपनकरसंतप्तस्य मार्गजन्य
श्रमवतः ॥ सुखावहवसतिस्थलकथकत्वेन दृश्याशीतलत्वप्रदर्शनाद्गुप्तपरपुरुषानुरा
गवत्त्वं द्योत्यते ॥ यद्वा विराजिते उपकंठेइति पदद्वयं तथा चेह विराजितवर्त्तमाने कः सर्वांगी
णलावण्यशालिसुकुमारशरीरपथिक ॥ तीव्रे सवितरि ॥ निबिडतमतमालावल्लिमल्ली
विचकिलराजिराजिते ॥ सत्पदं द्विपेति क्लिप् ॥ विचकिलैराजते शोभते तत्र सरित्तटे यद्वोपकं
ठविशेषणम् ॥ एवं च निबिडतमतमालसंविधिविचकिलमालाशालिनीत्यर्थः ॥ निबिडत
मतमालसंबंधस्तु कीर्त्तनेनाम्लानत्वं मालासु तेन च सौगंधातिशयत्वं हृदि ध्वन्यते ॥ उपकं
ठे कंठसमीपे ॥ अर्थात् मम वक्षस्थलइत्यर्थः ॥ तव निवासो योग्यः सुकुमारशरीरस्य तीव्र

॥४३॥ धाः॥ अनुपयोगिभारधारका इति भावः॥ बहुवचनेनैकस्याप्युपकारित्वाभावात्सर्व
मुक्तये प्रयोजकत्वमावेद्यते॥ एवमग्रेऽपि॥ वारिकणान् जलबिन्दून्॥ अस्मद्दु
पयोगिन इति भावः॥ किरंति क्षिपंति अप्रार्थिता अपीति भावः॥ किरन्तीति पदे
हेयत्वं ध्वनयति॥ नेतरस्मादुपयोगीत्याह॥ पुरुषान् जारानिति भावः पुरुषप
दउपभोगक्षमत्वं ध्वनयति॥ नवर्षंति त्यजन्ति॥ क्षेपेण क्रियाकरणस्य भावि
कत्वात्तस्याः पुरुषविषयकत्वमात्रासंपादनादत्युपकारित्वस्याप्यभावान्नि
यत्वमंभोधरेषु ध्वन्यते॥ तेनापकारहीनांभोधरजनकतया वधसोपि त
ध्वन्यते॥ एवमग्रेऽपि॥ तथा शैलाः शिलोच्चयाः कठिनत्वात् करुणाकरा इति भा
वः॥ शार्दूलेत्यां शार्दूलस्तु शारदहरितइत्यमरः॥ उद्वमन्ति प्रकटयंति॥ उद्वमन
पदं अतिनिंद्यत्वं द्योतयति नतरप्यस्मादुपयोगीत्याह॥ एते शैलाः पुनः नाय
कान् जारानिति भावः॥ नायकपदं चातुर्य्यादिगुणवत्त्वं व्यंजयति॥ नरस्त्रंति
उत्पादयन्ति॥ तथा त्रैलोक्ये त्रिषु लोकेष्वित्यर्थः॥ चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् ॥४३॥

एवं च भ्रमिश्यतरूणां पुरुषाजनकत्वेऽपि प्रार्थ्यमानाः स्वर्गस्थितकल्पपादपा अ
पि कल्पितफलदाननिजव्रतमपहाय अस्मदपेक्षितजाररूपफलदानविहीनाः सं
जाता इति स्वस्यातिदुर्दैवतां ध्वनयति॥ तरवः वृक्षाः ज्ञानहीना इति भावः फलानि सु
वते उत्पादयंति॥ सुवत इति पदमनुपयोगित्वमावेदयति। तरप्यनुपयुक्तमित्या
ह॥ जनान् जारानित्यर्थः जनपदं शांतिरसविमुखत्वं द्योतयति॥ अन्तः हे धातः अ
त्तन् त्वया विश्वसृजा॥ एवं च को वान्यस्ति क्षितिसमर्थो यं प्रत्युपालंभ इति भावः य
द्वा को वा त्वदन्यो मदपेक्षितकार्य्यकारीति भावः॥ अथवा यस्य निखिलकार्य्यक
रणेन को विश्रमस्तस्य मदपेक्षितकरणे को वा श्रम इति भावः॥ कुलस्य हेतोः कुलरा
र्थे किं कृतं न किमपीत्यर्थः॥ इति कातरं आलपामि॥ दीनोपलंभं वदामीत्यर्थः॥ एवं
च दीनहृदयं वां ब्रह्मा विज्ञानमात्रादेव तत्संपादनमुचितं महतां किंपुनस्तादृशी रीतिः सं
पादनीयमिति भावः॥ यद्वा त्वया कुलरार्थे किं कृतं कुत्सितं कृतमित्यर्थः॥ अंभो
धरा धाराः न केवलं नायकान् जनयन्ति प्रत्युत॥ मरनो दीपजलशीकरदूतनतृणां

॥४४॥ कुराभिनवफलानि जनयन्तीति न केवलं निरर्थकत्वमपि तु दुरर्थकत्वमिति भावः ॥ शार्दू
लविक्रीडितं वृत्तम् ॥ २६ ॥ अनुशयानां विभजते ॥ वर्त्तमानस्थानविघटनेनेत्यादि वर्त्तमा
नसंकेतनिकेतरूपेष्टहानिजनितानुतापवत्त्वमित्यादिलक्षणत्रयं बोध्यम् ॥ आद्यामुदाह
रति ॥ समुपागतवतीति ॥ काचित्कस्याश्चिद्वृत्तं स्वसखीमुद्दिश्याह ॥ लवङ्गलतिकायाः अ
नुकम्प्यालताल तिकेत्यनुकम्पायां कविगलितदलत्वादिति भावः ॥ अर्थाज्जोर्ण्यरतसं
केतभूतायाः इत्यर्थः ॥ यत्तु अल्पालताल तिकेतिव्याख्यानं तत्संकेतानर्हत्वप्रतिपादना
द्युक्तं लतैव लतिकेति स्वार्थेप्यर्थतैव ॥ जात्यभिप्रायिकमेकवचनं ॥ निपतितपत्रे स्वय
मेव गलितानि तस्मिन् तत्र ॥ चैत्रे मासि स्वसंकेतनिकेतभंजकरइति भावः ॥ समुपाग
तिस तवति प्राप्तवतीत्यर्थः ॥ निपततीति पाठे पत्रे निपतति सतीत्यर्थः ॥ सुदृशः शोभने
दृशौ यस्याः सा सुष्ठु पश्यतीति वा ॥ एवं च समीचीनसंकेतविचारव्याकुलत्वं द्योत्य
ते ॥ कपोलपाली गंडस्थली स्त्रिलिंगनिर्द्देशेन सजातीयतया दुःखवत्त्वस्य युक्त ॥४४॥
त्वं ध्वन्यते ॥ शिवशिवपदं मदनबाधानिवारकतया प्रकृतोचित्यमावेदयति ॥ द्विरुक्ति

त्वात् इत्यर्थः ॥ यद्वा यत्कृतं तन्न कृतमेव न क्रियते तदपि क्रियत एव ॥ यत्कर्त्तव्यं तदपि
कर्त्तव्यमेव ॥ एवं सति तव कश्चिदपि गोपनप्रयासो निरर्थक इत्यर्थः ॥ आयासपरं क
र्त्तव्यतायाम् ॥ सकललोकप्रथितत्वं तज्जलक्षितात्वं एवं चैतन्नयानकदापि परित्याज्य
मिति व्यज्यते ॥ तेन च कामुकविषयकासक्तिविशेषः ॥ अथवा विदितनायिकारहस्या
वयस्या वक्ति यत्कृतं तन्न कृतमेव यान्न क्रियते तन्न क्रियत एव यत्कर्त्तव्यं तदपि कर्त्तव्य
मेव अर्पात्वया ॥ एवं च गोपनायासो व्यर्थ इत्यर्थः ॥ एवं च सकृदनुष्ठितगोपनं सं
भवति न संभवति सर्वदानुष्ठीयमानस्येति ध्वन्यते ॥ गोपीति पाठे मा स्त्रियस्त
स्मात्क्रियमिति क्रिश्चित ॥ अत्र नर्मस्फोटस्तु भावनांसरचनायापरं गितेरिति
लक्षणलक्षितानुप्रासानुप्राणितो नर्मस्फोटालंकारः ॥ गाथाद्वितीयतुर्य्यौपा
दौ भवतस्तु विपरीतौ ॥ सेयं भवति विगाथा फणिनायकपिंगलेन संप्रोक्ता इति ल
क्षणलक्षितं विगाथाछंदः ॥ २५ ॥ कुलटामुदाहरति ॥ एतत् इति ॥ काचित्स्वैरिणी धा
तारमुपालभते ॥ एते दृश्यमानाः ॥ स्वोपकारिछायाभिमानिन इति भावः ॥ अंभोधरा मे

॥४५॥ लोकनीयत्वंतदपिनिःशंककेलियोग्यत्वम् ॥ मिथुनपदंपरस्परविरहासहिष्णुत्वंद्योतय
ति ॥ तत्रविविधोद्दीपनविभावत्वंतदपिचनानाविधसुरतोचितत्वम् ॥ अयंचतादृक्कुंजे
स त्वदभिमतनायकेनप्रीतिरसः ॥ रतिश्रमपरिहारायत्वामालिंग्यनिद्रासुखेनकरिष्यती
तिविवक्षितान्यपरवाच्योध्वनिः ॥ तत्रजाराद्याह्यकेनसहनिःशंककेलिरित्यत्राह ॥
कपोतपोतव्याधूततनूतनमहीरुहपल्लवानि ॥ केनमूर्द्ध्नापवतेविलसतीतिकपोतः क
लरवः सचासौपोतश्चापवतेविलसतीतिपोतः अर्भकः उपसर्जनत्वाविवक्षयानपोत
शब्दस्यपूर्वनिपातः ॥ तेनव्याधूताः कंपिताः नूतनाः अभिनवाः महीरुहपल्लवाः तरुकि
सलयानियेषुतानि ॥ कपोतेत्यनेनशिरोधूननपूर्वकसविलासगतिकत्वंव्यज्यते ॥ पोतश
त्यनेनचफलविलासित्वंध्वन्यते ॥ तेनचवारंवारागमनयोग्यत्वं ॥ एवंचतादृशजारविला
सीत्वांकलकंठकूजितेनशिरोधूननेनकरपल्लवचेष्टयाचरमयिष्यतीतिपूर्ववद्ध्वनिः ॥
यद्वासएवरतावधरदंशनादिनात्वांकंपितमस्तकांधुतकरकोमलपल्लवांकरिष्यतीति
पूर्ववद्ध्वनिः वनानिकाननानिकियन्तिकतिनसंति ॥ अपितुबहूनिसन्तीत्यर्थः ॥ अतःन ॥४५॥

खिद्यस्वदुःखंमायाहि ॥ किंतुप्रियतमस्यप्राणेश्वरस्य ॥ जारासक्तत्वेनभर्त्तरिप्रीत्यति
शयाभावात् ॥ अल्पाचतरमित्यत्रतरपवत्तमयस्वार्थे ॥ गृहंसदनंप्रयाहिगच्छ ॥ अ
त्रोक्तलक्षणव्याजोक्तिरूपालंकारेणनायिकायाः संकेतोपदेशप्रतीतिरूपवस्तुध्वनिः
वसन्ततिलकावृत्तम् ॥ २८ ॥ तृतीयामुदाहरति ॥ कर्णेकल्पितेति ॥ काचित्कांचिदत्याह
कर्णकल्पितरसालमंजरीपिंजरीकृतकपोलमण्डलः ॥ कर्णेश्रोत्रेकल्पिताउत्तंसीकृ
तासंकेतिततरुतलेमयागत्वापरान्नमितिराधाप्रत्ययार्थमितिभावः ॥ रसालस्यआ
म्रस्यतस्यैवसंकेतितत्वादिभावः ॥ तस्यमंजरीपुष्पगुच्छविशेषः तयापिंजरीकृतंपिंज
रीकृतंपरागसंसर्गादितिभावः ॥ कपोलमण्डलंगण्डस्थलंयस्यसः ॥ कर्णपदस्यथेयंमं
जरीकेवलंश्रवणयोग्यातथातद्दूरितेकेवलंश्रवणयोग्यमेवनत्वनुभवयोग्यमि
तिसंकेतपालनराहित्यंव्यंजयति ॥ कल्पितपदंयथानकमपिरसालमंजर्याः पराग थ
संगमस्तथासंस्थापनेनकतिपयाधिककालावस्थापिततयासंकेतस्यातिप्रियत्वंराधा
यास्तथाविधप्रत्ययोत्पादनस्यावश्यकत्वंचद्योतयति ॥ रसालपदस्यरमणीयत्वंध्वनयति

॥४९॥ कष्टीच विरहकातरत्वं व्यनक्ति॥ मञ्जरीपरेन परिमलबहुलत्वं व्यज्यते॥ स्त्रीलिंगनि
र्द्देशेन सल्लिलियाग्रहणयोग्यत्वमावेद्यते॥ पिंजरीकृतपदं कृतसंगमस्य कलिरसाल
मञ्जर्य्याः प्राप्त्यभावादचेतनस्य गंडस्यापि पाण्डुरता संजायते किमुत सचेतनस्येति वि
रहभीरुतामावेदयति॥ मधुरिपुर्मधोः दैत्यस्य शत्रुः कृष्णः मधुपदं उन्मादनत्वं ध्वन
यति तच्छत्रुराधर्षत्वं रिपुपदं तत्प्रतियोगिक वैरवत्तया जगद्धितैषिवैभवत्वं व्यंजयति त
त्रावश्यम् [illegible] स्पर्शनयोग्यत्वं॥ उभाभ्यां च कठिनहृदयत्वं तत्र स्वकृतसंजातसंकेत
विघातजनितमन्युतया दुःप्रापस्पर्शनीयत्वं द्योतयति॥ अतएव निःपतन्नयनवारिधा
रया निःपतंती निस्सरंती नयनयोर्नेत्रयोर्वारिधाराजलधारा यस्याः सा संकेतित
तरुतलगमनज्ञापकमञ्जरीदर्शनेन मय्येव तत्र मन्दभाग्यया न गतमिति विषादेनेति
भावः॥ धारापदेन दुःखातिशयो व्यज्यते॥ राधयाराधयतीति राधा तया॥ एवं च मधु
रिपुसङ्गमे कचित्तत्वं ध्वन्यते॥ निरीक्ष्यते विलोक्यते निरीक्ष्यत इति पदं किं। कर्त्तव्यता
मूढत्वं व्यनक्ति॥ रथोद्धता वृत्तम्॥ हारसङ्गतपयोधराकरं शंखयुक्तवलये नसंगतम्॥ ॥४९॥

दुःखातिशयं व्यंजयति तालीदलघटितं तालीवृक्षविशेषस्तस्य दलेन वेष्टितं पत्रमित्यर्थः॥ तस्य घ
टितपाण्डुरकांतिलेभे प्रापलेभे इत्यनेन कांतिप्राप्तावनायासजन्यत्वं तेनातिविरहकातरत्वं द्यो
त्यते॥ संकेतनिकेतभंगदुःखेनेति भावः॥ तालीति स्त्रिलिंग निर्द्दिशात्सजातीयतया तद्धटितः
शीघ्रप्राप्यत्वं व्यज्यते॥ यद्वा कामिनी तत एव तत्प्राप्त्यासती त्वं॥ तेन गुप्तपरपुरुषानुरागवत्वं
द्योत्यते॥ गाथा द्वितीयतुर्य्यावष्टादशमात्रकौ यदा भवतः मात्राषष्टिशरीरं प्रोक्ता सा गी
तिरिह हि फणिपतिना॥ इति लक्षणलक्षितं गीति छन्दो द्वितीया मुदाहरति॥ निद्रालुके
कीति॥ का चित्स्त्रियवसतिं नीयमानां तत्र चौर्य्यरतसंकेतनिकेतनाभावशंकाव्याकुलां नायि
कां समाश्वासयति॥ हे तन्वि कृशांगि तन्विपदं चिंतातिशयं व्यंजयति॥ यतः तत्रापि प्रियव
सतावपि॥ निद्रालुके किं मिथुनानि निद्रालून् निद्राशीलानि॥ स्पृहिगृहीत्यालुच॥ प्रश
स्ताके कामस्य रवाणी येषां प्रशंसायामित्कि॥ तेषां वर्ह्लीणि मिथुनानि स्त्रीपुंद्वंद्वानि येषु ता
नि॥ निद्रालुपदं॥ आश्वस्तत्वं ध्वनयति॥ तद्वजनसंचारशून्यत्वं॥ तरपिगुप्तरतयोग्यत्वं
के कि पदं घनतरघनोदयविभ्रमजनकनिविडतमतरुच्छायावत्त्वं व्यंजयति॥ तत्रान्यानव

४७ पदंकठिनत्वंव्यंजयति उदंचितंउत्कृष्टंरमणीयंयारोमांचकंचुकं रोमांचाःकंचुकमिवलोहजांग
त्राणमित्यर्थः कंचुकोवारवाणोस्त्रीत्यमरः कंचुकपदंनैविड्यंध्वनयतितत्रहर्षातिशयम् आ
ततानविस्तारयतिस्म आनन्दादितिभावः एवंचस्तनःकठिनतस्योरपिकुचयोःसुरतसंग
रे[redacted]संगोमाभवत्विति धियाकंचुककरत्वेसुरतप्रियत्वमभिव्यज्यते एवंचननंदायावाधी
र्य्येऽपिनत्रसत्वादेवरपत्न्याश्चनेत्राभावेऽपिश्रोत्रसत्वात्सुरतप्रतिबंधकसामान्याभा
वविवक्षत्वाकुः अत्रैताद्दशोक्तिवस्तुनापांथस्यसंकेतदानप्रतिरूपंवस्तुध्वन्यते तेन ती६
चायमुपभोग्यइतिनायिकाहर्षप्राप्तिरूपंव्यस्तुव्यज्यते वसंततिलकावृत्तम् ३० सप
रिकरंपरोढामभिधायकन्यांलक्षयति किंचिदिति काचित्कांचित्यत्याह किंचित्कुं
चितहारयष्टि किंचिन्मनाक् कुंचितावलिता तिर्य्यक्चलनादितिभावः हारयष्टिर्हा
रलतायत्रक्रियायांतथा किंचित्पदंचकुतरतिर्य्यक्विचलनेसविधजनस्यसाकूत
ज्ञानंभविष्यतीतिसंकेतदानगोपनंव्यजयति हारपदंचित्ताकर्षकत्वंस्वच्छत्वंकरत्वं
चध्वनयति यष्टिपदंकठिनतामावेदयति साचकामुकदर्शनसमसमयसंजातविरह ४७

कातरताम् स्त्रीलिंगनिर्देशश्चस्वनिष्ठलज्जायास्तोचितींद्योतयति साचतवदुतथानतद्धत्व
कर्त्तव्य मुचितमिति[redacted]निःशंकत्वोचित्यं समस्तेचसंकेतागमनावसरेतिर्य्यक्विलोकनेनजनकोपप्र
तांव्यनक्ति किंचसरलभ्रूवल्लि सरलेअकुलेभ्रूवल्लीभ्रूलतेयत्र सरलपदेनसस्पृहा
वलोकनीयत्वंव्यज्यते वल्लिपदेनसरसत्वंध्वन्यते स्त्रीलिंगनिर्देशेनस्वीयस्वाभाविक
कौटिल्यस्यापित्यागेनकामुकविषयेप्रीत्यतिशयोद्योत्यते समस्तेनचस्वीयदूरदर्शि
त्वं किंचसाचिस्मितम् साचितिर्य्यक् स्मितंहसितंयत्र अन्यापदेशेनेतिभावः एवंच
हास्यगोपनेनअन्योत्स्नायांनागन्तव्यमिति[redacted]व्यज्यते किंचप्रांतभ्रांतविलोचनद्युति
प्रांतयोःअपांगयोःभ्रांताव्याकुलाविलोचनयोर्नेत्रयोर्द्युतिःकान्तिर्यत्र भ्रांतिप
दंकामुकोदकूमार्गांतमापरमत्विति विरहभीरुतांगमयति समस्तंचसंकेतागमनकाले
परितोविलोकनेनानवलोकनीयतयाआगमनगोपनंव्यंजयति किंचभुजापर्य्यस्तकर्ण
भुजायांवाहो भुजांचगुर्व्वीमितिमाघीयप्रयोगदर्शनाद्भुजशब्दःस्त्रीलिंगोऽप्यस्ति पर्य्य
स्तंपतितंकर्णोत्पलंअवतंसीकृतमितिभावः एवंचमदुजायोकदात्वत्करकमलसंगो

॥४८॥ भविष्यतीति आलिंगनौत्सुक्यं ध्वन्यते ॥ तथा स्फुरदंगुलीयकरुचा ॥ गंडस्य स्फुरंती दीप्य
माना अंगुलीयकस्य उर्मिकायाः ॥ अंगुलीयकमूर्मिकेत्यमरः रुक् कांतिर्यस्याः तया
एवं च भूषणस्यापि शोभाजनकतयांगुल्याः शोभातिशयो ध्वन्यते ॥ अंगुल्याः गंड
स्य कपोलस्य कंडूयनं कुर्वाणा विदधती ॥ एवं च मत्कपोले त्वया स्वकरेण पत्रवल्ली
विरचनीयेति व्यंजयति ॥ कर्णस्येति पाठे त्वद्वचनामृतपात्रताभाक्त्वस्य कर्णस्य भ
वत्विति ध्वनयति ॥ नृपकन्यका राजकन्यका नृपपदं दुःप्रापत्वं व्यनक्ति ॥ यद्वा इतरने
रसंरक्षकस्य स्वीयकन्यारक्षणे किं काठिन्यमिति तथाविधरक्षणादिपरिहारपुरः
सरं विलोकनेनातिवश्यत्वं ॥ सुकृतिनं सुकृतपरिपाकवंतं युवानं ॥ यस्त्वक्ष्यते स्य
यइति वत् ॥ यमालोकते स सुकृतीति वचनव्यक्तिः ॥ सव्याजं तादृशचेष्टाभिः स्वाकूतं
ख्यापयंती किमपि व्याजीकृत्य ॥ तथाविधधार्ष्ट्याभावादिति भावः ॥ सखीसान्नि
ध्यादिति वा ॥ आलोकते विलोकयति मदनपरवशतयेति भावः ॥ तादृशचेष्टाचर
णेन वस्तुना नायकस्य मय्यनुरक्तेयमिति प्रतीतिरूपवस्तुध्वनिः ॥ शार्दूलविक्रीडि ॥४८॥

विभ्रती कनककुण्डलं सुदंकामिनी वकुरुते रथोद्धतेति लक्षणात् ॥ २९ ॥ मुदितामुदाहरति ॥ गो
ष्ठेष्विति ॥ काचित्सखी स्वनायिकासविधमेव पथिकं वक्ति ॥ हे पांथ अस्याः पतिः ॥ पातीति पतिः
भर्त्ता पतिपदमप्रियत्वं ध्वनयति ॥ गोष्ठेषु ॥ गावस्तिष्ठन्त्यत्रेति गोष्ठानि तेषु ॥ गोष्ठं गोस्थान
कं वेत्यमरः ॥ बहुवचनेन चिरप्रत्यावर्त्तिकत्वं ध्वन्यते ॥ तिष्ठति अहर्निशमिति भावः ॥ त्वरा
ततः प्रच्छलताभावो द्योत्यते ॥ किंच ननान्द्राः ननंदृ इति भ्रातृजायायामिति ॥ ननंदा भर्त्तृभ
गिनी ननंदापदं नियतद्वेषवत्त्वं व्यनक्ति ॥ बधिरा श्रवणाभाववती ॥ बधिरस्य प्रायेणामूक
त्वात् दृष्टमप्यनया वक्तुमशक्यमिति भावः ॥ तथा यातुः देवरपत्न्याः नेत्रद्वयस्य च नये
नसुगलस्य च चकारात् श्रोत्रयुगलस्येत्यर्थः ॥ पाटवं सामर्थ्यं नास्ति ॥ इत्थं पतिरनागं
तात् ननंदृगिनी देवरपत्न्यां अंगविकलत्वं तरुणी चेयं मत्सखी ॥ तस्मात्त्वया अत्र स्थातव्य
मिति संकेतद्योतकत्वं सखीवाक्यं निशम्य सादरं श्रुत्वा ॥ एवं च संकेतस्यातिप्रियत्वं
ध्वन्यते ॥ तरुणी नायिका तरुणीपदं संकेतितनायकस्पृहणीयत्वं व्यंजयति ॥ तद्भावरूपं
भाविसुरतं ॥ कुचकुंभसीम्नि कुचौ कुंभाविव कठिनावित्तयोः सीम्नि परिसरे ॥ कुंभ

॥४९॥ यते ॥ तत्रापि तयोरपीत्यर्थः ॥ वित्तमात्रमेव नसोन्दर्यादीत्यर्थः ॥ अयं भावः इरावती ॥
वसंतसेने वित्तेतरानुपाधिकत्वे सति वित्तोपाधिकाग्निमित्रचारुदत्तमतसतानुराग व
त्यो अदात्रनुरागाभावविशिष्टरत्नादिदानशीलाग्निमित्रचारुदत्तानुरागवत्त्वात्
यन्नैवं तन्नैवमित्यनुमानात् ॥ तत्रापि वित्तोपाधिक एवानुरागः ॥ अतएव दशरूप
कृत्युक्तं ॥ छन्नकामसुखार्थाज्ञस्वतंत्राहंयुपंडकान् ॥ रक्तेव रंजयेत्स्वार्थान्निःस्वा
न्मात्रा विवासयेदिति यत्तिदानीं तन्नाः अपि काश्चित्सामान्यवनिताः केषांचित्सौं
दर्यादिगुणलोभात्स्वीयधनैरेवोपकुर्वतीति प्रत्यक्षविरुद्धैयेकत्वनेति विभाव्य
ते ॥ तदोक्तरूपसामान्यवनितात्वस्योपाधेः कालिकाव्याप्यवर्त्तित्वमेव ॥ प्रथम
तः सामान्यवनितानां विनाधनं नानुरागः ॥ चिरपरिचयोत्तरं तु सौंदर्यादिनानु
रागइति तदवस्थायांनास्त्येव सामान्यवनितात्वम् ॥ ननु तदानासौकांतर्भाव
इति चेत् ॥ परकीयायामिति गृहाण ॥ नचाप्रकटपरपुरुषाभिलाषेति प्राग्युक्तल
क्षणाव्याघातापत्तिः ॥ परकीयायाअपि न सर्वान्प्रत्यप्रकटः परपुरुषाभिलाषः ॥ ॥४९॥

यथा तथात्रापि ॥ वस्तुतस्तु सामान्यवनितेयं सामान्यवनितेयमित्यनुगताकार
प्रतीतिसाक्षिकोपाधिमत्त्वमेव सामान्यवनितात्वमित्यखंडोपाधिरिति दिक् ॥ के
चित्तु सकलपदं वाकुल्याभिप्रायं तथा च वाकुल्येन वित्तमात्रोपाधिकानुरागवत्त्वमि
तिलक्षणमाहुः तन्न ॥ अननुगमात् ॥ सामान्यवनितामुदाहरति ॥ दृष्टेति ॥ काचि
त्कोचित्प्रत्याह ॥ धींगणासंनिधौ प्रकृष्टमंगणं प्रांगणं ॥ प्रकर्षेणास्तु भगजनसरणि
सन्निहितत्वं दूरतोः पिदृश्यकामुकत्वं वा ॥ तत्सन्निधौ निकटे ॥ अंगणं चत्वराजिरमि
त्यमरः ॥ सन्निधिपदं दूरत एव दर्शनेनेतादृश्यवस्योत्पत्त्या धनलुब्धत्वमावेद
यति ॥ वसुधनं वसुद्रव्यं वित्तं दातृत्वाभावे वसुधनवत्त्वमप्रयोजकमित्यत आह ॥ दा
तारं दानशीलमित्यर्थः ॥ अभ्यागतं अनाकारितमिति भावः एवं स्वतः प्रवृत्तत्वेना
धिकधनदातृत्वं द्योत्यते ॥ तेन च हर्षातिशयः ॥ दृष्ट्वा विलोक्य ॥ ननु स्पृष्ट्वा ॥ एवमपि
दर्शनमात्रादेवैतादृश्यवस्येति धनलुब्धत्वं ध्वन्यते कुरंगीदृशः मृगनेत्राः मृगाः म
गेकुरंगवातायुरित्यमरः ॥ कुरंगपदं विशालत्वचंचलत्वद्योतयति ॥ वक्षोजौ कुचौ ॥

॥५०॥ वक्षोजपदं॥ अंतरंगतां गमयति॥ सा च नायिका स्वसुखसाधनसमसमयहर्षयोग्यतां।
परस्परं अन्योन्यं परस्परपदं समानहर्षतामावेदयति॥ आश्लेषं आलिंगनं हारादिप्रा
प्तिसंभावनयेति भावः॥ आश्लेषपदं हर्षविशेषं व्यंजयति॥ तनुतरश्च विस्तारयतश्च त
नुत इत्यनेन आश्लेषे चिरकालावस्थायित्वं ध्वन्यते तेन हर्षातिशयः॥ किंच कुंतलः
कुंतलाः कचाः संत्यस्मिन् संगतत्वेन संकुंतल इति अर्षदिभ्यो व चिकुरः कुंतलो बाल इ
त्यमरः॥ धम्मिल्लोऽपि॥ कुंतलपदं कामिमनोजयकारणत्वं व्यनक्ति माल्यामिषात्॥ पु
ष्पस्रग्व्याजात्॥ मालापदं कामिकृतां द्योतयति॥ आनंदाश्रुपयांसि आनंदो हर्षः शि
रोभूषालिप्सयेति भावः तेन अश्रुपयांसि॥ अश्रुजलानि पयः पदं कामिहृदयमदना
नलोपशमनशीलतामावेदयति॥ मुंचति विसृजति किंच अन्यच्च दृष्टिपदं धनदात
त्वादातत्वविवेकित्वं ध्वनयति॥ एकवचनैकरूपतया सत्यकथकत्वम्॥ धनानामेध
नप्राप्तिं॥ धनपदेन नानाविधत्वं ध्वन्यते॥ कथयितुं ख्यापयितुं॥ अमुना स्वतः प्र
वृत्तत्वं व्यज्यते तेन चांतरंगत्वं समीचीनत्वं च भोऽत्रांतिकं स्तुति निकटं रहस्यकथ ॥५०॥

नं वदः॥३१॥ एवं व्याख्याने कन्यका मुग्धावद्वर्णनीयेति वक्ष्यमाणमूलग्रंथविरोधः ॥८६॥
इति श्रीत्र्यंबकपंडितात्मजानंतपंडितविरचितायां रसमंजरीव्यंग्यार्थकौमुद्यां स
परिकरं परकीयानिरूपणं समाप्तिमगमत्॥ लब्धावसरत्वात्सामान्यवनितां ल
क्षयति॥ वित्तमात्रेति॥ वित्तेतरानुपाधिकत्वे सति वित्तोपाधिकसकलपुरुषविष
यकानुरागवत्त्वमित्यर्थः॥ परकीयाया अपि कदाचिद्वित्तोपाधिकानुरागवत्त्वे त
त्रातिव्याप्तिरतः सत्यंतं॥ ननु तर्हि लग्निमित्रादिन्नपतिसौन्दर्यादिगुणोपाधिका
नुरागभाणिराणवत्स्यादावव्याप्तिरित्याह॥ नन्विति॥ अग्निमित्रेरावतीपरे चारुद
त्तवसंतसेनोपलक्षके॥ अव्याप्तिमेव विवृणोति॥ तत्रेति॥ वित्तमात्रोपाधेरभावा
दिति॥ सौंदर्यादिगुणोपाधेः सत्त्वादिति भावः उत्तरयति एवमित्यादिसापिइराव
त्यपि॥ अपिना चारुदत्तगुणलुब्धायाः वसंतसेनायाः संग्रहः॥ महाराज्ञे अग्निमि
त्रे चारुदत्ते च महर्षौ अदातरीत्यर्थः॥ फलितमाह॥ तेनेत्यादि तेन अदातृत्वानुरागा
॥८६॥ भावविशिष्टमहाराजाग्निमित्राद्यनुरागेण हेतुनेत्यर्थः॥ अवगम्यते अनुमी

॥५१॥ ष्यते विस्तरभयान्नात्र प्रत्येकोदाहरणानि ॥ प्रथमोद्दिष्टत्वादन्यसंभोगदुःखितामुदाहरति
त्वदूतीति ॥ काचिन्नायिका स्वयमेव नायककारणाय प्रेषितां तेनोपभुक्तां दूतीं वक्ति ॥ हे दूति
पदमसत्यभाषित्वमावेदयति ॥ अन्यवेदनानभिज्ञत्वं वा स्वकार्य्यकरणप्रवणत्वं वा ॥ त्वं कुं
जलतापिहितप्रदेशं ॥ अनादिष्टमितिभावः ॥ कुंजपदं विविधोद्दीपनविभाववत्तया मदन
बाधाजनकतां व्यंजयति ॥ निरगाः गतवतीति निरगा इत्यनेन गमने बुद्धिपूर्वकता व्यज्य
ते ॥ गातिस्थेति सिचोलुक् ॥ तु परं पापीयसः निर्दयस्य ॥ पापीयस इति पदं दूतीसंगतियो
ग्यतामावेदयति ॥ एकवचनेन मनादरं व्यंजयति ॥ गरहंसदनमादिष्टमितिभावः ॥ गरहपदं ग
मनयोग्यतां ध्वनयति ॥ द्वितीयास्पृहणीयतां व्यनक्ति ॥ न निरगाः प्रमाणसिद्धार्थप्र
तिपादकं महावाक्यं नालीकमित्याह ॥ अन्यथेति ॥ उक्तवैपरीत्ये तत्वेतिशेषः ॥ तवेतिप
दनुपादानेन देहस्वतंत्रताध्वन्यते ॥ तथा च स्वतंत्रस्य देहस्य किमकार्य्यमिति द्योत्य
ते ॥ न च स्वनायकसंगमशालित्वं देहे पदं संतोषपात्रतां व्यंजयति ॥ किंशुकाभरणं ॥ किं
शुकानां पला पुष्पाणां ॥ आभरणमालेतियावत् ॥ यद्यप्यन्यान्येवाभरणं अलंकारः ॥५१॥

इतरालंकरणोसत्वे तत्वतो नवेत्मिकारणं ॥ किंशुकाभरणं तु स्फुटं प्रत्येमीत्यर्थः ॥ एवं स्फु
टं परिदृश्यमानं ॥ किंशुकाभरणवत्तया कुंजगमनानुमानात् ॥ मया त्वदीयकुंजगम
नं ॥ तत्वतो वसितमतो नाहं प्रतारणीयेतिभावः ॥ किंशुकपदेन आरक्तत्वं कुटिलत्वं च व्य
ज्यते ॥ आभरणपदं सुखजनकतां व्यनक्ति एकवचनं दुर्लभतां ध्वनयति ॥ कथं दृश्य
ते ॥ यद्याइतिदूयते परिशुष्यति सा दूती ॥ न रामं रमणं हे दूति ॥ मत्खेदखिन्नात्वं ॥ तापोपशा
मकं कुंजं गतवती ॥ मत्प्रियतमविरहदुःखेन दुःखितमात्मानं लदपनायकवस्तुलाभे
न सुखयंती ॥ मामपि तत्पाविधां स्वाभिन्नतामिमानेन संभावयंती कुंजे जनसंचारर
हितं प्रदेशविशेषं गतवती परंतु पापीयसो ॥ मद्दुःखदस्य मदे ष्यमनेकुचाउवचन
रचनोकर्त्यास्त वाप्यवगणनाकारिणः ॥ तत्स्वामिकत्वात्तथाविधतदृहं अहंका
रलोवनगतवती तथा च साध्विदं चेष्टितं कृतं एतेनाहमतीव सुखितास्मीत्याकूत
विशेषो व्यज्यते कथमिदं विज्ञातमित्यत्राह ॥ अन्यथादेहे देग्धीतिरेहः ॥ तमिन्नुपचे
यवतीत्यर्थः ॥ रिहउपचयइतिधातोः किंशुकाभरणं कथं दृश्यते ॥ प्रवलतयत्नेनकु

४

॥५२॥ सुमशरस्य अहं परं तुदा अतितप्ता इव रक्ता इमे शरा अपहृत्य समानीता अतो ते कृपि
कुसुमसायककवेदना भविष्यतीति मत्समाधानविधा मयैव स्फुटं ध्रियमाणान्या भर
णरूपातिकिं शुका लिख्यंते इत्यर्थः ॥ तथा च सर्वं मत्प्रियं त्वया संपादितं मत्तस्त्व
त्समानामन्यां दूतीं न पश्यामीत्युपहासो व्यज्यते ॥ अत्र व्याजस्तुतिर्मुखे निंदास्तु
तिर्वा रूढिरन्यथेति ॥ तल्लक्षणं लक्षितं व्याजस्तुतिवक्रोक्त्या पर ॥ स्वेनानुमानं तु
तत्कार्यात्कारणावधारणमिति लक्षणं लक्षितं किंशुककलिंगकं कुंजगमनानुमा
नरूपालंकारेण प्रियोपभुक्तदूतीनखक्षतादिसंभोगलक्ष्यदर्शनेन नायिकायाः
दुःखागमप्रतीतिरूपं वस्तु ध्वन्यते तेन च प्रियदूत्योरपराधप्रकाशनरूपं वस्तु व्य
ज्यते ॥ ननु खंडितैवेयमिति न ततोऽन्यसंभोगदुःखितान्येति चेत्सत्यं प्रियांगसं
गिकामिन्यंतरलक्ष्यदर्शनसंजातखेदवती खंडिता ॥ स्वप्रियसंभोगलक्ष्य व
त्कामिनीदर्शनसंजातदुःखवती अन्यसंभोगदुःखितेति ॥ सामियमव [redacted] स्या
भेदाङ्गिना ॥ अत एव अन्योपभोगचिह्नपतिसंजातपतिदुःखवत्वमेव खंडितालक्ष ॥५२॥

दर्शन

नयोग्यता द्योत्यते ॥ कर्णांतिकमिति पाठे पि तदेव व्यंग्यं ॥ गच्छतीव अत्र तद्दर्शनानंदेन गा ॥५३॥
त्रस्फुरणे सहसैव स्तनसम्पर्के आश्लेषेक्षासाभिलाषप्रकरणाय शिरसि चैलांचलदा
नेकराक्षेपकेणागमस्तिकं पेनवा पुष्पच्युते आनंदाश्रुत्यागोत्प्रेक्षा कर्णविश्रांतने
त्रेनेत्रकटाक्षविलोकनेगायनोत्प्रेक्षा ॥ एवं लुप्तालुप्तयोरुत्प्रेक्षयोः संसृष्टिः तुल्कैव संभा
वनमयोत्प्रेक्षाप्रकृतस्य समेनषदितिसा च वकुधनदात्तत्वस्य तत्रार्थे प्रतिहेतुत्वाद्वाक्या
र्थहेतुककाव्यलिंगानुसंधिना शार्दूलविक्रीडितं वृत्तम् ॥ ३२ ॥ इति व्यंग्यकपंडितात्म
जानंतपंडितविरचितायां रसमंजरीव्यंग्यार्थकौमुद्यां सामान्यवनितानिरूपणम् ॥
एवं तिस्रोऽपि नायिका निरूप्य तासामेव भेदांतरमाह ॥ एता इति ॥ मुग्धादिभेदहीनस्वी
याप्रकीयासामान्या इत्यर्थः ॥ अन्यसंभोगदुःखिता अन्यस्याः परस्याः संभोगः ॥
स्वनायकेन सह रतिप्रसंगः तेन दुःखिता इत्यर्थः ॥ स्वनायकीयनायिकांतरसंभोगज्ञा
नजन्यदुःखवत्वमिति तल्लक्षणं फलितम् ॥ वक्रोक्तिगर्विता इति ॥ वक्रोक्त्या उक्तिवि
॥५३॥ शेषेण गर्विता स्ववर्गे गर्ववत्वमिति फलितं लक्षणं मानवत्यश्च मानलक्षणं चाग्रे व

॥५३॥ ग्गं ममेति भावः ॥ नयनं नेत्रं तदीयमिति भावः ॥ तयोरंतरालं व्यवधायकं ततो भीरुर्भयशीलः भूष
णमपि मद्विलोकनांतरायं मन्वान इत्यर्थः ॥ यद्वा तनु स्वल्पमपि नयनान्तरालं दर्शनव्यवधा
यकं यत्किंचित्तत्र भीरु तदहमान इत्यर्थः ॥ तनुपदं कमनीयतां ध्वनयति ॥ नयनपदं दर्शनला
लसतां व्यंजयति ॥ भीरुपदं अत्यंतासक्तिं व्यनक्ति ॥ कांतः प्रियः कांतपदेन कमनीयता व्यज्य
ते मे वपुषि विभूषणानि अलंकरणानि ॥ बहुवचनं नानालंकारकरणसमर्थतां कान्तस्या
भिद्योतयति ॥ न कलयति धारयति ॥ अत्रोक्तरीत्या यथा मयि प्रेम न तथा त्वयीति त्वत्तोऽहं
धन्यतमेवेति स्वाधिक्यख्यापनात् ॥ व्यतिरेकालंकारः ॥ उपमानाद्यदन्यस्य व्यतिरेकः स
एव स इति ● तल्लक्षणात् ॥ पुष्पिताग्राछंदः संति मम भूषणानि न तवेत्ति वादिनीं ब्रू चिद्वक्ती
ति वा ॥ ३४ ॥ द्वितीयामुदाहरति कलयतीति ॥ काचित्सखीं वक्ति ॥ हे सखि कांते ॥ प्रियस
कांतपदं तिरस्काराद्योग्यतां व्यंजयति ॥ अक्ष्णोर्नेत्रयोः ममेति भावः कमलोपमानं
कमलसाम्यं कमलपदं सरसतां दीर्घतां च ध्वनयति ॥ कलयति विचारयति ॥ एवं चैतादृश
विचारमात्रकारिण्येतादृशकोपकरणं किं पुनस्तथा वचनादाविति व्यज्यते कमलस्य निरु ॥५३॥

पमानयोर्मल्लयनयोरुपमानत्वेन नयनापेक्षया कमलस्य प्रसिद्धत्वं गुणोत्कर्षशालित्वं वाग
तमिति ॥ कथमयुक्तमनेन विभाव्यत इति क्लेशादात्त्वं व्यज्यते तेन च सापराधत्वं तेनापि च
दंडार्हत्वं ॥ तथा वा विसुधारसस्याम्रतन्दवस्य ॥ रसपदं मधुरिमातिशयं व्यंजयति सा
म्यं तुल्यत्वं प्रथयति प्रख्यापयति सतीत्यर्थः ॥ अत्रापि पूर्ववदेव व्यंग्यं ॥ के ते वराके मन्नयन
वचनयोरुपमानत्वं लप्स्येते विपरीतं तु युक्तमिति भावः ॥ उक्तं च गुणोत्कर्षप्रसिद्ध्ययुप
मानेन तदुच्यते ॥ तन्न्यूनमुपमेयं स्यादेतयोस्तुल्यतेग्रमेति ॥ एवमपकर्षापादनकारिणि किं
मा चरामि ॥ किं प्रति संधेयं विचारयामि तत्कथय ॥ उपदिश ॥ आस्तां वा तावदेषा विचारका
रिण्यपि कांते सहि स्मुते वतदीयतादृशविचारसहनशीलत्वमेव दोषः ॥ स ईत्रगुणरूपाया
अप्येतस्या अत्रदोषत्वमिति चित्रे दोषपदं भ्रोतिजनकतां गमयति ॥ समज्जनि संजातः ॥ उ
पसर्गेण विशेषदर्शनानिवर्त्यत्वं व्यज्यते ॥ पुष्पिताग्राछंदः ॥ ३५ ॥ मानवतीं लक्षयितुमाह ॥ मा
नवतीत्यादि ॥ प्रिया पराधसूचकचेष्टागम्यकोपवत्वं तद्वत्वमेव बालक्षणं ॥ तस्यत्रे विध्या
त्तस्या अपि त्रे विध्यमित्याह ॥ स्वेति क्रमेण तल्लक्षणान्याह ॥ अल्पापनेयइत्यादि ॥ कष्टत

॥५४॥ रइत्यादिति द्वयर्थः॥ द्विवचनविभज्येतितरप्॥ कष्टतम इति॥ बहुत्वे अतिशायने तमबिष्ठनाविति
तमप्॥ उक्तंच सप्रायशो भवेत्क्रोधा कामिनीनां प्रियंप्रति॥ अवेक्ष्य दोषमेतस्य गरीयान्मध्य
मो गुरुरिति॥ नतसाध्व्योप्येकस्तिष्ठति सनोत्कट इत्यतोन्यमतत्वमत आह॥ असाध्व इति॥ स
अलीकएवेति भावः॥ तत्कारणमाह॥ अपरस्त्रीत्यादि॥ गोत्रस्खलनमिति सपत्नीनाम्नो
च्चारणमित्यर्थः॥ तस्यापनोदकमाह॥ अन्यथासिद्धेति॥ प्रकारांतरसिद्धं यत्कुत्रहलं ते
नापनोदइत्यर्थः॥ अन्यथावादइति॥ अपलापोक्तिरित्यर्थः॥ तत्राद्यवतीमुदाहरति॥ स्वे
दांबुभिरिति॥ काचित्प्रियतमसखीं नायिकां प्रति वक्ति॥ हेशातोदरि कृशोदरि॥ शातोदरी
तिसंबुद्धिपदेपापाशानसुंदरमध्येपिमानस्यावस्थानं नास्तीति व्यंजयति॥ प्रियेप्राणेश्वरे
प्रियपदं तत्कृतापराधगणनाकरणेपि स्नेहं ध्वनयति॥ अन्यांपरां॥ अन्यपदमगणनीयत्वं
व्यनक्ति विलोकयतिमत्यपि विलोकनकारिणि अलंकरणकारिण्यपि नकेवलं विलो
कनकारित्वमात्रमपितु अलंकरणकारित्वमितिमहदपराधकारणं तद्दत्वे पीत्यपिशब्दा
र्थः॥ सतीतिशेषः॥ अंगभूमौशरीरदेशे अंगपदं स्वल्पत्वंद्योतयति॥ एकवचनं चतदतिशयं ॥५४॥

क्षणंवक्ष्यतीति ग्रंथकृदितिप्रांचः॥ इदं च स्वीयादित्रितयसाधारणमुदाहरणम्॥ एवमग्रेऽपिबो
ध्यम्॥ अनुष्टुप्वृत्तं॥ उद्दिष्टक्रमाद्वक्रोक्तिगर्विताविभागमाह॥ प्रेम्णेत्यादि॥ प्रियतमनिरूपि
तस्वगतप्रीत्यतिशयगर्वव्यंजकवक्रोक्तिरचनानिपुणात्वं प्रेमगर्वितात्वं तथा स्वगतसौ
दर्यरूपगर्वप्रयुक्तवक्रोक्तिरचनानिपुणात्वं सौन्दर्यगर्विताल्वम्॥ तत्र प्रथमोद्दिष्टत्वा
त्प्रथमामुदाहरति॥ वपुषीति॥ काचिद्भंग्यंतरेण स्वगतप्रियतमप्रीत्यतिशयमाविष्कर्तुं
सखीं प्रत्याह॥ हे सखि प्रभुः भर्ता प्रभुपदं समर्थतां व्यंजयति॥ साच यथा वकुलतयाऽलं
करणादिकं गेहे स्थापनीयं तथा तव देहे स्थापितमतोनतोषातिशय इति प्रियतमानादरं ध्व
नयति॥ यद्वा प्रभुपदं स्वतंत्रत्वं व्यनक्ति तरपितुराराध्यत्वं कार्यकालीनप्रेमकारित्वं वा॥ तव
वपुषि अंगे पुरटभूषां रत्नसुकमलं कालं तनोति विस्तारयति॥ यद्धि स्वतो नशोभते तेन
स्यैवभूषाकरणं सुकुमसुकुमन्यस्येति भावः॥ इति हेतोः त्वं धन्यतमासि॥ अन्याः स्त्रियो धन्याः
भूषाधारिविरहात्॥ त्वं त्वतिशयितधन्या इति किं ब्रवीमीति॥ सोल्लुंठं॥ यद्वा धन्यतमासीति किं
कुत्सितं ब्रवीमि तस्मात् धन्यतमासीत्यर्थः॥ एतदेवाह॥ सखि तनुनयनांतरालभीरुः॥ तनुरं

॥५५॥ मोच्चारणं मया कृतमिति भावः ॥ गोत्रं नाम्नि कुले गोत्रं गोत्रस्तु धरणीधर इति विश्वः ॥ तत्र तस्मिन्वि
षये ॥ अथ च यद्गोत्रस्खलनं तत्पर्वतस्खलनमेव अत एव भ्रमजन्यत्वं ॥ एवं च यथा वृद्धिपुरस्स
रं नं कस्यापि पर्वतस्खलनं मि तथेदमिति भावः ॥ एवं चाकस्मिकेतादृ[illegible]कार्य्येण स्वस्मि
न्विगतजीवप्रापकत्वं व्यज्यते ॥ भ्रमो यद्भिन्नमन्यते यन्नामयानामोच्चारणं भ्रकृतं तत्त्वद्दीयना
म भ्रांत्या न तु त्वत्पत्न्या इति भ्रमेणेत्यर्थः ॥ इदं च मद्वचनमसत्यं मन्यसे चेत्तर्हि रोमालि
व्यालिसंस्पर्शं ॥ रोमालिः रोमश्रेणिः सैव व्यालः सर्पः तस्य संस्पर्शरूपं शपथं दिव्यं ॥ तत्र
विप्रतिपन्नेऽर्थे कारय ॥ रोमावलिपदं श्यामत्वं व्यंजयति ॥ तत्त्वच्चित्तातिरस्थं तदपि दुः
स्पर्शनीयत्वम् ॥ व्यालपदं साहजिकक्रूरत्वं ध्वनयति ॥ समित्युपसर्गो मणिमंत्रादिकृपटविर
हं गमयति ॥ शपथपदं सर्वपरिहारमौलिभूतत्वं व्यनक्ति ॥ कारयेति पदमभिशापे
स्वत एव तन्निवारणकरणे चित्तस्यापि पराधीनतामाविष्यति ॥ सा च मत्कृतनामोच्चारण
स्य न सपत्नीविषयकत्वं मंतव्यमिति रोमा[illegible]लिव्यालिसंस्पर्शमिति पाठे रोमालिरूपा
या व्याली ॥ धायोः संतानं दसो[illegible]र्वकुलमिति कस्वता तस्याः स्पर्शः एवं च स्त्रीत्वेन त्व ॥५५॥

॥५६॥

त्सजातीयतया त्वत्स्पर्शपातकारित्वेऽपि स्पर्शोन्मुखत्वेन त्वस्यातिशुद्धत्वं व्यज्यते ॥ इति कश्चित्
[illegible]लिंगसो गोपिचंदनमित्याहिवत् संज्ञाभावात् ॥ अत्र शपथप्रापनेपत्वं स्फुटमेव ॥ अनु
ष्टुब्वृत्तम् ॥ ३७ ॥ अपराङ्गनासंगजन्यमानवती मुदाहरति ॥ दयितस्येति ॥ दयितस्य कांत
स्य ॥ दयितपदं तत्कृतापराधस्य दुःखातिशयजनकत्वं व्यंजयति ॥ भालदेशं ललाटपट्टं
भालपदं उत्तमत्वमावेदयति ॥ सा चात्यन्तमदसंघटनेन तद्धातिशोभामाणं ॥ सपत्न्याः सप
त्नीपदं ॥ स्वाभाविकेर्ष्याकत्वं द्योतयति ॥ चरणे लक्तकपिंगलं ॥ पदसंबंधिलाक्षारस
बभ्रुवर्णं पिंगपिशंगौ कवभ्रू पिंगलमित्यमरः ॥ उत्तानकरणेन चरणसंपर्कादिति भा
वः ॥ पिंजरमिति पाठस्त्वलक्तकस्य पीतत्वादसंभवादपपाठः ॥ वाजिभेदे पीते पिंजर इ
ति विश्वात् ॥ यद्वा बभ्रु पिंगलमित्यस्य प्रसंगे पिंजरोऽपीति क्षीरस्वामिमुक्तत्वादुक्तपाठे
साधुत्वं ज्ञेयम् ॥ निरीक्ष्य सम्यगवलोक्य ॥ सुदृशो नायिकायाः स्मृतिमुक्ताः कर्णपा
न्त्यपेरितास्त्वर्थः ॥ कोपेन वक्रविलोकनादिति भावः ॥ नयनस्य नेत्रस्य प्रियं प्रतिप्रेरि
॥५६॥ तस्येति भावः ॥ कोणाभासः प्रांतदीप्तयः ॥ कटाक्षदीप्तय इति यावत् ॥ तिर्यक् विलोकने

॥५६॥ एकस्यैवप्राधान्येनप्रेक्ष्यसंबंधान्नयनस्येत्येकत्वम्॥शिखरोपमाः शिखरेणपद्मरागेणशिखर
रःपद्मरागःस्यादितिविश्वेजयन्त्यौ॥तन्वीश्यामाशिखरदशनेतिमेघदूतप्रयोगः॥कठिनीभ
ताशयेशिखरइतीतिगोवर्द्धनाचार्य्योपिशिखरंदाडिमीबीजमित्यपिकश्चित्॥उपमीयेते
आरक्तत्वादितिभावः॥तथावभ्रवुःसंपन्नाः॥कोपेनेतिभावः॥कोणभासेतिपाठेआरक्तकटा
क्षदीप्त्याश्रुतिमुक्ताःनायिकाकर्णसंबंधिमुक्ताफलानि॥यद्वाश्रवणभूषणायोग्यमुक्ताफ
लानि॥अर्थान्नायकेनस्वापराधक्षमापनायआनीतानिपद्मरागतुल्यानिजातानीत्यर्थः
एवंचभूषणदानाद्यपनोद्यत्वंद्योत्यते॥यद्वाश्रुतिमुक्ताअर्थात्परवनितानायककर्णाभर
णरूपाः॥कुपितकामिनीनयनदीप्त्यारक्ताजाइत्यर्थः॥एवंचचरणपतनाद्यपनोद्यत्वं
ध्वन्यते॥यत्तुशिखरेणगिरिशृंगेणउपमीयंतेश्यामत्वादितिभावइत्याहुस्तत्कुपित
कामिनीनयनदीप्तेःश्यामत्ववर्णनानौचित्येनानुचितमाभाति॥अत्रतादृशव्यापनरू
पवस्तुनानायिकायाःसागसिप्रियसिकोलिव्यक्तिरूपंवस्तुध्वन्यते॥३४॥प्रसंगौदेता
सांभेदान्तराणिनिरूपयितुमाह॥एताइति॥षोडशेति॥मध्याप्रगल्भयोःप्रत्येकंधीरादि ॥५६॥

कचनकापिप्रदेशाइत्यर्थः॥किमःसप्तम्यांतासिमेतिकेतिक्वादेशः॥सप्तम्यर्थेऽव्ययमेतत्
स्वेदांबुभिः॥स्वेदोदविंदुभिः॥बहुवचनंपिच्छलतातिशयंगमयति॥पिच्छलंपंकिलंपिच्छान्य
स्यसंतीत्यर्थेलोमादित्वाल्लचपिच्छलपदेनपदावस्थानानर्हत्वंध्वन्यते॥तथाक्वचन
कापिप्रदेशोत्कंटकितंसंजातकंटकंप्रियपदस्पर्शवशमात्रसंजातप्रमोदोदयेनेत्युभयत्रभा
वः॥तदस्यसंजातमितिइतच॥कंटकितपदेनपददानानर्हत्वंव्यज्यते॥चकास्तिशोभते
रम्याणांविकृतिरपिश्रियंतनोतीतिभावः॥विवक्षितेवक्ति॥तवमानःअभिमानःक्वकस्मिन्
प्रदेशेपदंअंघ्रिंदास्यति॥तत्स्थानंनविद्मःनजानीमः॥सागस्यपिप्रेयस्यनुरागेणस्वैरा
दिभिव्याप्तत्वांगेमानस्पदमपिदातुंनपश्यामिस्खलनमित्यर्थः॥एकत्वपिच्छलत्वादपरत्र
कंटकितत्वादितिभावः॥अत्रान्यथासिद्धकुतूहलताद्यपनेयत्वंस्फुटं॥वसंततिलका
वृत्तम्॥३५॥उद्देशक्रमाज्ञोत्रस्खलनजन्यमानवतीमुदाहरति॥यज्ञोत्रमिति॥कोपिस्व
कृतगोत्रस्खलनेनकुपितांप्रियतमांशांतयितुंवक्ति॥कांतेइतिसंबुद्धिरध्याहर्तव्यातदनु
पादानंचस्वकृतापराधतयासंभ्रमातिशयमेवेदयति॥यज्ञोत्र स्खलनंवत्सपत्नीना

॥५७॥ नैते भेदा नायकानां तथा नायिकानां जात्यादिभेदनिबंधनभेदवत्त्वं ॥ वस्तुतस्तु वात्स्याय
नादिभिर्जात्यादिनापि भेदस्वीकारात् तद्भेदाद्भेदो युक्त एव तासां अनंत्यं च व्यक्त्यानंत्यत्वा
द्बोध्यं ॥ यच्च नायकानामपि खण्डितत्वादिकं स्यादित्युक्तं ॥ तत्त्वानौचित्याद्रसभंगाप
त्त्या परास्तं प्राचामनुपन्यासस्तु न दिव्यादिभेदाभावसाधकः ॥ अप्रयोजकत्वात् ॥ अत
एव जातिकालेस्मादिग्रागभ्यधायि ॥ ननु मुग्धायाः प्रज्ञाविशेषाभावाद्यथा धीरादिभेद
भावस्तथाष्टविधाऽवस्थाभावोपीत्याह ॥ यद्यपीति ॥ धीरादीति आदिपदेन मानवत्त्वान्त
र्संग्रहः ॥ उत्तरयति तथापीति ॥ प्राचीनलिखनानुरोधेनेति ॥ वस्तुनिर्युक्तिकत्वादयुक्त
मिति भावः ॥ तत्र प्रथमं प्रोषितभर्तृकां लक्षयति ॥ देशांतरगतेति ॥ देशांतर
गतप्रियविरहसंतापवत्त्वमित्यर्थः ॥ दशा वक्ष्यमाणा इति तास्त्वग्रे वक्ष्यति ॥ तत्र मुग्धां प्रोषि
तभर्तृकामुदाहरति ॥ दुःखमिति ॥ काचित्कांचित्प्रत्याह ॥ अंबुजमुखी कमलमुखी ॥ अंबु
जपति ॥ तच्च विरहगोपनं ॥ दीर्घतरं प्रियतरगमनमारभ्य तत्क्षणावधि ॥ दीर्घतरपदं अ
तुल्यं घनीयत्वं ध्वनयति ॥ तच्च दुःसहत्वं दुःखं विरहजमित्यर्थः वहंत्यपि ॥ वहतीति पदं ॥ ॥५७॥

कठिनहृदयता मशक्यप्रतीकारतां च व्यनक्ति ॥ परं तु सखीवर्गाय सखीसमूहाय ॥ सखीपदं
दुःखकथनार्हतां द्योतयति ॥ वर्गपदं दुःखनिवारणसमर्थतां गमयति नो भाषते ॥ नो वक्ति ॥ ए
वं च स्वसर्वरहस्यकथनार्हस्य स्वसखीनिवहस्यापि न निवेदयति ॥ दुःखं किं पुनरन्यस्येति ल
ज्जाविशेषवत्त्वं ध्वन्यते तेन मुग्धात्वं ॥ किंच शैवालैः जलनील्यादिभिः शैवालपदं तापापनो
दकतां व्यनक्ति शयने आस्तरणे शयनपदं निविडतां गमयति ॥ स्रजंत्यपि स्रजंतीत्यनेन त्वक
रणे आदरातिशयो व्यज्यते ॥ पुनः किंतु न शेते न निद्राति ॥ किंच कंठे कंठपदेन दुःखपराक्रम
नाजाड्यमभिव्यज्यते ॥ गद्गदवाचं स्खलितां गिरं सबाष्पत्वादिति भावः ॥ अंचति दधाति
एवं च वाचि अस्फुटत्वमभिव्यज्यते ॥ परं तु दृशा दृष्ट्या एकवचनेन विविधविलोकनाभावेन
चिंतातिशयो ध्वन्यते ॥ बाष्पोदकं अश्रुजलं तु दकपदेन स्थगनानर्हत्वं व्यज्यते ॥ न धत्ते न
दधाति ॥ एवं च स्थगनानर्हस्यापि स्थगनेनातिलज्जात्वं द्योत्यते ॥ एवं विरहतापकबाह्य
चेष्टागोपनकारिणीयं येन प्रकारेण संतापं विरहदाहं सहते तत्प्रकारं चेतोभवः मद
नः वेद जानाति नत्वन्य इति भावः ॥ सहत इति पदेन दुःसहत्वं गम्यते ॥ चेतोभवपदेन हृदयसं

॥५८॥ निहितत्वं तेन वसहन प्रकारस्तानवत्वमावेद्यते॥ विशेषोक्तिरलंकारः॥ लक्षणं तत्कंशाईलविक्रीडितं वृ
त्तं ३९॥ मध्याधीरास्येष्टप्रोषितभर्तृकामुदाहरति॥ वासइति॥ काचित्सखी नायिकां वक्ति हे स
खि वपुषो देहस्य वासः वसनं तरैव॥ पूर्वपरिगृहीतमेव॥ वासःपदमल्पभारत्वमावेदयति॥ एवं
च सार्वकालिकदेहवसनसंगात् खेदवत्ता असंभवनीति ध्वन्यते॥ एवमग्रेपि॥ तथा हस्तस्य
करस्य वलयं कंकणं तदेव वलयपदं खेदाजनकत्वं व्यनक्ति॥ तथा जघनस्य नितंबस्य सैव पू
र्वपरिगृहीतैव रत्नकांचीमणिगणराजिरंजिता रसना॥ यान्यैव पूर्वपरिगृहीतवती वसना
द्विनि तान्येवैतानि संप्रतिदधासीत्यर्थः॥ वाचालभृंगसुभगो वाचालाः कुत्सितबहुभाषि
णः॥ आलजाटजौ बहुभाषिणीति कुत्सार्थ आलच्॥ कुत्सितत्वं विरोधिविषयकत्वेनासह्य
त्वेन वा॥ येभृंगाः भ्रमरास्तैः सुभगो गीतकीर्त्तौ वाचालपदं निंद्यत्वमावेदयति॥ तच्च तदु
नस्याश्रयणीयत्वं भृंगपदं मदनोद्दीपकत्वं व्यनक्ति॥ सुभगपदं सामर्थ्यविशेषमभिव्यंज
यति॥ तच्चास्य निर्वार्यत्वं सुरभौ पुष्पसमये वसंते॥ पुष्पसमयः सुरभिरित्यमरः॥ सुरभिप
दं मुन्मादकत्वं द्योतयति॥ अद्य इदानीमेव समस्तं वसनादिकं ते तव अधिकं असह्यं भवति॥ ॥५८॥

भेदानां ज्येष्ठाकनिष्ठत्वेन द्वैविध्ये द्वादश मुग्धा एकैवेति मिलित्वा त्रयोदशभेदवती स्वीया द्विवि
धा च॥ सामान्यवनितात्वेकविधेति षोडशेत्यर्थः॥ अयमेवार्थो मल्लरुत्ताग्रे॥ मुग्धा याल्लज्जा
प्राधान्येनेत्यादिग्रंथेनाभिहितः॥ अवस्थाभेदमेवाह॥ प्रोषितेत्यादि॥ तासामिति पूर्वपरिगृ
हीतानामित्यर्थः॥ चतुरधिकाशीतियुतमिति परिगणनमेतत्॥ नाधिक्यप्रवच्छेदकं॥ जाति
कालवयोवस्थाभावकंदर्पसायकैः इतरा अप्यसंख्याता नोक्ता विस्तरभीतितः इति प्राचो
क्तेरन्येपि भेदा अध्यवसेयाः॥ कस्यचिन्मतं दूषयितुमनुवदति यत्त्विति॥ एतासामनंत
रपरिसंख्याततानां दिव्यात्वं तद्देशीयत्वमुपाधिरूपं सामान्ये हेतुमाह॥ अवस्थाभेदेनै
वेति कालिकविशेषणैवेत्यर्थः॥ विशेषः कालिकोवस्थाइत्यमरः॥ एवकारेण जात्यादि
भेदैकव्युदासः हेत्वसिद्धिपरिहारायाह॥ जातिरित्युपलक्षकं देशादीनां तत्रैवोप्यसंभवं
तरमाह॥ तथेति॥ अन्यदपीत्यर्थः॥ अयं भावः जात्यादिभेदेन भेदे नायिकानन्त्यं स्यात्
प्यानायकेषपि दिव्यादिव्यादिभेदसंभवादानंत्यं स्यादेवं दिव्यादिभेदवत्॥ खण्डितत्वा
दिकमपि नायिकानां स्यात्॥ मुक्तेस्तुल्यं स्यात्॥ तस्माद्यथा प्राचीनैरनुदाहृतत्वात्॥

॥५९॥ परस्याः न्यस्तस्नेहादित्यर्थः॥ एवं चैतस्या पि नायकस्य विदेशगमने आवश्यकवसनादिधारण
लसतया स्वस्य दुःखप्रकाशत्वेन धीरात्वं ध्वन्यते॥ एवं चोदाहरणसंगतिरप्युत्स्न्हा॥ अत वस्तु
विशिष्टमेदमात्रमभिधाय ग्रंथगौरवभयादन्योदाहरणान्युत्सृज्य सामान्यतो मुग्धामध्या
प्रगल्भापरकीयासामान्यवनितानामुदाहरणोपन्यास इति वदंति॥ अत्र नर्मस्फोटालं
कारः॥ वसंततिलका वृत्तम्॥ ४०॥ प्रौढाधीरां ज्येष्ठां प्रोषितभर्तृकामुदाहरति॥ मालामि
ति॥ काचिन्नायिका वृत्तं कोविदस्त्याह॥ सुभ्रु वः नायिकायाः॥ बालांबुजमयी॥ बालानि दल
नवोदितानि यान्यंबुजानि कमलानि तेषां दलानि पत्राणि प्राचुर्येण तायस्यां॥ तत्प्रकृ
तिवचन इति मयट्॥ माला दाम॥ बालपदं प्रकृतिभीरुत्वं तत्त्व स्वाश्रयसुतनुतनुताप
दर्शनिसमनमयमेव॥ प्रस्थानार्हतां व्यंजयति॥ यद्वा बालपदं कोमलत्वं तत्त्व सुतनु तत
नुतापशोषार्हत्वं ध्वनयति॥ अंबुजपदं जलजन्यतया तापोपशमनसामर्थ्येऽपि तज्जी
तितः प्रस्थानकरणे सुतनुतनुसंतापातिशयं व्यनक्ति॥ दलपदं सूक्ष्मतां सा च ईषत्सुत
नुसंतापश्वासप्रोत्सारणार्हतां गमयति॥ किंच मौक्तिकी मुक्तासंबंधिनी हारयष्टिः हा ॥५९॥

रलता॥ मौक्तिकीति पदेन शीतलस्वभावत्वं तद्धत्वेपि असह्यमानत्वेन विरहातिशयो व्य ॥६०॥
ज्यते॥ हारपदेन वक्षोजसंगशालित्वं तत्त्वेऽपि स्तनगेनौचित्येपि तत्करणेन विरहाति
शयो व्यज्यते॥ यद्वा भीरुत्वं तेन प्रस्थाने नौचित्यं प्रभवति पत्यौ॥ एवं चैतद्गमनस्यानि
वारणीयत्वमभिव्यज्यते॥ हरी रुक्मे॥ हरिपदं दुःखपरिहारकत्वं तद्व्रतगमनेत्तरं
न५ मालादिप्रस्थानेऽपि चित्यं गमयति यातेगते सति प्रस्थिते वत्स्मिन्गते स्वाश्रयसुत
नुतनुनाशोऽवश्यं भावीति मालादिभिरपि प्रस्थानं कृतमिति भावः॥ विरहदाहे कोम
लसंबंधे ज्वालाजाले मेवस्यादिति मालात्यागः॥ अनुक्षणक्षीयमाणांगतया भा
रवहनासमर्थत्वेन हारादित्यागः॥ अन्यत्॥ आश्चर्यं किं ब्रूमः बाहोः वलयं हस्तसं
बंधिकंकणं॥ धमन्यपि नाड्यपि नाडी तु धमनी शिरेत्यमरः॥ वर्त्तते तिष्ठति वा न वे
ति ज्ञातुमिव॥ अहह रे वेदे पाणिमूले हस्तमूलं प्रयाति गच्छति॥ बाहोरिति शब्दः॥
स्वाश्रयबाहुसंबंधि शिरागवेषणस्यौचित्यं ध्वन्यते॥ अपि ना बहिरंगमालादिगम
॥६०॥ नस्यानिर्गीततत्त्वेऽपि अंतरंगतया शिराया अपि किं वर्त्तमानतास्ति न वेति गवेष

॥६०॥ णस्याविश्यकत्वं ध्वन्यते ॥ अन्योपि कश्चिद्धिकश्चिद्धिकलस्य प्राणप्रयाणसमये शिरागवे
षणंकुरुते इति लौकिकम् ॥ अथ च प्रभवति समर्थे ॥ एवं चापराङ्गनादर्शनादिकरणनिवा
रणानर्हत्वं व्यज्यते ॥ एवं चैतादृशोक्त्या व्यंग्यकोपप्रकाशत्वेन धीरात्वं ध्वन्यते ॥ हृदिपदे
न हरति स्नेहाधिक्येन मनः इति व्युत्पत्त्या स्नेहाधिक्यप्रतिपादनात् ज्येष्ठात्वं द्यो
त्यते ॥ प्रोषितपतिकात्वं च स्फुटमेव ॥ एवमेवाग्रेप्युदाहरणसंगतिरूह्या ॥ अत्र प्राग
ल्भ्यं स्फुटमेव ॥ अत्रास्फुटस्फुटयोरुत्प्रेक्षयोः संसृष्टिः ॥४१॥ परकीयां प्रोषितभर्तृ
कामुदाहरति ॥ श्वश्रूरिति ॥ काचिन्नायिका वर्त्तकांचित्प्रत्याह ॥ श्वश्रूर्भर्त्तुर्माता
यत्यप्रदलं ददाति कौतुकेनेति भावः ॥ तदपि तया नायिकयाल्पसंज्ञया मंगलसू
चनेनैव गृह्यते ॥ परं तु पाणिना करेण सर्वत्रकाले मर्मरशंकया मर्मरः शुष्कप
र्णध्वनिः ॥ सोस्यास्मिन्निति शुष्कमित्यर्थः ॥ तत्संशयेन अर्श आदित्वादचनेन च सं
स्पृश्यते ॥ श्वश्रूपदमनुलंघनीयाज्ञत्वं व्यंजयति ॥ पद्मपदं कोमलतां ध्वनयति
ददातीत्यनेन वृद्धिपूर्वकत्वं दानस्य च व्यज्यते ॥ तदपीत्यनेनानुलंघनीयाज्ञश्वश्रू ॥६०॥

तत्र किं निदानं कारणं न तत्कथयेत्यर्थः ॥ एवं चैतादृशोत्सवसमये सुखवत्तया भवितव्यं तदभा
वे प्रस्तुत दुःखवत्त्वे किं बीजं तन्न विद्म इति भावः ॥ तवनममतेनास्मदादिवैलक्षण्यमवश्यं स
हेतुकमेवेति व्यज्यते ॥ समस्तपदेन एकमपि न सुखजनकमिति व्यज्यते ॥ तेन तत्कारणगवे
षणावश्यकत्वं ॥ अधिकपदं दुःपरिहरणीयत्वं व्यंजयति तत्त्वबलज्ञात्वं व्यंजयति तत्त्वबलज्ञा
वत्त्वं किं निदानमिति च स्वतोऽकथनात् अस्मत्करणेन तद्वत्त्वमेव बोधयति निखिलेन च वसंत
समयास्त्रवैलज्ञावशाद्विरहगोपनाय वसनादिधारणं कृतवती प्राप्ते तु विस्मयमशरोद्दीपन
कारिणि विविधकुसुमसमूहसौरभ्यलुब्धमधुकरसंचारिणि विरहिजनधैर्यवैधुर्य ग
कारिणि ॥ चिरन्तहारिणि वसंते मदनमहीपतिबाधानिवारणाशक्यतया चिरपरित्तमपि
वसनादि विषमविषमिवासहमाना संजातेति लज्जामदनसाम्यमभिव्यज्यते ॥ अथ च वस
सुरभौ सद्यः सुगंधशालिनि नायके वाचालभृंगसुभगे वाचालस्य सपत्नीजनस्य ॥ ए
वं च वचनरचनाविशेषेण नायकस्वाधीनताकरणसामर्थ्यं व्यज्यते ॥ ये भृंगाः कटाक्षाः
तैः सुभगे विख्यातविभवे ॥ अथवा देशांतरं गते सति ॥ अथ च सर्ववसनादिकं ते इति तवना

॥६१॥ वस्या अभिधानेन तथा च चमत्कारसमावह इति ॥ ४२ ॥ सामान्यवनितां प्रोषितभर्तृकामुदाहरति ॥ विर
हविदितमिति ॥ काचित्कांचित्सखीं प्रति वक्ति ॥ विरहविदितं विरहेण वियोगेन विदितं ज्ञातं अं तः प्रेम अ
तः मनसि प्रेमप्रीतिः ॥ तां ममेति भावः ॥ विज्ञाय मदीयमेवं विरहवती तर्हि मय्यतीवप्रीतिमतीति
स्वविषयकं मत्प्रेम ज्ञात्वेत्यर्थः ॥ कान्तः कामी तस्माद्देशान्तरात् ॥ एत्य आगत्य पुनरपि पूर्ववत्तुर
तमेवेति भावः ॥ वसुद्रव्यं दास्यति वितरिष्यतीति हेतोरित्यर्थः ॥ यद्यपि परकीयं विरहस्या स्य
प्ययोग्यतया न प्रत्यक्षता ॥ तथापि अश्रुपातादिना ऽनुमेयता ॥ तस्य लिंगज्ञानत्वेनैव का
रणत्वात् ॥ द्वारदेशे प्रतीहारप्रदेशे ॥ उपविष्टा निविष्टा ॥ एवं च वकुभिरिदं दृष्टेत स्मैकथ्यन
कथयिष्यतीति धियेति भावः ॥ एवं च वंचनानिपुणत्वं व्यज्यते ॥ पुरस्यो विहेष्यापुरस्यो वि
त्यदेनवास्तवैकनिष्ठे मत्प्रेमण्यत्वं ध्वन्यते ॥ अक्ष्णोः नेत्रयोः मरिचनिचयं मरिचसमूहं नि
क्षिप्य वाष्पोदबिंदून् ॥ अश्रुजलबिंदून् विसृजति प्रकटयति ॥ मरिचानां कटुत्वाद्वाष्पो
त्पादकत्वमिति भावः ॥ बिंदूनिति बहुवचनं विरहातिशयप्रदर्शनकारित्वं व्यंजयति
काव्यलिंगानुप्राणितो ऽपह्नुतिरलंकारः ॥ मालिनीवृत्तम् ॥ ४३ ॥ अवसरप्राप्तां खंडितां ॥६१॥

लक्षयति ॥ अन्योपभोगेति ॥ नन्वन्यकालीनत्तथाविधपतिकत्वे खण्डितात्वं न स्यात्तथा चाव्याप्तिर
त आह ॥ प्रातरित्युपलक्षकमिति ॥ अन्यकालस्येत्यादि ॥ पतिरित्युपलक्षकत्वमुपपद्यते
एवं चान्यांगनोपभोगचिह्नितप्रत्युपपत्यन्यान्यकत्वे लक्षणं परांगनासंगजन्यमानवत्याः
खण्डितामानाश्च विभेदः कथमिति विभावनीयम् ॥ तल्लक्षणज्ञानाय तस्याश्चेष्टामाह ॥ अस्या
इत्यादि ॥ अस्फुटालापः ॥ कोपबाष्परुद्धकंठतया गद्गदवचनं तद्दोषगवेषणे चित्तैका
ग्र्यं ॥ इतरत्स्पष्टं ॥ तत्र मुग्धां खण्डितामुदाहरति ॥ वक्षइति काचित्काञ्चित्सखीं प्रत्याह ॥ वक्षः उर
स्थलं ॥ कलशांकितं घटचिह्नितं किमु वितर्कयामीत्यर्थः ॥ मुग्धात्वात् ॥ वास्तवान्यना
यिकाकुचाभोगचिह्नाज्ञानात् ॥ पद्भुतरतिसर्वेक्तिरीत्या किमपि किंचित्वक्तुं प्रश्नं कर्तुं
इच्छन्त्याः ॥ लज्जावत्वादिति भावः ॥ एवं चास्फुटालापो ऽभिव्यज्यते ॥ नवोढसुदृशः नवो
ढांगनायाः नयनं नेत्रं एकवचनं चिह्नविलोकनाशक्तैकरूपतां व्यंजयति ॥ प्राणेशः
भर्त्ता प्राणेशपदं तथाविधप्रेमाभावं द्योतयति यद्वा अनिवारणीयत्वं ॥ पाणिना हस्ते
न पिदधे ॥ आच्छादयति स्म ॥ उपगीतिछन्दः ॥ लक्षणं तु रूपम् ॥ ४५ ॥ मध्यां खण्डितामुदाह

॥६२॥ रति॥ वक्षोजचिह्नितमिति॥ काचिन्नायिका वृत्तं कांचित्सखीं प्रत्याह॥ दयितस्य प्रियतमस्य वक्षो
जचिह्नितं॥ सपत्नीस्तनमुद्रांकितम्॥ उरो वक्षःस्थलं वीक्ष्य॥ दयितपदं स्वनिरूपितप्रेमवत्त्वेन ता
दृशानुचिन्ताचरणकार्य्यकारितया दुःखातिशयजनकत्वं ध्वनयति॥ चिह्नितपदं गाढालिं
गनमभिव्यंजयति॥ दीर्घं आयतं न निश्वसिति निश्वासं नोत्सृजति॥ लज्जावशादिति भावः॥ किं
चिदपि॥ वक्रं अनुमानेनं जल्पति न वदति॥ एवं च समानलज्जामदनबलत्वं ध्वन्यते॥ दुःखवत्त्वे
पि दीर्घनिश्वासजल्पनाभावाभ्यां दयिते निर्घृणत्वं व्यज्यते॥ किंतु जलेन धानः॥ वदनं आन
नं परिमार्ज्जयंती क्षालयंती॥ बाला षोडशवार्षिकी नायिका विलोचनजलानि अश्रूणि ति
रोदधाति॥ आच्छादयति॥ विप्रियकारिणं प्रति तज्जनितदुःखप्रदर्शनेनाधिकविप्रियकारि
त्वं स्यादिति चातुर्य्येणानेन दृग्जलं॥ किंतु वदनपरिमार्जनजन्यजलमिति कोपन
मकरोदिति भावः॥ अत्र निश्वासदर्शनाभावाद्गुप्ता तास्फुटा एव॥ अत्रापह्नुतिरलंका
रः॥ वसंततिलकावृत्तम्॥ ४५ प्रौढाखण्डितामुदाहरति॥ मामुद्वीक्ष्येति॥ कोपि नायकः॥
सखायं वक्ति हे सखे विपक्षपक्ष्मलदृशः॥ प्रशस्तानि पक्ष्माणि यस्याः सा पक्ष्मला॥ ॥६२॥

दत्तमपि पद्मदलं न गृह्यते॥ तत्रान्यदत्ताग्रहणस्य कावार्त्तेति द्योत्यते॥ असंलग्नयेत्यनेन ल
ज्जाविशेषेणाग्रहणजन्यकोपपरिहारः॥ स्वस्य सतीत्वादिकं च ज्ञाप्यते॥ सद्योमर्म
रशंकयेत्यनेन कतिपयकालं कमलदलस्य करसंबंधे वश्यमस्मीभाव एव स्यादिति द्यो
त्यते॥ पाणिनेत्यनेन यत्र पाणिस्पर्शोऽपि न कमलदलस्य तत्र विरहानलापतनहृदय
सन्निवेशो दूरापास्त इति ध्वन्यते॥ एवं च प्रच्छन्नकामुकत्वं व्यज्यते॥ किंच यातुः देवरप
त्न्याः वाचितया सुहृदुःखस्य सुहृत्समुदायस्य वचसि प्रत्युत्तरं न वचनं दीयते॥ किंतु
कुरंगीदृशा नायिकया श्वासः निश्वासः न मुच्यते न प्रेर्य्यते॥ यतो हुतवहः क्रूरः हुतवा
हात्॥ अनलादपि क्रूरः॥ कठिनः अतिदाहकइत्यर्थः॥ यातुरित्यनेन सार्वकालिकसंगतिमत्तया
प्रत्युत्तरदानस्यावश्यकत्वं ध्वन्यते॥ सुहृत्पदं प्रत्युत्तरदानौचित्यं गमयति हुतवहपदं दह
नसामर्थ्यं व्यंजयति॥ यातृसुहृत्पदाभ्यां अन्यं प्रति प्रत्युत्तराभावो द्योत्यते॥ प्रत्युत्तरमि
त्येकवचनं प्रत्युत्तरांतराभावं गमयति॥ निखिलं च परपुरुषविरहगोपनं व्यनक्ति॥ अत्र
असंलग्नया गृहीतइत्यनेनैव न हस्तादिनेति॥ लब्धेपि पुनः पाणिनानसंस्पृष्टत इति वाच्य

॥६३॥ दुत्सेन कृतवती॥ पूर्वं वक्ष्यामः॥ किंतु प्रातः उषसि आहृ नानाविधा मंगलीमंगलसूचक॥ आदर्शदर्प
णं करतलात्प्राणितल्लीत्स्वस्येत्यर्थः॥ अदर्शयत् दर्शयतिस्म॥ त्वमेतादृशहति किमर्थं वक्तव्यं
य किं त्वमेवादर्शे लग्नकर्दमं स्वापराधं ज्ञास्यतीति धियेति भावः॥ प्रातः परेणादर्शदर्शनस्यमं
गलिकृतपावश्यकर्तव्यत्वं द्योत्यते॥ अत्र निश्वासकोष्मेइत्यनेन संतापः॥ सूक्तं नोक्तवतीनेना
स्फुटालापो द्योत्यते॥ शार्दूलविक्रीडितम्॥४६॥ परकीयां खंडितामुदाहरति॥ कांतमिति॥ कां
चित्कांचित्प्रत्याह॥ तयामृगदृशा हरिणनयनेया तयेत्यनेन विशिष्य नाम्नो निर्देशात् सर्वप
रिचितत्वं द्योत्यते॥ तरपकीर्त्तिभीतिचकितत्वे वामृगदृशेत्यनेन चंचलत्वेन वल्वं तेन च
जनालोकं कामुकरतिकार्य्यकारित्वं जनत्रासवत्वं वा ध्वन्यते॥ वलयाङ्कितकंठदेशं व
लयैः कंकणैः परस्याइतिभावः॥ अंकितश्चिह्नितः॥ कंठदेशो ग्रीवाप्रदेशो यस्य तं आ
लिंगनविशेषोक्तेति भावः॥ कांतं कमनीयरूपं॥ कोनपरं दुर्लभत्वं तत्र स्पृहणीयत्वं त
स्य तत्कृतान्यसंगदुःसहत्वं व्यंजयति॥ निरीक्ष्य विलोक्य॥ निरीक्ष्येत्यनेन वलयचि
ह्नं यथार्थज्ञानवत्वं ध्वन्यते॥ परभिया अन्यभीत्या प्रच्छिन्नकामित्वादिति भावः॥ प ॥६३॥

रपदं भीतिजननयोग्यतां ध्वनयति॥ परुषाः निष्ठुराः वाचो नोक्ताः॥ किंतु दूतीमुखसंचारिकावदने
दूतीपदं कोपार्हतां गमयति॥ स्खलदश्रुपूराः॥ स्खलनपरभीत्या किंचित्पतन् अंबुपूरो अश्रुसमूहो येषु ते
पूरपदं वाकुल्यत्वदुःखातिशयं अभिव्यंजयति॥ दूरात् निदधिरे निक्षिप्ताः॥ आलम्बोत्यस्यफलत्वे चि
ह्नमेतद्विलोकयस्वेति धियेति भावः॥ यद्वा त्वमेवेन मनुशाधीति धियेति भावः॥ दूरादित्यनेन दू
तीमुखावलोकनेभीतिस्तत्किमु वाच्या कान्तं प्रतीति प्रच्छन्नकामुकाभिलाषत्वं व्यज्यते॥ अस्ख
लदश्रुपूरा इत्यनेनाश्रुपातः स्फुट एव नयनाश्रुपातादित्यनेन किमतः परं विधेयमिति विचारये
ति चिन्ता व्यज्यते॥ वसंततिलका वृत्तम्॥४७॥ सामान्यवनितां खंडितामुदाहरति॥ उरस्तवेति
काचिदुक्ति॥ रेशठ तवेदं उरः वक्षःपयोधराङ्कितं॥ अन्यसामान्यवनितास्तनचिह्नितं॥ तवेत्य
नेन॥ अनादरात्सन्ताषो द्योत्यते॥ इदमिति च गोपनानर्हतां द्योतयति पयोधरपदं गुरू
तामावेदयति तच्चिह्नजनसामर्थ्यं तावता किमित्यत आह॥ मे कुतः कस्माद्धेतोः क्षमाति
तिक्षा सैव तादृशापराधसहने इति भावः॥ फलितं वक्ति॥ ततः सर्वहेतोः मयि मद्विषये पुरा
सर्वं यद्वसुद्रव्यं अंगीकृतं प्रतिश्रुतं तन्निधीयतां प्रदीयताम्॥ इत्युक्ते कोपि गणिकया वारस्त्री वारस्त्रिया
गणिका वेश्या इत्यमरः॥ वसुपदं त्यागार्हत्वं द्योतयति॥ अंगीकृतमित्यनेनावश्यं देयत्वं द्योत्यते

॥६४॥ इतिहेतोः प्रचलचेतसः चंचलचेतसः ॥ आगमनप्रतिज्ञां कृत्वान्यत्रगतत्वादितिभावः ॥ प्रचलपदं अग्रेदर्शना
भावं द्योतयति ॥ तत्रास्यैव द्रव्यग्रहणयोग्यत्वं ॥ प्रियतमस्य कांतस्य तमय ॥ अविवक्षितः यद्वाऽद्यत्वेन
प्रियत्वात्तत्सार्थक्यं करतलात् हस्तात् ॥ कनैत्कनककंकणं ॥ कणत् स्वनत् ॥ कनककंकणं सुवर्ण
वलयं करतलमितितु युक्तः पाठः ॥ कणत्कनककंकणमिति क्रियाविशेषणम् ॥ एवं च पुरुषकर
कंकणस्यो चित्याक्कणनमेसंभवीतिद्रष्टणं मस्लग्नकं वेदितव्यम् ॥ समाकृष्यते हठादाकृष्यते ॥
पृथ्वीछंदः ॥४८॥ प्राप्तावसर त्वात्कलहान्तरितां लक्षयति ॥ ॥ पतिमवमत्येति ॥ पूर्वं पतेरवमत्यकोपं
कृत्वा पश्चात्पश्चात्तापं करोतिया सा कलहान्तरिता ॥ स्वकृतपत्यवमानोत्तरपरितापवत्त्वमित्य
र्थः ॥ उक्तंच कलहांतरिमर्षाद्विधुतानुशयार्तियुगिति ॥ लक्षणज्ञानायतत्क्रियामाह ॥ अस्यादिति ॥ भ्रां
ति मिथ्यामतिः संतापो ऽनुतापः ॥ मोहइन्द्रियवैकल्यं इतरस्पष्टम् ॥ तत्रमुग्धां कलहान्तरितामुदाहर
ति ॥ अनुनयतीति ॥ काचिन्नस्याह ॥ नवोढा मुग्धा लज्जमाना सखीं उरद्रवात्रेप्यन्वेति ॥ पतिं भर्त्तारं क
लहेनावमानितमिति भावः ॥ न अनुनयति न सान्त्वयति ॥ किंच सखीजनायापि सखीसमूहाया
पि जनपदेन समूहमध्ये नैकामपि स्वकीयेहकृतं न कथयति ॥ इति लज्जावत्त्वं द्योत्यते ॥ किं चिद्विधे
यादिनकथयति ॥ परंतु मलयानिले मलयसंबंधिसमीरे ॥ विरहिदाहक इति भावः मलयप ॥६४॥

सिभ्यादिभ्यश्चेतिलत्वं ॥ नयनादकृत्यस्याः सा विपक्षा सपत्नीचासौ पक्ष्मलदृक्च तस्याः पार्श्वे उ
आलेखकैः ॥ वरणकमललालाराणैः आलिखाननं उत्तानकरणादितिभावः ॥ यद्वापारमत
नादितिभावः ॥ मामुद्वीक्ष्य ॥ आनतीकृतमुखीनम्रीकृतवदना ॥ विप्रियकारिणो दर्शनाद
दर्शनमेववरमिति मियेतिभावः ॥ चित्रार्पितेव आलेख्यनिवेशितेव ॥ अभवत् ॥ जाता नि
षारविमूढतयेति भावः ॥ विपक्षपदं दुःखातिशयजनकत्वं व्यंजयति ॥ पक्ष्मलदृक्पदं सौं
दर्यातिशयं ध्वनयति ॥ अंबुजपदं कोमलतां गमयति ॥ आलिखपदं गोपनायोग्यतां द्यो
तयति ॥ आनतीकृतमुखीत्यनेन ॥ किं मदधिकापि सा ॥ येनायं तस्यामासक्त इति स्वस्लि
नेपकर्षो ध्वन्यते ॥ यद्वा मामयं विहाय तस्यां गुणभ्रान्त्या यामासक्तो गुणानभिज्ञः ॥
एतादृशो चैतस्मिन् ममासक्तिर्मूर्खत्वनिर्वचनेति लज्जावत्त्वं व्यज्यते ॥ चित्रार्पितेत्यने
न दुःखवशान्निर्गतप्राणतुल्यता द्योत्यते ॥ किंच रूक्षं कठोरं न उक्तवती नानाविधो
पायैराराधितोप्येतादृशमकरोत् ॥ किं पुनः कठोरवाक्यादिभिर्भर्त्सितः ॥ किं किं न क
रिष्यतीति धियेति भावः ॥ अथवा दृशौ लोचने निश्वासः सकोष्णः ॥ दुःखजवाष्पैः किंचि

॥६५॥ चिन्तेरसज्ञेरस्ताः भिज्ञेरसने क्रुधा कोपेन कलहं विग्रहं किमधाः कृतवती नायकविषयत्वं सर्वत्र रसान
भिज्ञत्वान्नेत्रकयोराहरूण्यादिकरतोऽपि नातीवापराधोरसाभिज्ञत्वात्तवेतादृशाकरतोऽत्यन्तम
पराधइतिभावः॥ एवं च नयनारुण्योदरन्यथापि समर्थनीयत्वेन नायकस्य न तथा दुःखदत्वेय
पात्वत्कृतविग्रहस्येति व्यज्यते॥ युक्तमिदं दैवहतानामित्याह॥ हितमिति॥ दैवदुष्टाः प्रतिकूलदैवाः
हितमनुकूलार्थं न विदन्ति न जानन्ति॥ क्रोधव्याप्तितिभावः॥ एवं च भवद्भिरेव पर्वंसविलासकृता
क्षविक्षेपवसनाञ्चलाकर्षणाक्षासदक्षाक्षरपरिहासवचनरचनाभियैर्द्धितं त्वत्प्रायत्तं कृ
तमन्यत्तैरेव भवद्भिरिदानीं तत्प्रत्येवैतादृशानुचितमाचरितमिति न संभवति किंतु दुर्दैवकृतमिति
३८ न भवतामपराध इति ध्वन्यते॥ अत्रानुतापः स्पष्ट एव॥ यत्तु कापि सखी नायिकां वक्ति॥ हे अरस
ज्ञे॥ क्रीडारसानभिज्ञे कथमन्यथा कलहमकरोरि। ति भावः॥ नेत्रशोतिमानं नयनारुण्यं कोपेन
किमु अकरोः॥ कृतवती किं च करपद्मतर्जनं बाहस्तकमलेन भर्त्सनं किं किमिति अकार्षीः॥ कृ
तवती वाग्भर्त्सनस्य यथा कथंचित्सोढुं शक्यत्वेऽपि करकृततर्जनस्यात्यन्तमसह्यत्वेन तत्का
रित्वेनात्यन्तानौचितीव्यज्यते॥ किंच कलहं अत्यंतानुचितवाग्भर्त्सनरूपं किमिति अधाः कृतवती ॥६५॥

आदौ कोपज्ञापकनयनारुण्यप्रदर्शनमेव नत्युक्तं तत्रापि करेण वहिःकरणम्॥ तत्राप्यत्यंतानु
चितकलहकरणमित्यहोतेमौर्ख्यमिति भावः॥ अत एवारसज्ञेऽस्यामन्त्रणमनुचितं नायं तवाऽप
राधो दैवमेवतेप्रतिकूलमित्याह॥ दैवदुष्टाः हितमनुकूलार्थं क्रुधा कोपेन॥ रुट् क्रोधोऽस्त्रिया
मित्यमरः॥ न विदंति न जानन्ति॥ दैवहतानां मेव एतादृशः कोप इतिभाव इति व्याख्यानं॥ तन्नायि
कायाः परितापाऽप्रदर्शनेन लक्षणासंगत्यापूर्वव्याख्यानमेव॥ ५१॥ परकीयाकलहांतरि
तामुदाहरति॥ भर्त्तुरिति॥ काचिन्नायिका सखीं प्रत्याह॥ हे मातः मातरित्यनेन स्वानुचिताचर
णप्रकाशनार्हत्वं व्यज्यते यस्य भर्त्तुः कृते विभर्त्ति सौन्दर्यादीति भर्त्ता एवं च मनोहरादित्वमभि
व्यज्यते॥ यदर्थमित्यर्थः॥ गुरुः श्वसुरादिः लघुरंभर्त्ता॥ अर्थात्मया गुरुपदमनुलंघनीयात्तत्वं गएयो ३८
व्यंजयति॥ यच्छायस्य कृते यदपमिदमग्रेऽप्यन्वेति॥ भर्त्तुर्गुरुर्लघुरभर्त्ता॥ मान्यपतिमान्यस्या
तिमान्यत्वेऽपि तदनादरकरणेन भर्त्तुरप्यनादरः कृत इति भावः॥ यच्छायेदर्पेलघुईत्यादिजनः
गुरुरस्येतत्सेवनीयः अभर्त्ता॥ एवं च यदर्थइत्यादिनी च जनोऽपि श्वसुरादितुल्यतयोपासितः सो
प्यवधीरित इति महद्दुश्चित्ताचरणं ममेति व्यज्यते॥ किंच गोष्ठीसती समस्या॥ समस्यापरिषद्गोष्ठी

॥६६॥ समेत्यमरः॥ कनिष्ठीकृता अलक्षीकृता एवं च सकलसतीसमाजनिंदापिनस्तेतिभावः। गोष्ठीपदेन तन्नि
न्दाया अवश्यपरिहरणीयत्वं द्योत्यते॥ यद्वा गोष्ठी सतीसमावयस्याम् इममर्चितततमासापि कनि
ष्ठीकृता निंदाकृता॥ यत्र सतीसभाभ्यर्हिततमेयमीदृक्-अनुचिताचारवती॥ तत्र ता अप्यनुचि
ताचारवत्य इति तासामपि मया निंदासंपादितेत्यनुचितमितिव्यज्यत इत्यर्थः॥ किंच कोश धनं
अर्थसंग्रहगृहं तन्निष्टरूपं धैर्यगांभीर्यबाधिर्यमीरयति साधीरा तज्ञा धैर्यविवेकित्वमित्य
र्थः। गतं नष्टं। कोशपदेन विस्युपयोगित्वं ध्वन्यते तेन तन्नाशस्यातिदुःसहत्वं॥ धनपदेनावश्यग्र
हणीयत्वं व्यज्यते॥ किंच सहचरी नियतनिकटसंचारिणी नीतिः दूरतः कृता तिरस्कृतेत्यर्थः। स
हचरीतिपदं त्याग्यानर्हतां गमयति। नीतिपदमवश्यविधेयत्वं द्योतयति॥ किंच [illegible]पा लज्जा तृण
वत्तृणातुल्यं तेन तुल्यमिति वृत्तिः॥ त्रपापदमवश्यांगीकरणीयत्वं व्यंजयति॥ तृणपदमग
णनीयत्वं ध्वनयति॥ निर्मुक्ता त्यक्ता॥ एवं च त्यागे बुद्धिपूर्वकत्वं ध्वन्यते॥ किंच स्रोतस्विनी
स्रोतः प्रवाहोऽस्या अस्तीति स्रोतस्विनी अगाधजलापि नदी संकेतमार्गवर्त्तिनीत्यर्थः। विंदुव
त्परिचिता॥ अभ्यस्ता॥ स्रोतस्विनीपदमनुल्लंघनीयत्वमभिद्योतयति॥ विंदुपदं शीघ्रोल्लंघनी ॥६६॥

दंसीगन्ध्यमावेदयति॥ अनिलपदमनिवारणीयत्वं द्योतयति॥ प्रसरति सति वहति सति चिरायव
दुकालं भ्रन्त्यं प्रतिपत्तिरहितं भ्रन्त्यमित्यनेन संमोहो द्योत्यते॥ अंतः अंतःकरणं भीमो भीमसेन इति
वत् नामैकदेशे नामप्रयोगः॥ वहति धारयति विरहविषमन्तये ति भावः॥४९॥ मध्यां कलहान्तरि
तामुदाहरति॥ विरमतीति॥ कथनं विना स्थापनं विना॥ पपकु विनेति छिती यास्विदो दुःखं न वि
रमतीति नापगच्छति॥ निवेद्य दुःखं सुखी भवतीति भावः॥ एवं चावश्यकथनीयत्वं द्योत्यते॥ किंच
कथने सति खेदे निवेद्यमाने सति॥ का पि दुर्निवारा लज्जा त्रपा समुपैति॥ अधार्ष्ट्येनेतिभावः॥ इ
ति हेतोरधोमुखी लज्जावशादितिभावः॥ सखिभ्यः लपितुं वक्तुं अनालपितुं अवक्तुं समावकांक्ष अ॰त्र
मध्यात्वं स्फुटमेव संशयोऽयं अलंकारः॥५०॥ प्रौढाकलहान्तरितामुदाहरति॥ अकरोः किंत्विन्नेत्रे ति॥
कोपिनायिका परितापवशान्नेत्राश्रीणीत्याह॥ हे नेत्र नयति विलोकनविशेषेण मुखजातं यत्तत्तस्म्बो
धने हे नेत्र शोणिमानं रक्तिमानं किमित्यकरोः कुपितप्रसादनासम्पादनानिपुणस्यापि तवेतादृशारु
णपपदर्शनेन कोपोत्पादनमनुचितमितिव्यज्यते॥ किंच हे करपद्मकरमेलतर्जनं वा किमित्यकार्षीः
कमलपदं कोमलत्वाताापोपशमशीतलशीलतां च व्यंजयति॥ सा च तादृशतर्जनकरणेनोचिती

६७ ताचरणविधानादिति भावः ॥ एवं च कोपे कृते पुनर्जीवनमिदमस्यंतानुचितमित्याह ॥ ममजीवितमिति
धिक् ॥ अपजीवने ऽपि एतादृशोदार्य्याभाववति नायकांतरे रतिरत्यंतानुचितेत्याह ॥ अतनुंका
मं धिक् रतिजनकत्वादिति भावः यद्वा एतादृशानुचितकारित्वे ऽपि तथाविधप्रहारविशेषेर्णायं
प्राणवियोगं करोतीत्यत एनमपि धिगस्त्वित्याह ॥ धिगतनुमिति ॥ यद्वास्वत एवैतादृशदानशीले
ऽपि मम चित्तमात्रोपाधिक एवानुराग उत्पादितो ऽनेन मदनेन न तु स्वाभाविक इत्यत आह ॥ धिगत
नुमिति ॥ ननु भ्रन्यत्वादेवैतादृशज्ञानविकल इति भावः येतु धिगपरमिति पाठं प्रकल्प्य अपरं सो
न्दर्य्यादीत्यर्थ इति व्याचख्युस्ते अपरपदस्य सौन्दर्य्यादिपर्य्यकत्वे प्रमाणाभावात् चेष्टितादीना
मपि संग्रहीतत्वादेतेतदभिधानपौनरुक्त्यापाद्य व्याख्यानमभिज्ञा एवं मदनेन चित्तमात्रोपाधि
कानुरागजननेकांततिरस्कारकारकचेष्टादिमनुचितमित्याह ॥ धिक् चेष्टितमिति एतादृक्
पतितिरस्कारकारकचेष्टाकरणे ऽपि यद्वयस्यारूप्यादि तदपि धिगस्त्वित्याह धिग्वयः
एवं चैतादृशतारूप्यभोक्ता न को ऽपि तदतिरिक्त इति भावः ॥ अनुतापव्याजस्फुटएव ॥ ५३ ॥
प्राप्तावसरत्वाद्विप्रलब्धां लक्षयति । संकेतनिकेतन इति ॥ संकेतस्थल पत्यनवस्थानज्ञाने ॥ ६७ ॥

विमनायमानत्वमित्यर्थः । लक्षणज्ञानाय चेष्टामाह ॥ अस्याश्लेष इति ॥ निर्वेदः स्वावमानने सखीजनोपालंभः
सन्निरूपरिभाषणम् ॥ चिंता अनागमनहेतुज्ञाने चित्तैकाग्रता ॥ मूर्छा इंद्रियवैकल्यम् । तत्र मुग्धां वि
प्रलब्धामुदाहरति ॥ आलीभिरिति ॥ काचित्कां चिदाह ॥ आलीभिः सखीभिः ॥ आलिः सखी वयस्या
चेत्यमरः ॥ एवं च विश्वसनीयत्वं व्यज्यते ॥ वहुवचनमव[illegible]तिषेध्यत्वं ध्वनयति ॥ अनेककपटैः अ
नेकव्याजैः ॥ कपटो ऽस्त्री व्याजदंभ इत्यमरः ॥ शपथैः समयैः ॥ समयाः शपथा इत्यमरः ॥ कुंजो
दरं लतागृहमध्यं संकेतीकृतमित्यर्थः ॥ एवं च निकुंजगमनस्योचितत्वं ध्वन्यते ॥ नीतया प्रापित
या एवं च मुग्धात्वमभिव्यज्यते ॥ तत्र लतागृहमन्यं प्रियरहितं ॥ अन्यपदमनवलोकनीयतां
गमयति ॥ निरीक्ष्य विलोक्य विस्मितं तया विमनस्कतया प्रियविरहचिंताव्याप्तमिति भावः नष्ट
स्थितं चलितं ॥ प्रियसमागमतयेति भावः ॥ न स्थितं प्रियतमस्य तु त्रासत्वादिति भावः ॥ एवं च य
दिगतं तदाकदाचिदागमिप्रियतमदर्शनं संभवि स्थितं च दितदा तद्रहितो निकुंजो दुःखदास्यती
ति किं कर्त्तव्यमिति विचारव्याकुलता व्यज्यते ॥ किं तर्हि कृतवतीत्याह ॥ न वोढनीरजदृशा नवो
ढांगनया नीरजपदं अश्रुपातं व्यंजयति ॥ कुंजोपकंठे निकुंजप्रांते रूषाकोपेन ताम्यत् भृंग

॥६८॥ करंबडंबरचमत्कारस्पृशः ॥ तान्यंतः व्याकुलाः स्वाभिलषिताप्राप्त्येति भावः ये भृंगाः भ्रमराः तेषां
कदंबो वृंदं निकुरंबं कदम्बकमित्यमरः ॥ तेषां डंबरं आडंबरं आरभटीतियावत् ॥ तस्य चमत्का
राः विलासविशेषास्तान् स्पृशंत्यंगीकुर्वंतीति तत्तुल्या इत्यर्थः दृष्टयो दृक्पाताः न्यस्ताः परितः
क्षिप्ताः । कथमेताभिः सखीभिरपि प्रतार्यात्राहमानीता प्रियतमस्तु नाद्याप्यायातीति कोपव
शात्प्रियतमागमनमार्गभूते निकुंजप्रांतभूभागे वेव दृक्प्रेरितेति भावः ॥ यद्वा एतादृशाकपट
ति कारिण्यः सख्यो न द्रष्टव्या इति धिया कुंजप्रांतभूमावेवालोकयामासेति भावः ॥ यद्वा प्रियतमस्या
न्यनिकुंजे ऽवस्थितौ वाम कामपीडा स्यात् ॥ यद्यनेन यथागतं तेनैव कांतव्यं तदा एताभिः प्र
तिबंधः कर्तव्य एवेत्यतो मार्गोत्तरविलोकनार्थं कुंजांते दृष्टिमकरोदिति भावः ॥ यद्वा एता
भिरेव प्रियतमोऽत्रैव निकुंजांते स्थापितो भविष्यतीति धिया तद्विलोकनार्थं तत्र दृष्टिमधा
दितिभावः ॥ तान्यत्पदं दुःखबलं ध्वनयति ॥ भृंगपदं श्यामतामभिव्यंजयति ॥ कदंबपदं निबि
डकटाक्षवत्तां गमयति डंबरपदं कटाक्षेषु प्रौढतामभिव्यंजयति ॥ चमत्कारपदं ~~उत्स्वकत्वं~~ ध्व चिन्ताकर्ष नामभि २
नयति ॥ अत्र निदर्शनालंकारः ॥ ५४ ॥ मध्यां विप्रलब्धामुदाहरति ॥ संकेतकेलिगृहमिति ॥ ॥६८॥

यत्वं गमयति ॥ सोपि यदर्थमेवं साहसं कृतं सोपीत्यर्थः ॥ क्रोधात्कोपात् ॥ हतधिया नष्टबुद्ध्या मया अव
धीरितः धिक्कृतः ॥ अवधीरस्त्ववज्ञान इति मत्कृपार्थमेतावत्साहसं कृतं तं प्रति मया कोपः कृत इति न
संभवति ॥ तस्मात्सर्वमेतद्दैवकृतमित्याह ॥ विधिर्दैवं बलीयान् ॥ एतादृशाकार्यकरणेऽपि समर्थं
तथापि नापराधो मदीय इति भावः ॥ अत्रानुतापः स्फुट एव नर्मस्फोटालंकारः ॥ ५५ ॥ विश्यां कलहां
तरितामुदाहरति ॥ पत्यंकेरुहेति ॥ काचिन्नायिका सखीं प्रत्याह ॥ हे सखि पाणिकमलं करकमलं पत्यं
केरुहलक्ष्म पंकेरुहं पद्मं भाग्यसूचकमित्यर्थः ॥ तल्लक्ष्म चिह्नं यस्य ॥ चिह्नं लक्ष्म च लक्षणमित्यम
रः ॥ किंच मम इदं सर्वत्रान्वेति ॥ भाग्यालये भाग्यभवने नवमे इत्यर्थः गुरुर्बृहस्पतिः ॥ भाग्यसूचक इ
तिभावः ॥ गीष्पतिर्धिषणो गुरुरित्यमरः ॥ किंच ललाट फलके निटिलपट्टे ॥ यत्त्वेधसा ब्रह्मणा
भाग्यसूचकवर्णकदम्बकं न्यस्तं निहितं ॥ एवं च ब्रह्मणा लिखितमेतावदेव परं तु तल्लिखनस्य या
थार्थ्यमनेनैव कृतमितिवेधसोप्यधिकत्वमावेद्यते ॥ तत्सर्वं पंकेरुहलक्ष्मादि यथार्थं वृकृतरद
नेनेति भावः ॥ अकरोत् कृतवान् ॥ अकरोदित्यनेन सकलभाग्यसंपादकतयानुभूतत्वात्तस्मि
न्नपि प्रकोपकरणस्यात्यंतमनौचित्यमभिव्यज्यते इति मां धिक् ॥ गर्हिं हं तादृशेप्येतादृशानुचि

॥६९॥ मेव अर्द्धचर्वितमेव॥ यत्र गृहीतमपि तांबूलं न चर्वितं तत्रान्यकार्यकरणवार्त्ताकेति भावः॥ यद्वाय
दर्थमेत॥ यत्र गृहीतमपि तांबूलं न चर्वितं तत्रान्यकार्य्यकरणवार्त्ताकेति भावः॥ यत्तांबूल
दि चर्वणं शृंगाररचना स एवात्र नास्तीति व्यर्थासेत्यन्तस्तथैवस्थितेत्यर्थः॥ एवं च प्रियविरहवशा
ज्जडतामापन्नेति ध्वन्यते॥ अत्र चप्रस्तुतनायिकावस्थाप्रशंसने॥ अप्रस्तुतस्य वश्च॥ पर्धाक्षरत्वा
देः प्रशंसनादप्रस्तुतप्रशंसालंकारः॥ स च प्रियमन्यत्वस्य हेतोरितरवाक्यार्थप्रतिहेतुत्वात्का
व्यलिंगाऽऽप्राणितः॥ ५५॥ प्रोढां विप्रलब्धामुदाहरति॥ अन्यमिति॥ काचित्कोविरस्ता॥ ह
कुंजगृहलतागृहसंकेतीकृतमिति भावः॥ एकवचनेनातिस्पृहणीयत्वम् व्यज्यते॥ अन्यं वि
यरहितं॥ अन्यपदमनवलोकनं द्योतयति॥ निरीक्ष्य॥ अत एव तद्विरहेण चेतोभवं म॥ द
नं॥ चेतोभवमदननिवारणीयतां ध्वनयति॥ कुटिलं क्रूरं पीडाजनकमित्यर्थः॥ कुटिलपदं दुः
सहत्वं व्यंजयति॥ विज्ञापक्षात्वाद्दूत्यपि परिचारिकापि न निवेदितानसापिता॥ प्रियानयनार्थ
मिति भावः॥ दूतीपदं प्रियसंगमसंपादनयोग्यतां व्यंजयति॥ किंचसहचर्य्यपि सख्यपिनो
पृष्टा॥ प्रियवृत्तांतं किमतः परं विधेयमिति भावः॥ सहचरीपदं प्रियानागमनहेतुस्वापराधज्ञ ॥६९॥

तां ध्वनयति॥ एवं च दूतीनिवेदनसखीपरिप्रश्नकरणकालमध्य एव क्रूरविषमशरशराघातैर्मरण ॥७०॥
मेवस्यादिति॥ तमनादृत्य मदनविरोधिमहेश्वरस्तुतिसमारंभणेन विरहकातरताऽभिव्यज्यते॥ किं तर्हि
कृतवतीत्याह॥ परं तु एकं कृतमित्यर्थः तयानायिकयाऽऽशंभोः॥ सुखोत्पादकस्य एवं च सुखमस्तीति तद्दा
नेन कोपितवायासइतिव्यज्यते॥ ननु करस्थितमिति सुखं किमर्थमन्यस्मै देयमित्यत आह॥ चन्द्रशे
खरेति॥ चन्द्रत्याल्हादयतीति चन्द्रः स शेखरे मस्तके यस्य॥ एवं च सुखजनकस्यास्य चन्द्रस्य परोपका
रव्रतमालोच्यैनं स्वशिरसि धृतवानसि तस्मात्त्वयः परसुखकारी स तवातिप्रिय इति स्वयं नकपं सुखप्र
दानेन परोपकार्य्यसीति व्यज्यते॥ यद्वा नकेवलं त्वं करे सुखमपि तु सुखसम्पादकश्चन्द्रोऽपि शिर
सीति॥ तव सुखप्रदानस्याति सुलभत्वमित्याह॥ चन्द्रशेखर इति॥ यद्वा करस्थितं सुखमेकस्यैव दत्त
चेत्तदाग्रे अन्यस्य किं देयमिति शंकानकार्येत्याह॥ चन्द्रशेखरेति॥ न चास्तां दूरे सुखजनकत्वं दुःखहार
कत्वं तु तवाधीनमित्याह॥ हरेति हरति सर्वं दुःखमिति हरः॥ एवं च दुःखहरणसमर्थत्वेन तत्करणस्यातिश
कृतपातसंपादनस्योचितीति द्योत्यते॥ नन्वेतदेतस्य कथं अवधृतमित्यत आह॥ श्रीकण्ठेति॥ एवं च स
कललोकदुःखदं कालकूटगरलं निगिलनेन समस्तजनदुःखापहारकत्वस्यावधृतत्वान्मद्दुःखापहारक ॥७०॥

॥७०॥ त्वं न तद्दुर्लभमिति ध्वन्यते ॥ नन्वेतस्य परदुःखदुरीकरणे का वासामग्री इत्यत आह ॥ शूलिन्निति ॥ ननु प
रदुःखापनोदनार्थं प्रवृत्तो स्वस्यैव चेद्दुःखमापद्येत तदा कथं तद्विधेयमित्यत आह ॥ शिवेति ॥ एवं च
कल्याणस्वरूपस्य तव न कुतश्चिदपि दुःखमिति तत्परिहारकर्तृत्वं तवातिसुलभमिति व्यज्यते ॥ यद्वा
सुखजनकत्वेऽपि किमर्थं तत्तत्र सम्पादनीयमित्यत आह ॥ शंकरेति ॥ एवं च दानार्थं करे गृहीतं सु
खं यस्मै कस्मैचिद्देयमेव तत्र चातिदैन्यपात्रभूतायां मय्येव तद्दानमुचितमिति ध्वन्यते ॥ नन्वे
न्येषां सुखजनकत्वं मम सुलभं तव तु मत्स्ववाधाक्रांतायाः कथं तदित्यत आह ॥ चंद्रशेखरेति
एवं च मदनसहायपतिमित्रचन्द्रस्य तव चातिप्रीतिमत्तया तद्द्वारा तद्बाधानिवारणस्यातिसुक
रत्वमिति व्यज्यते ॥ यद्वा मदनमित्रचंद्रस्य त्वदधीनत्वेन परस्परभेदस्य सिद्धत्वात्तन्निवार
णोपायज्ञानं सुकरमिति ध्वन्यते ॥ यद्वा मदनोऽपि चंद्राद्युद्दीपनद्वारेव दुःखदोनस्वतः तच्च
तवाधीनमित्येतज्जन्यपीडानिवारणेन तत्पीडानिवारितप्रायैवेति द्योत्यते ॥ न केवलं चंद्रपी
डानिवारणेन मदनपीडानिवारकत्वं ॥ अपि तु तन्नाशेऽपि तव सुकरइत्याह ॥ हरेति ॥ हरति स्म
रमिति हरः ॥ एवं च मल्लोकदेपुरूषव्यापारइति तन्नाशकरणमेव तवोचितमिति व्यज्यते ॥ नबुक ॥७०॥

कावित्कांवित्यत्याह ॥ संकेतकेलिगृहं संकेतीकृतकेलिसदनं ॥ एकवचनेनातिस्पृहणीयत्वं ध्वन्यते ॥ एत्य
आगत्य प्रियतमसंगमेच्छयेति भावः ॥ तच्च भूत्यं प्रियरहितं निरीक्ष्य शून्यपदसन्नवलोकनीयत्वं
द्योतयति ॥ निभृतनि[illegible]सिताधरायाः ॥ निभृतं मन्दं लज्जयेति भावः यत् निश्वसितं ॥ प्रियविरहा
दितिभावः ॥ तदत्तस्मिन्नुत्तथाऽधरो यस्यास्तस्याः निश्वसितं चात्र स्फुटमेव ॥ एणीदृशः मृगलोच
नायाः ॥ प्रियाप्राप्तिकातरतयेति भावः ॥ एणीपदं विशालत्वं चंचलत्वे द्योतयति ॥ अर्द्धाक्षरम्
अर्द्धान्यसंपूर्णान्यक्षराणि वर्णाः यत्र तथा ॥ वचनं वाक्यं ॥ तस्योपस्थितम् ॥ इदं चाग्रेप्यन्वेति अ
र्धास्फुटी ॥ एवं च यथा कथंचिदपि वक्तुमुपक्रान्तमेकमपि वाक्यं न सम्पूर्णाक्षरं वक्तुं शक्य
मिति तत् ॥ कालिकाधिकमदनबाधाऽभिव्यज्यते ॥ यद्वा लज्जा मदनसाम्यमभिव्यज्यते ॥
न केवलं स्वचनमेव न तथा जातमपि तु विलोकनमपि तथेत्याह ॥ किंच अर्द्धविकासि ॥ अर्द्ध विका
सो यत्र तदर्द्धविकासि ॥ एवं च कमलसाम्यमावेद्यते नेत्रं नयनं ॥ व्यंग्यं पूर्ववदेव ॥ स्त्र्या
चियं दृष्टिः ॥ उत्कंठ च निःकंपा समन्नाराया मलिनास्वन्यदर्शनगतथा समपुटायाहविष
येषु गतस्पृहा दृष्टिः कथिता स्त्र्यधीरे ॥ भिन्नानिरूपणइति ॥ किंच तोदूलं अर्द्धकवलीकृत

७१ सचचरणदाना नर्हत्वं ॥ मर्द्धीत्यनेन साहसातिशयो व्यज्यते ॥ दत्वेत्यनेन बुद्धिपूर्वकत्वमावेद्यते ॥ यद्वा धैर्यं च
भुजंगश्चतयोर्मर्द्दीत्यर्थः ॥ एवं च धैर्यालिंघनेऽपि मार्गे भुजंगमस्तके पदार्पणपुरस्सरागमनेन प्रिय
तमसंगमनिमग्नचित्तत्वं द्योत्यते ॥ लज्जानदीलज्जानदीवतां अलंघ्यत्वादिति भावः ॥ उल्लंघ्य उत्तीर्य
यद्वा लज्जया सह ॥ नदीमपि इति सहोक्तिः ॥ किंच घनांधकारपटले ॥ घनं निबिडं अंधकारस्य पटलं स
मं अंगीकृत्य उपगम्य आगतयेति शेषः ॥ यद्वा घनैर्मेघैर्यदंधकारपटलं ॥ एवं च निबिडतरतडिल्ल
ताबितानमेघपटलरूपभीतिहेतुमत्यपि काले प्रस्थानकरणेन साहसमभिव्यज्यते ॥ खलांधका
रपटलमितिपाठे ॥ खलाः दुष्टाः अंधकारपटलमिव गमनादिप्रतिबंधकत्वादिति भावः ॥ एवं च दुष्ट
गणनापि न कृतेति साहसातिशयो द्योत्यते ॥ त्वंग्या प्रियादर्शनचिंतयेति भावः ॥ प्रियः संकेतित इति
भावः ॥ न दृष्टः संकेतस्थल इत्यर्थः ॥ किं कृतवतीत्याह ॥ च इत्यनेनांतरं सन्तापाकुलयासंतापव्यग्रया ॥ पा
थोदे तलधरे ॥ कबंधमुदकं पाथ इत्यमरः ॥ गर्ज्जति सति शब्दायमाने सति ॥ एवं चैवंविधोद्दीपनविभा
ववत्तया सन्तापातिशयो व्यज्यते ॥ क्रोधाक्रान्तकृतान्तमत्तमहिषभ्रान्त्या ॥ क्रोधेन कोपेन आक्रान्तः
वशीकृतः कृतान्तः यमः ॥ कृतान्तो यमुनाभ्रातेत्यमरः ॥ तस्य मत्तः उन्मत्तः ॥ जिघांसयेति भावः महिषो लु ७१

लायः ॥ लुलायो महिषो वाहद्विषत्कासारसैरिभा इत्यमरः ॥ तस्य भ्रान्त्या भ्रमेण परितः दिक्षु विदिक्षु च दृष्टो
नेत्रे यो जितेप्रेरिते ॥ क्रोधपदं दुःसहतामावेदयति ॥ आक्रान्तपदं असमाधेयतां व्यंजयति ॥ कृतांतपदं स
र्वविनाशकत्तां ध्वनयति ॥ मत्तपदमनिवारणीयतां गमयति ॥ महिषपदं दुःखितस्य दुःखजननमनुचित
मितिमतिभ्रान्त्यतां द्योतयति ॥ निखिलं मेघगर्जनकुपितकृतांतलुलायशब्दभ्रमेण त्रासातिशयमभि
व्यनक्ति ॥ स च विरहातिशयं भ्रान्तिमदलंकारः ॥ स च रूपकतुल्ययोगितासहोक्तिभिः संसृष्टः ॥ उक्तं च ॥
तद्रूपकमभेदो य उपमानोपमेययोरिति तथा नियतानां सकृद्धर्मः साधुनस्तुल्ययोगितेति ॥ तथा स
होक्तिः सहभावश्चेति ॥ ५७ ॥ सामान्यवनितां विपलब्धामुदाहरति ॥ कपटेति ॥ कपटवचनभाजा ॥ कपट
वचनानि भजतीति भाक्तेन ॥ भजतीत्यनेन निरंतरकापट्यशालित्वं द्योत्यते ॥ केन चित्पुरुषेण सक
लरसिकगोष्ठीवंचिका ॥ सकलाः समग्रा ये रसिकास्तरुणास्तेषां गोष्ठी समाजस्तस्याः वंचिका प्रतारि
कारतया नं वचनचातुरीविशेषं ध्वनयति ॥ असौ वारयोषा वंचिता प्रतारिता ॥ इति हेतोः रिंगद्भृंगावि
क्षिप्तचक्षुः ॥ रिंगद्भृंगाः चंचलभ्रमराः तद्वद्विक्षिप्ते चक्षुषी येन सः केलिकुंजः विकचकुसुमकान्तिच्छ
द्मना विकसितपुष्पव्याजेन हसतीव सकलचातुरकामिजनवंचननिपुणापि केनापि प्रतारितेति विस्म

॥७२॥ यादितिभावः॥ अत्रोत्प्रेक्षालंकारः॥ सचातिशयोक्तिरूपकाप्रस्तुतिः संसृज्यते॥ ५८॥ उत्कालक्षयति
संकेतस्थलमिति॥ संकेतपदं व्याचष्टे माह॥ अवधीति लक्षणज्ञानायाह॥ अस्याइति॥ अरतिर्विष
येद्वेषः॥ अंगमोटनं कुचपटलज्जादिना क्रियाविषयकं ज्ञातं तेन रुदितं स्याद्वस्थाकथनकालकृतवृत्तांतवि
शेषकथनं॥ तत्र मुग्धामुक्तामुदाहरति॥ यत्नाद्यापीति॥ का विस्तां विशेषेत्याह॥ प्रियः प्रियपदेन तदना
गमनजन्यदुःखातिशयो विस्यंव्यज्यते॥ अद्यापि एतावत्कालप्रतीक्षितोऽपि न समागतो नागतइ
तिकारणोत्॥ प्रायोवाकुल्येन परामन्यां प्रपेदे प्राप्तइत्यर्थ इतिभावः॥ प्रायः पदं प्रियतमे एतादृगत्र चिताच
रणकारित्वं॥ अन्यथासंगभत्यत्वंच व्यंजयति॥ संपदं भावनया तदयएव तिष्ठतीति व्यंजयति॥ परापदमी
र्ष्यावत्वं ध्वनयति॥ इत्थं अमुनाप्रकारेण॥ एवं च प्रकारांतरेणापि विचारः सूच्यते॥ चेतसि मनसि एवं चिं
तयं त्यपि विचारयंत्यपि सखीं वयस्यां व्रीड्या लज्जया न पृच्छति सखीपदं प्रश्नार्हतां द्योतयति तद्वत्वे पि
प्रश्नाकरणेन लज्जाया मतिशयो व्यज्यते॥ किंच दीर्घमायतं श्वसितं न दधाति सखीज्ञानभियेति भावः
किंच कितेभीति चंचलं न प्रेक्षते पूर्ववदेव भावः॥ यद्वा विचारप्रवणतयेति भावः॥ कथं तर्हि वर्त्तत इत्याह के
वलं एकं॥ किं चित्यल्पकपलाण्डुपाण्डुररुचिं किंचिन्मनाक्पक्वः परिणतः यः पलाण्डुः कन्द विशेषः तद्वत्पाण्डु ॥७२॥

रुणं एवं शालिनो मम भस्मतपते तत्र आडूषणमेवस्यादित्यत आह॥ श्रीकण्ठेति॥ एवं च यथा सकलजनसंताप
जनकगरलगिलनं भूषणमेवतत्रवसंजातं॥ तथा विरहिजनजीवनविनाशनमदननाशोपीति व्यज्यते
ननु एवं मेकरा विनाशितोपि पुनर्जीवनमवाप्नवानिति तद्विनाशोऽनर्थक इत्यत आह॥ भस्मलिप्तेति
एवं चेदानीं त्रिशूलेन तथा आदि विदारणपुरस्सरं मारणीयो यथा न पुनरेतज्जीवनमिति ध्वन्यते
ननु तथापि त्रिभुवनाभिरामस्य कामस्य विनाशे मम कल्याणमेवस्यादित्यत आह॥ शिवेति॥ एवं च
कल्याणरूपस्य तव अकल्याणमसंभावीति॥ तद्वधेन का पि शंका कार्य्येत्यभिव्यज्यते॥ त्रायस्वश्रि
यंरक्षइति॥ पंकजदृशा कमलनयनया॥ पंकजपदं मालिनतामावेदयति साच चिंताविशेषणं॥ भ
र्गस्य भर्जते अग्निना स्मरमिति भर्गः स्मरहरः तस्य स्तुतिः स्तोत्रं च के क्रियते स्म भर्गपदं मदनविनाशसा
मर्थ्यं ध्वनयति॥ भर्गस्तुतिकरणेन ● न स्वः कामो न पीडयिष्यतीति धियेति भावः॥ अत्र अप्रस्तुतप्रशं
सालङ्कारः॥ सचकाव्यलिंगानुप्राणितः॥ ५९॥ परकीयां विप्रलब्धामुदाहरति॥ दत्वेति॥ का विस्तां विश
त्याह॥ धैर्य्यभुजंगमूर्द्धि धैर्य्यमेव भुजंगः सर्पः॥ अन्यैरनाक्रमणीयत्वादिति भावः॥ तस्य मूर्द्धि
शिरसि चरणे पादौ दत्वा निःक्षिप्य धैर्य पदं त्यागानर्हतां गमयति॥ भुजंगपदं क्रूरतातिशयं द्योतय
ति

॥७३॥ रिमतिमत्त्वं ध्वन्यते॥ यद्वा किं प्रतिषेधवाचिकुत्सितनिषिधवचनेऽसौ प्राणेश्वरः किं कुद्धो वर्त्तत इति काक्वा नव
र्त्तत इत्यर्थः॥ प्राणेश्वरपदेन प्राणापराध एव कुपितत्वं युक्तं॥ ननु उदासीनासमीचीनवचसीतिव्यज्य
ते॥ अस्माविव्यनेनानन्यसाधरणविवेकित्वं व्यज्यते॥ एवं चा नागमनहेत्वभावेप्यनागमनचिन्ता
तिशयं व्यंजयति॥ इत्थं अमुनाप्रकारेण चिन्तयन्तीति शेषः॥ काप्यनिर्वचनीयगुणेन वोढा नीरजमुखी
ऊढं धत्तं यन्नीरजं कमलं तद्वन्मुखं यस्या नवा तरुणी चासौ ऊढनीरजमुखी चेति विग्रहः॥ नवेति पदेन मद
नवत्तया चिन्ता योग्यत्वं व्यज्यते॥ ऊढपदेन स्थानभ्रष्टत्वं तेन क्लिष्टत्वं घोत्यते॥ नीरजपदं सुकुमारतामावे
दयति॥ यत्तु न वोढा चासौ नीरजमुखी चेति विग्रह इति तन्न मध्यत्वानुपपत्तेः॥ ऊढपदानर्थकतया चाप
त अव्याख्यानमेव॥ वस्तुतस्तु न वोढ तत्कालापहृतैमेवेत्यर्थः॥ एवं चाप्युवाकुलत्वं व्यज्यते॥ अक्ष्णोर्नेत्रयोः
कर्णसुवर्णकेतकरजः पातोपघातबलात् कर्णयोः श्रोत्रयोः शोभनवर्णकेतकपुष्पयोरवतंसीकृतयो
र्यद्रजस्तस्य यः पातः पतनं तेनोपघातः पीडा तन्निषाद्रजः पदेन सूक्ष्मतां सा च शीघ्रनिःसारणायोग्य
तां ध्वनयति॥ पातपदमबुद्धिपूर्वकतां गमयति॥ वाष्पोदकं मुंचति॥ लयाविरतत्वं ध्वन्यते॥ एवं च छले
न दुःखजाश्रुगोपनेन लज्जावत्वं सखीप्रेषणादिना मदनवत्वं तेन च मध्यात्वं व्यज्यते॥ प्रेषितसखीपरा ७३

त्तेः प्रायेन चिन्तवत्त्वाउत्कात्वमिति॥ अत्रस्फुट एवालंकारः॥ २० ॥ प्रौढामुत्कामुदाहरति॥ भ्रातरिति॥ भो निकुंज भ्रा
तस्त्वं च सर्वमनीषितसम्पादकत्वात्॥ तथा भो सखि चूतपिपुष्पलते सखीत्वं च उद्दीपनभावतया प्रियतमस्य स
स्मिन्नासक्ति विशेषविधायकत्वादिति भावः॥ तथा वन्धो रसाल सुहृदाम्र॥ आम्रश्चूतो रसालोऽसावित्य
मरः॥ सुहृत्त्वं च दोलाद्यत्याहितसहनादिभावः॥ तथा मातस्तमस्विनि जननिरूपे रजनि॥ विभावरी तमस्वि
न्यो रजनीत्यमरः॥ मातृत्वं चैवं विधवकुकार्य्यगोपनकृत्त्वादिति भावः॥ तथा पितस्तिमिर जनकरूपां
धकार॥ पितृत्वं रजनीसंयोगित्वात्॥ तत्क्रियमाणमदपराधगोपनसाहाय्यसम्पादकत्वाच्च यत्नना
थ तये यं रजन्यपेता दशाकार्य्यगोपनसम र्पेति भावः॥ अत्र भ्रात्रादिशब्दाः सम्बन्धिकतया स्वपराप
सीदेतिप्रत्येकमन्वेति॥ तावता किमित्यत आह॥ नीरधराभिरामः सजलजलदकान्तिमनोहारी दामोद
रः कृष्णः नीरधराऽभिराम इत्यनेन रजन्यामन्येन ज्ञानापरिचयत्वं तेन चागमनसौकर्य्यं व्यज्यते॥ दामोद
रपदं बन्धनं तद्व्यसनशालित्वं गमयति किन्न समाजगमनसमागतवानिति॥ एवं च किंचित्स्वल्पं किं
चिदित्यनेनावश्यकथनीयत्वं ध्वन्यते पृच्छामि तत्कथय॥ इदमपि प्रत्येकान्वयि॥ एवं चात्र वने भवन्त
एव तत्रापि च मत्सम्बन्धिन इति प्रश्नकरणे कथनोभयौ चित्यं व्यज्यते॥ इतरत्स्पष्टम्॥ अत्र वन्धो रसा

॥७४॥ लइतियुक्तः पाठः॥ ६९॥ परकीयामुत्कामुदाहरति॥ स्नातमिति॥ कापिसखीवक्ति॥ हे सखीतिसंबुद्धिरध्याहर्त्त
व्या॥ तदानुपालनं त्वेतुसन्ध्यानरात्रिस्त्वं॥ तज्ज्ञोत्कण्ठातिशयं पक्षे चिरक्तताभावेदयति॥ वारिदवारिभिः
एवं च पङ्किलेः पिमार्गे गमनेन क्लेशातिशयः॥ पक्षे चात्यन्ततपस्विताध्वन्यते स्नातं एवं च वर्षासाधन
संपादितमितिद्योत्यते॥ किञ्च घने निबिडे कानने वने॥ काननं वनमित्यमरः॥ वासो विरचितः कृतः॥ घ
नपदं जनसंचारायोग्यतां तस्याच भयशालितां पक्षे वैराग्यवार्त्तां व्यंजयति॥ किंच शीतैः शीतलैरित्यर्थः
चंदनबिन्दुभिः॥ श्रीखण्डद्रवपृषतैर्मनसिजो मदनः॥ पक्षे मनः कल्पना विषयः देवः आराध्य इतिया
वत्॥ समाराधितो विधिना सेवितः॥ कुमुद्योकस्यापि दृग्विषयतामाभवत्विति धियावर्षास्वपि शीतल
चन्दनानुलेपनमिति शरीरे व्याशक्त्यभावो द्योत्यते तेन च प्रेमातिशयो व्यज्यते व्यापकत्वेन व्रतत्वं पुष्टे
श्चंदनबिन्दुभिरिति पाठेऽपि शैत्यं शीतलत्वं ध्वन्यते॥ किंच रजनी रात्रिः जागरणव्रतेन निद्रानकरिष्ये इ
तिसङ्कल्पेन नीता अतिक्रान्ता॥ किंच व्रीडा लज्जापि प्रियतमप्राप्तिप्रतिबंधकीभूते तिभावः॥ पक्षे इ
ष्टप्राप्त्यागादितिभावः॥ दक्षिणा कृता सङ्कल्पपुरस्सरं त्यक्ते त्यर्थः॥ दक्षिणापदं पुनरनुपादेयतां सा
चातिशयितासक्तिं व्यनक्ति इत्थं किं तपः तप्यते शरीरमनेनेति तपः क्लेशजातं तत्सर्वं किं किं न कृतं ॥७४॥

हरिणा हृचिः कांतिर्यस्यास्तां कपोलस्थलीं गंडतटीं धत्ते बिभर्त्ति विरहवशादिति भावः। पक्वपदेन शोभातिशयो
द्योत्यते॥ वस्तुतस्तु पक्वपाण्डुरपदयोरन्यतरदनर्थकमाभाति॥ अत्र संशयालंकारः॥ ५९॥ मध्यामुत्कामुदाहर
ति॥ आनेतुमिति॥ काचित्को चित्प्रत्याह॥ प्रियसखी प्रिया चासौ सखी च प्रेष्ठितेति भावः॥ एवं चानयनप्रयत्न
वत्त्वं द्योत्यते॥ आनेतुमर्थाद्दयितं किमु न गतेति काक्वागतैवेत्यर्थः॥ यत्तु न गतेति यथाश्रुतमेव व्याचख्यु
स्तन्न प्रियपदासंगतेः॥ ननु मार्गप्रतिबन्धवशादेव नागता भविष्यतीत्यत आह॥ भीतीभुजङ्गात्किं त्विति
भुजङ्गात्सर्पात् किमु भीतः काक्वा न भीतेत्यर्थः॥ तथाविधधैर्यरूपशालिनो न भुजङ्गभीतिरिति भावः॥ यद्भु
जङ्गाद्वेश्यापतेरिति व्याख्यानं तत्स्वीयात्वहान्यापत्त्याऽपव्याख्यानं॥ ननु कोपोक्तिवशादेव नागतइत्यत
आह॥ क्रुद्धः किं प्रतिषेधवाची॥ इति प्रतिषेधवचनं कुपितः किमिति काक्वा न कुपितइत्यर्थः॥ एवं च रसाभि
ज्ञस्य मय्यासक्ति विशेषवतस्तस्य निषेधवाङ्मात्रेण न कोपिको प इति भावः॥ ननु किमर्थमागंतव्यमित्य
तआह॥ असौ प्रियतमः प्राणेश्वरः प्राणस्वामी किमु न वर्त्तते नास्तीति॥ काक्वा प्राणेश्वरोऽस्त्येवेत्यर्थः॥ वि
प्रकृष्टेप्यसावितिनिर्देशेन प्राकृतनात्यन्तयोगो द्योत्यते॥ प्राणेश्वरपदेनावश्यकप्राणदुःखनिवारकत्वमा
वेद्यते॥ सेवकदुःखं स्वामिनैव निवार्यत इति लोकिकम्॥ वर्त्ततेइतिलटा इदानीमपि प्राणपीडापरिहारिका

॥७५॥ वंध्याचक्षेत्याह॥ तदभिधानादर्शनादनुपादेयम्॥ प्रियागमननिर्णयोत्तरसमयसुरतसामग्रीसम्पादनानिपु
णत्वंवासकसज्जात्वमित्यर्थः॥ अतएव॥ मुदावासकसज्जास्वंमण्डयन्त्येष्यति प्रियइतिप्राञ्चः॥ तस्याश्चे
ष्टामाह॥ मनोरथेत्यादि॥ मनोरथः मानससमानाकल्पनाजातमित्यर्थः॥ तत्रमुग्धांवासकसज्जामु
त दाहरति॥ हारमिति॥ काचित्कोचिद्गत्याह॥ तारकान्तिरुचिरं॥ तारकावत् अतिरुचिरम्॥ अत्युज्वलं
हारंमुक्तावच्छिरवाहारोमुक्तावलावितिविश्वः॥ गुंफतिसन्दर्भति॥ मुक्ताशुद्धौचतारःस्यादित्यम
रः किंचकांचीलतांकांचीमेखलालतेवतांगथ्नातिसन्निवेशविशेषापन्नांकरोति॥ किंचदीपेन्य
स्यतिस्थापयति॥ किंतुएकंतत्र दीपभाजनेवकुलस्निहंवकुलतैलंनदत्तेनदत्ताति॥ भाविसम्प्रका
शप्रियकरग्रहणादिलज्जयेतिभावः पुनःकिंचेत्यर्थः॥ वासकस्यदश्यतेऽस्मिन्निति वासःवासए
वेतिवासकःप्रासादइत्यर्थः तस्यआलीनांतत्सम्बन्धिसखीनांनिगूढामितिशेषःकामानुरूपां
क्रियांमदनानुरूपांइच्छानुरूपांवाक्रियांसामग्रीसंधानारजनौरात्रौकस्याप्यन्यस्यज्ञानं
माभवत्वितिधियेतिभावः॥ वस्तुतःप्रियागमननिश्चयोत्तरकालोपलक्षकरजनीपदंकुर्वती
एवंचसार्वकालिकेकेलिप्रासादस्यसखीसमूहंप्रत्यपिसुरतसामग्रीगोपनकारितयाऽतिशयि ॥७५॥

तलज्जावत्वंध्वन्यते॥ यत्तुवासकस्यप्रियागमनवासरस्यरजनावित्यन्वयइतितन्न तथाभिधानद
र्शनात्॥ साविस्मेरमुखी॥ साचितिर्यक्कू अन्यलज्जयेतिभावः॥ स्मेरंसहासंप्रियागमनमुदेतिभावः
मुखेवदनंयस्याःसानवोढसुमुखीमुग्धाऽङ्गनादूरात्समुदीक्षतेविलोकयति॥ अर्थात्प्रियपद्धतिमि
त्यर्थः इतरस्पष्टम्॥ वस्तुतःवासकस्यरजनौउच्यतेऽस्मिन्प्रियेणसहेतिवासःवासएववासकः
प्रियसन्निधानस्थिंत[illegible]सम्बन्धिरात्रौकामानुरूपांस्वाभिप्रायानुरूपांइतिकश्चित्॥ हारंगुं
फतीत्यादिरूपां॥ आलीनांसखीनांक्रियांकर्त्तव्यतांसाविस्मेरमुखीकथमेवातिधूर्त्तामदन्त
र्गतमप्यकुर्वन्इतिधियेतिभावः॥ नवोढसुमुखीदूरात्तत्सखीपरिहासभियेतिभावः॥ समुदी
क्षतेसम्यक्पश्यतीत्यर्थः॥ ६४॥ मध्यांवासकसज्जामुदाहरति॥ शिल्पमिति॥ काचित्कांचित्प्र
त्याह॥ कुतुकात्निप्याकुतूहलोत्कुतुकंतुकुतूहलमित्यमरः निरपेक्षतयेतिभावः॥ शिल्पंकला
कौशलं॥ शिल्पंकर्मकलादिकमित्यमरः॥ दर्शयितुंप्रकटयितुं अन्योपेक्षयेतिभावः॥ कल्हारह
रणीसौगन्धिकानांहारवत्मुक्तावलीवत्स्रक्मालातांहारपदंगुच्छादिवैचित्र्यद्योतनार्थंकरोति
किंच्चचित्रप्रेक्षणएकैतवेन॥ चित्रस्यआर्थाद्धारभित्तिस्थस्यप्रेक्षणमवलोकनंतस्यकैतवेनकपटेन

॥७६॥ चित्रपदं विलोकनीयतां द्योतयति॥ किमपि ईषत् तिर्य्यक् इति यावत् लज्जयेति भावः॥ द्वारदेहलीं समुद्वीक्ष्य
ते विलोकयति॥ प्रियागमनजिज्ञासयेति भावः॥ किंच सहचरीम् एषा तिगीषामिषात् सहचरीणां या निरू
पणानि तेषां जिगीषा जेतुमिच्छा तस्या मिषात्॥ भवद्भूषणाद् अधिककान्तिभाञ्जि मद्भूषणानि इति
कथयेत् इति भावः॥ नवं नूतनं आभरणं॥ एकत्वम विवक्षितं गृह्णाति॥ इत्थं पूर्व्वोक्तप्रकारं पद्मदृशः क
मलनयनायाः॥ चरितमाचरणं प्रतीक्ष्य ज्ञात्वा॥ प्रतीक्ष्येति पदं चेतोभवस्याप्यदृश्यतामावेदयति
पदं संततनिगूढत्वं चेति तस्य द्योतयति॥ स्मरः मदनः स्मेराननः किंस्मिताननः॥ प्राप्तोऽयमत्युत्
ज्ञासयइति धियेति भावः॥ एवं चाधिकमदनबाधावत्त्वं व्यज्यते॥ यद्वा स्मेरं सहासं आननं मुखं यस्य कथ
मियं सखीसमूहमपि प्रतारयतीति विस्मयेनेति भावः॥ अमरज्ञातः॥ एवं चकैतवादिपदं लज्जाव
त्वं स्मेराननादिपदं समदनत्वं ध्वनयति तस्मान्मध्यात्वं॥ ६५॥ प्रगल्भां वासकसज्जामुदाहरति
कृतमिति॥ काचित्स्त्री विश्वस्त्याह॥ वपुषि शरीरे भूषणं अलंकरणं कृतं सम्पादितं किंच चिकुर
धोरणी॥ चिकुराः वालाः॥ चिकुरः कुंतलो वाल इत्यमरः॥ तेषां धोरणी संख्यानविशेषः समु
दायो वा धूपिता॥ अधिवासिता॥ किंच शयनसन्निधौ पर्य्यंकनिकटे स्रक् मुक्तावीटिका संभृतिः ॥७६॥

अपितु सर्व्वमपीत्यर्थः॥ तथापि एवं कृतेऽपि सः प्रियतमः अद्यापि यामिनीचरमसमावध्यपि नेत्रातिथि
र्नेत्रावसेक्यनयनगोचर इति यावत्॥ एवं च यत्र दृग्गोचरतामात्रमपि न तत्र॥ कुत्रालिंगनचुम्बनादिति
भावः॥ कथं न किमिति न तथा चानागमनकारणं कथये इति भावः॥ एवं चैतादृशक्लेशविशेषेणापि न मद्
गात्रगोचर इति मन्दभाग्यताभिव्यज्यते॥ अन्योऽपि स्नानादिपूर्वं सकामो देवतामाराधयतीति लौकि
कम्॥ स्नानवननिवासस्ना॥ कल्पिकाधिदेवतार्च्चनरजनीजागरणादक्षिणान्तव्रतविधौ नेकृतेऽपि सः
सकलजगत्कर्तृत्वेन प्रसिद्धः परमात्मा क्षणमपि न नयनगोचरो जायते तत्कथयकेनोपायेन भावीति
गुप्तपरपुरुषाभिलाषवत्तया परकीयात्वं उत्कात्वमत्यन्तस्फुटम्॥ ६२॥ वेश्यामुत्कामुदाहरति॥ कथ
मिति॥ कश्चन कंचन वदति॥ कान्तः कामनाविषयधनदायित्वादिति भावः॥ कुञ्जं संकेतितमिति भावः कथं किं
निमित्तं न समुपैति॥ आयातिइत्थममुना प्रकारेण चेतसि चिरकालं चिन्तयन्ती विचारयन्ती धनाभिलाषात्
पतदश्रुधारा पतन्तियः निअश्रूणि तेषां या धाराः ताः अस्रावपत् पातयामास॥ बहुतरं रुरोदेति भावः
इतरत्स्पष्टम्॥ ६९॥ वासकसज्जां लक्षयति॥ अद्येत्यादि॥ प्रियवार इति प्रियागमनवासर इत्यर्थः॥
वारः सूर्य्यादिवासरे इति विश्वः॥ वारपदं निश्चयोत्तरकालोपलक्षकं॥ यत्तु वासको वार इति नाम्नि वासकश

७७ सहोक्तिरलङ्कारः॥ ६६॥ चेष्टासउक्तं मनोरथमुदाहरति॥ आवयोरिति॥ कापि स्वच्छन्दक्रीडाभि
लाषिणी वक्ति॥ आवयोः मम प्रियस्य च॥ अस्मदोपुवावेङ्गिवचनइत्यादेशः॥ अंगयोः श
रीरयोः द्वेते द्वयोर्भावोऽद्विता सैव द्वैतं द्वे विध्यमित्यर्थः॥ तस्मिन्सति भयः पुनर[illegible]पि विरहविघ्न
वः॥ विरहेण प्रियवियोगेन विप्लवः दुःखं भावीति शेषः॥ अस्तु तर्हि प्रियैक्यमेवेत्यत आ
ह॥ अद्वैते प्रियेण सह[illegible]भेदस्फीतं अतिशयशालि परस्परप्रसादेनेति भावः॥ स्मि
तहसितं च इत्यपरं॥ अन्योन्यवीक्षणं साकूतपरस्परावलोकनं न स्यात् न भवेत्॥
एवं चाद्यनारीनरेश्वरसादृश्यं भवत्विति ध्वन्यते॥ एवंविधाभिलाषस्य स्वच्छंदमरक्त
त्विनमनोरथत्वं॥ अत्र संदेहालङ्कारः॥ सर्वत्र चेष्टायाः व्यंगानुदाहरणदत्रैवेत
दुदाहरणमयुक्तमिति प्रतिभाति॥ यद्वा मनोरथिकनायकं प्रत्यैवेयमुक्तिः॥ ६७॥
परकीयां वासकसज्जामुदाहरति श्वश्रूमिति॥ काचित्कां चित्प्रत्याह॥ श्वश्रूपेति
जननी छलेन॥ अतिप्रभाते यामात्सदनेमहोत्सवविलोकनाय गंतव्यमस्तीत्या
दिकपटेन स्वापयति निद्रापयति वकुलप्रकाशतया[illegible]तापकतया च नायातिभ ७७

वत्याः निद्रेत्यादि कपटेन प्रदीपांकुरं दीपप्ररोहं॥ अंकुरपदं सूक्ष्मतां सा चाल्पप्रकाशकतां[illegible]
व्यंजयति॥ तिरोधत्तेमित्यान्तरितत्वेनाच्छादयति॥ एवं च प्रियागमनस्यौत्कट्यातिशयो ध्व
न्यते॥ किंच सौधकपोतपोतनिनदैः प्रासादकलरवबालशब्दैः॥ एवं च सौधसंबधोत्कीर्त्त
नेननेकच्छंतेन चान्यपानाशंकनीयत्वं व्यज्यते॥ पोतपदेन वारंवारं शब्दकरणे चित्त
ध्वन्यते॥ संकेतिकैः संकेतसंबंधिचेष्टितैः अहमत्रास्मीति ज्ञापकमित्यर्थः शब्दव्या
पारं एकवचनं एकरूपतां द्योतयति धत्ते अंगीकरोति॥ एवं च कपोतपोतनिनदरूप
वाद्यं नान्यद्रूपं हृत्वा॥ प्रकटपरपुरुषानुरागो व्यज्यते॥ किंच शश्वत्पार्श्वविव
र्तिताङ्गलतिकं शश्वत् निरंतरं पार्श्वाभ्यां पार्श्वभागाभ्यां विवर्त्तिता परावर्त्तिता तल्पो
भयप्रान्तविलोकनार्थमिति भावः॥ अंगलतिका गात्रयष्टिर्यत्र क्रियायां तथा॥ लोल
कपोलद्युति लोलंती चंचला परिवर्त्तनैरिति भावः॥ कपोलद्युतिर्गलद्भूषणयत्र क्रि
यायां तथा॥ प्रियागमनसंभावनासंतोषेतामुखस्यातिप्रसन्नतयेति भावः॥ तल्पा
ति केशयनप्रान्ते कापि कापि प्रदेशे प्रियधिया जारागमनसं[illegible]या करां बुजं कर कम

७८ ले अभ्युत्थानपदं प्रियस्मृतिजन्यखेदखिन्नत्वं ध्वनयति न्यस्यति शनैः स्थापयतीत्यर्थः॥ अत्र रूपका
लङ्कारः॥ स चापह्नुत्यनुप्राणितः॥ ६८॥ सामान्यवनितां वासकसज्जामुदाहरति॥ चोल
मिति॥ काचित्कांचित्प्रत्याह॥ नीलनीचोलकर्षणविधौ॥ आकर्षणकाले चोलं कूर्पासकं चो
लकः कूर्पासकोऽस्त्रियामित्यमरः॥ याविध्यप्रार्थयिष्यामि॥ इदमग्रेप्यन्वेति॥ नीलपदं घ
नान्धकारगमनयोग्यतां ध्वनयति गौराङ्गित्वं वा विधिपदमाकर्षणे वश्यकर्तव्यतां द्यो
तयति॥ किं च चुम्बने चुम्बनसमये चूडामणिं केशपाशभूषणरत्नं॥ पुनः किं चेत्यर्थः॥
कुचयोस्तनयोः करार्पणविधौ करार्पणसमये कांचनीं सुवर्णनिर्मितां कांचीं मेखलां
अर्पणपरं मर्दनावसरे अन्याद्भुतवस्तु यो नेच्छावत्त्वं ध्वनयति॥ एवं विधिपदोपादा
नादत्रापि तस्यैवोपादानमयुक्तमिवाभाति॥ इत्थं एवंकृते वासनया चंदनचर्चिते॥ श्री
खण्डमिश्रैः मृगमदैः॥ कस्तूरिकाभिः॥ मृगनाभिर्मृगमदः कस्तूरी चेत्यमरः॥ अंगा
नि अवयवान्॥ अंगं प्रतीकोऽवयव इत्यमरः॥ संस्कुर्वती॥ अधिवासयती वारांग
ना वेश्या वारेषु कांतागमननिश्चयोत्तरसमयेषु यद्वस्तु मनोरथं अभिलाषविष ७८

कस्तुका निरगशकलानि वीटिकाश्चयेतयोः संभारः कृता सम्पादिता॥ एणीदृशा हरिणनेत्रया॥ ए
वं च मार्गप्रेक्षणाकातरक्षणत्वं द्योत्यते॥ हरिणीदृशेति प्रागप्यन्वेति॥ भवने केलिसदने॥ एत्य
आगत्य एवं च प्रियपद्धतिदर्शनाय पुनर्गमनमावेद्यते॥ देहत्विषा शरीरकान्त्या करणभूतया स्फुर
त्कनककेतकीकुसुमकान्तिभिः॥ स्फुरंत्यः शोभाशालिन्यः॥ एवं च कनककेतकीकुसुमानां स्वतो न शो
भाशालित्वमिति द्योत्यते॥ याः कनककेतकीनां पुष्पदीप्तयस्ताभिः॥ दिनं दिवसरूपं समयं दुः निषि
द्धं तिरस्कृतमिति यावत्॥ दुः स्यात्कष्टनिषेधयोरिति विश्वः॥ अकारि कृतं प्रबंधप्रकाशरूपस्यापि
दिवसस्य देहसंबन्धिकनककेतकीकुसुममालादीप्तिस्तिरस्कारकारितया अतिशयितकान्तिवत्ता
देहे ध्वन्यते॥ यद्वाकृतमित्यादिषु णिजर्थे लक्षणा॥ भवनं एत्य देहशोभाशोभिकनककेतकीपु
ष्पमालादीप्तिभिः॥ दुर्दिनं कुष्टदिनं अकारि॥ कष्टं चातिवाहितुमशक्यतया॥ अथवा देहत्विषा
कनककेतकीकुसुमकान्तिभिः॥ अर्थात्सुरतसामग्रीत्वेन संपादितकेतकीकुसुमदीप्तिभिर्दुर्दि
नं॥ मेघाच्छन्नदिनं स्फुरत्सप्रकाशं अकारि॥ प्रियस्यागमनसौकर्यायेति भावः॥ एवं च कनक
केतकीकुसुमदीप्तीनां प्रकाशकतया दुर्दिनत्वसंपादकत्वमसंभवीति दूषणमपास्तम्॥ अत

७९ मुग्धात्वादिति भावः ॥ इति यद्यपि प्राणेश्वरस्य प्रियतमस्य मध्ये वनान्यत्र मनः चित्तं मज्जति लीनं भव
ति ॥ एवं च वहिर्गमनाभावो द्योत्यते ॥ अत्र किं कारणं तन्न जाने ॥ एवं चाहंकारो द्योत्यते ॥ अत्र कां
तिमावक्रिमास्फीतिमित्यत्रेमनिचू चिन्त्यः ॥ विभावनालङ्कारः ॥ ७० ॥ स्वमध्यां स्वाधीनपति
कामुदाहरति ॥ यदपीति ॥ कापि सखी वक्ति ॥ हे प्रियसखि यदप्ययं प्रियपरतिमहोत्सवे
क्लरो संभोगोत्सवसमयेन कारः निषेधः क्रियते उत्सवपदं निषेधायोग्यतां ध्वनयति ॥ यदपि करे
ण हस्तेन नीविधारणं निवस्त्रग्रंथ्यवष्टंभाः वटुवचनं ॥ वलादप्य निवार्य्यतां द्योतयति क्रियते
तदपि तथापि एष पतिः प्रियः पार्श्वदेशं अंगलग्नतां चे घटिन्न मुंचति तर्हि किं करोमि तत्त्वं ब्रू
येति भावः ॥ एवं चाहंकारो द्योत्यते ॥ मध्यात्वादि स्फुटमेव परित्यागहेतुभूतनिषेधादि कथनेऽपि
परित्यागाकथनात् ॥ विशेषोक्तिरप्यत्रालङ्कारः ॥ ७१ ॥ प्रौढा स्वाधीनपतिकामुदाहरति ॥ व
क्रस्येति ॥ कापि ॥ कथमन्यनायिकाकांतस्त्वदीयस्त्वं विदधाति न त्वदीयः प्रियस्त्वं करोती
ति वादिनीं सखीं प्रत्याह ॥ हे सखि कांतः अर्थादन्यांगनानां न प्रियं इति भावः ॥ वक्रस्य वदन ७९

स्य अधरपल्लवस्य अधरोष्ठकिशलयस्य पल्लवपदं कोमलतामरुणतां च व्यंजयति ॥ वचसः
वचनस्य हास्यस्य हसितस्य लास्यस्य तौर्य्यत्रिकस्य विलासस्य वा वा शब्दो विकल्पार्थः समु
च्चयार्थो वा धन्यानां प्रियेण स्वतः स्तुतिकरणादिति भावः ॥ अरविंदसुंदरदृशां कमलाभि
रामनयनानां स्तुतिं स्तवं तनोति विस्तारयति ॥ एवं च स्तव विरहाभावो ध्वन्यते मेम मदयित
स्य प्रियस्य का अन्या कामिनी स्वप्नेनापि स्वप्नावस्थायामपि किमुत जाग्रद्दशायेति भावः
क्षतिपथं श्रवणमार्गं चेतःपदमंतःकरणं पद्धतिर्दृक्पथं दृष्टिप्रदेशं न गच्छति न प्राप्नोति दृग्गादि
विषयो न भवतीत्यर्थः ॥ तस्मात्तस्य मत्प्रियस्य भेदग्रहः ॥ अर्थात्स्त्रिरनायिकाभ्यो भिन्नबुद्धि
एतस्या अपि स्तुतौ हेतुत्वात् कथमस्तु न कथमपीत्यर्थः ॥ स्तुतेः संप्रतियोगितयान्यकामि
नीदर्शनादिकमपेक्षितं तन्नदभावाच्च कथं स्तुतिः स्यादिति भावः ॥ एवं चान्यांगनापतीनां अन्या
८ ङ्गनादर्शनादिसत्त्वात् स्तुतिसंभवा स्त्वधन्यात्वं स्वस्मिंश्च ॥ धन्यतमात्वं व्यज्यते ॥ यद्याक्रा
पि प्रियतमो मे कोपादिकं विधेयमिति उपदेशकारिणीं सखीं प्रतिवक्ति हे सखि यास्तां अरविंद
सुंदरदृशां पद्माक्षीणां कांतः स्तुतिं तनोति तास्तु धन्या मे दयितस्यान्या कोपि स्वप्नेनापि दृग्गादि

८० विषयीनएवंचकोपोत्तरं तेनस्तुत्यादिनाप्रसादीकरणंकर्त्तुमशक्यं॥ एवंचतस्यतत्संबंधीतद्विषयकमिति
यावत॥ भेदस्यग्रहः मिथ्यतेहृदयमनेनेति भेदः कोपइत्यर्थः॥ तस्याग्रहः ग्रहणंग्रहः अंगीकारः कथमस्तु
नोचितेइतिभावः॥ एवंचयःकोपोत्तरं स्तुत्यादिप्रसादनामपिकर्त्तुंनजानातितादृशोसरलेमदेक
चित्तेनोचितंकोपकरणमितिव्यज्यते॥ अत्रप्रकृतेनस्वभावस्यायामप्यन्यांगनादर्शनाद्यभाव
कथनेनाप्रकृतज्ञांग्रहृशायातदभावः॥ कैमुतिकन्यायेनार्थादायततीतिप्रकृतार्थादप्रकृता
र्थापत्तिरलंकारः॥ सचान्यांगनातः स्वीयधन्यतमत्वे अव्यतिरेकानुप्राणितः एकस्यवस्तु
नोभावादन्यंवस्त्वन्यदापतेतदकैमु। त्यन्यायतःसाम्याद्दर्थापत्तिरलंक्रियतेतल्लक्षणात्
७२॥ परकीयोस्वाधीनोपपतिकामुदाहरति॥ स्वीयाइति। कापिसखीवक्ति॥ हे सखिय प्रियास्वा
स्वीयानांविलासक्कणत्कांचीकुंडलहेमकंकणभरणत्कार विलासेनहस्तादिचेष्टाविशेषेणक्कण
स तांशघा ~~[illegible]~~ नांकांचीकटिमेखलाकुंडलंकर्णभूषणंहेमकंकणंसुवर्णवाकुवलयंतेषांभर
णत्कारः शब्दविशेषः नविश्राम्यतिविरतिंनयातितासरोरुहदृशः कमलनयनाः स्वीयाःगृहे
सदनेगृहपदमायास्तभावंगमयतिसंतिविद्यंतेतथापिकाननेविपिनेएवंचभयजनकेऽपि ८०

यं॥ यद्वामनोरथं अभिलाषंयतत्यदर्थमित्यर्थः॥ नचितनुतेनकरोतितत्किं नकिमपीत्यर्थः
सर्वत्रैवेश्याभिलाषविषयःसर्वमितिभावः॥ ६९॥ क्रमप्राप्तांस्वाधीनपतिकांलक्षयति॥
सर्वैर्येइति॥ निरन्तराज्ञाकरप्रियत्वमित्यर्थः॥ लक्षणज्ञानायचेष्टामाह॥ येनेतिमदः
हर्षोत्कर्षः अहङ्कारः आत्मनिद्रुतराधिकत्वधीः॥ मुग्धांस्वाधीनपतिकामुदाहरति॥ म
ध्यइति॥ कापिसखीमाह॥ हे सखि मध्येकटौ कृशिमाकृशत्वंन॥ वयःसंधिमत्तयान्या
वयवोपचयाभावात॥ कृशत्वमस्फुटमितिभावः॥ किंचस्तनेकुचेगरिमागुरुत्वंनप्र
र्वएवाभिप्रायः॥ किंचदेहशरीरेकान्तिमालावण्यातिशयःसंपूर्णतारुण्यानुदयादि
भृदिभावः॥ किंचश्रोणौनितंबेपृथिमापृथुत्वंन॥ किंचगतौगमनेजडिमामन्दत्वंनकिंचनेत्रेन
यनेवक्रिमातिर्यगवलोकित्वंनपूर्वएवभावः॥ ननुसंपूर्णतारुण्याभावेऽपिकलाकौशल्यव
त्वादेवाशक्तिरित्यतआह॥ लास्येताण्डवत्रिकेलास्यंताण्डवत्रिकेनाट्येइतिविभ्रमः॥ दृढिमादृ
ढत्वं॥ अभ्यासविशेषइतियावत॥ यद्वाविलोलेदृढिमाचमत्कारविशेषइत्यर्थः॥ नकिंचवा
चिवचनेपरिमापटुत्वंश्लिष्टत्वारिकमितियावत्न॥ किंचहास्येहसितेस्फीतिमाप्रागल्भ्यंन

८१ तस्य स्रोतसि प्रवाहे स्खलतं लग्नं एवं च चपलत्वात् कादंबकले ॥ अत्र स्रोतोनुसरणं स्वतः इत्यमरः स्वतोनु
सरणरूपार्थस्य सागरे संभवाद समंजसमिवाभातीति स्रोतः पदोपादानं प सरोतं क्रमलं तद्वत् ॥ सुं
दराः रमणीयाः चमत्काराः येषामेतादृशा दृशोः दृष्टेः विभ्रमाः कटाक्षास्ययः ॥ विचित्रमन्मथकलावेश
ग्रहेतोः विचित्राः नानाविधोत्कर्षशालिन्यः मन्मथकलाः रतिकेलिकलास्तासां वेशग्रंथप्रायकष्टं तद्रूप
कार्य्यार्थं संति एवं च यास्तं दग्र विलाससमसमयमेव नानाविधकेलिकलाः परिस्फुरन्ति किमु वाच्यं
तासामंगसंगे इति भावः ॥ एतादृश्यः मृगदृशः हरिणनयनाः ॥ प्रतिमंदिरं मन्दिरं मन्दिरे वीप्सा
यामव्ययीभावः ॥ सन्त्येव एवकारेण सौलभ्यं द्योत्यते ॥ किं तु इदं चित्रं अद्भुतमाश्चर्य्यं यत् ॥ चि
त्तस्य हरं मनः स्वाधीनताकारि ॥ एवं च शरीरस्वाधीनताकरणमतिसुकरमिति व्यज्यते ॥ वित्तं व
सु पुनः एकं दातुं दत्तमेवेति भावः ॥ युवा तरुणः युवपदं सकलनायिकास्पृहणीयतां ध्वनयति
॥ मयि प्रयच्छत्येव ददात्येव ॥ एवकारेण निवारणकरणेपि नैवैरस्यतामावहतीति ध्वन्यते ॥ ए
वं च येन द्रव्यदानस्तुलमतरावश्योंग नास्त्यपापिताः संस्यस्य द्रव्यदानादिनापि मामेव भजते इत्य
हो किमत्र बीजमिति न जाने इति भावः ॥ अत्र किं कारणं तन्न जाने इत्यर्थः ॥ केचित्तु मय्येवेति पाठि ८१

तमेव व्याचष्टे युक्तं त्विति स्वीयापरकीयानां द्रव्यदानाप्रसक्त्यान्यावर्त्तकत्वाद्व्यर्थत्वापत्तेः ॥ न च
वेश्यान्तरं व्यावर्त्यमिति वाच्यं तस्यापि लक्ष्यत्वात् ॥ एवं च द्रव्यदानकारणस्य मन्मथकलावेशग्रस्
स्य पुनरुपन्यस्तत्वात् तत्कारणप्रश्नस्यानौचित्यमिति ॥ इष्टलाभमपास्तं अलंकारः पूर्ववदुल्लेयः ॥ ७४ ॥
क्रमप्राप्तामभिसारिकां लक्षयति ॥ स्वयमिति ॥ अभिसरणमभिसारणमन्यतरत्वमित्यर्थः ॥ उक्तं
च वार्त्तयाभिसरेत्कान्तं सारयेद्वाभिसारिकेति ॥ अस्याश्चेष्टामाह समयेति ॥ समयानुरूपं श्वेतनी
लादि स्वीयापरकीययोरभिसारव्यापारस्तुल्य एवेत्याह ॥ इतीत्यादि ॥ इति पूर्वोक्तप्रकारेण ॥ उभ
य्यार्थे ॥ प्रकृत एवमुद्दिश्य एव नान्य इत्यर्थः क्रमः अभिसारव्यापारः तथैव दर्शनादिति भाव इति
केचित् ॥ न स्तुतस्तु यथाश्रुतमेव साधु ॥ अलक्ष्यतासम्पादकस्य श्वेताद्याभरणग्रहणस्य स्वी
याभिसारिकासु असंभवात् ॥ अत एव परकीयामभिसारिकामभिधाय ज्योत्स्नाभिसारिकेत्या
दिभेदत्रयं तस्या एवाभ्यधायि ॥ अन्यथा ध्वांताभिसारिकोदाहरणे पञ्चेस्वैरिणीति पदोपादाना
संगतेः ॥ न च दिवाभिसारिकोदाहरणे पञ्चेभुक्तेति पदोपादानान्न स्वीयाभिसारिकायामप्येते भेदा
इति वाच्यम् ॥ भुक्तं तेजारेणापि सह संगतेः संभवात् ॥ ज्योत्स्नाभिसारिकेत्यादौ मात्रपदमवश्यं पर

८२ लीयम्॥ अन्यपाधांताभिसारिकोदाहरणपद्येऽत्तरव्यावर्त्तककेवलपदोपादानानुपपत्तेः॥ प्रकृतएव
क्रमः॥ भर्त्तुःशुश्रूषादिरूपः॥ मुग्धाभिसारिकामुदाहरति॥ इतीति॥ काचिल्लापिकावक्ति॥ हे मुग्धे वि
द्युन्नउदेवदूतीअकारिकेतिभावः॥ विद्युत्पदंक्षणमात्रस्थायि त्वंतद्वरी प्रगमनार्हा तां ध्वनयति॥ उ
पगता प्राप्तानन्वेतस्याअष्वोपत्यशालित्वात्कथमनयासह गंतव्यमतआह॥ रात्रिः निशेवसहचरी
सखीसहस्थायिनीसहतिष्ठति॥ तथाचानयेवसहगंतव्यमितिभावः॥ ननुसहचरीसत्वेपिशुभ
समयाभावेकथंगंतव्यमित्यतआह॥ जलदःमेघएवदैवज्ञःदैवंभाग्यंजानाति। ज्योतिर्विदित्य
र्थः॥ एवंचैतदुल्लंघनंनविधेयमितिध्वन्यते॥ स्वनेनशब्देनशुभांसमीचीनांप्रस्थानवेलां
गमनसमयंदिशतिकथयति॥ एवंचायमेवावसरःशुभइत्यभिधीयतेऽमुनाघनेन॥ झटि
तिप्रस्थातव्यमितिव्यज्यते॥ किंचतिमिरस्तोमोऽपिध्वांतनिकरोपि॥ स्तोमौघनिकरव्रातनि
त्यमरः॥ झिल्लीरवैः चीरीशब्दैः॥ भृंगारीचीरुकाचीरीझिल्लिकाचेत्यमरः॥ मांगलिकींमंग
लप्रयोजिकांवाचंतनोतिविस्तारयति॥ एवंचाचेतनतिमिरमपिमंगलवचनंवक्ति॥ किंपुन
सचेतनःसखीनिवहइतिव्यज्यते॥ अतः अयंआसन्नदयिताभिसारसमयः प्रियतमस ८२

विपिनेभयप्राप्त्याशक्तिविशेषोध्वन्यते॥ तथाचपुरपथेनगरमार्गे॥ एवंचवकुतरजनाकीर्णेतयोचित
लज्जयेतित्तत्परित्यागादारभ्यातिशयएवद्योत्यते तथासौधेउच्चसदनेएवंचोच्चतयाविधप्रदेशा
धारोहणेनसाहसकारिताव्यज्यते॥ तथाचसएवतथासखीसन्निधौसखीसविधे॥ एवंचसमीप
तरवर्त्तिसखीनिवहसमयविलोकनमुचितमनुचितंचेतिविवेकवैधुर्य्यंध्वन्यते तेनचोन्माद
स्तेनचसएवमांपरितःसमंतात्॥ भ्राम्यंतीभ्रमंतीएवंचैकत्रानवस्थित्याविभ्रांत्यभाववत्तेन
चसएवव्यज्यतेममवल्लभस्यप्रियस्यदृष्टिः॥ एकवचनमेकरूपतांव्यनक्तिनमुंचतिनत्यजति
अर्थान्मामित्यर्थः॥ अत्रकोहेतुः किंकारणं अत्रस्वीयाभ्यःस्वास्मिन्नाधिक्यप्रदर्शनेनतथास्वी
यासुतथाविधगुणरूपेकारणेसत्वेऽपिवल्लभदृग्भ्रमणरूपकार्य्याकथनेनतथात्मनिस्वी
यागुणातिरिक्तगुणज्ञाननिरूपतोनुप्रियदृग्भ्रमणरूपकार्योत्पत्तिकथनेनहेतुत्वनिर्णयेनच
व्यतिरेकविशेषोक्त्यस्फुटविभावनासंशयालंकाराणांसमुच्चयः॥ ७२॥ सामान्यवनितांस्वाधी
नपतिकामुदाहरति॥ संत्येवेति॥ सामान्यवनिसखीवक्ति॥ हेसखियासांस्वीयानांपरकीया
नांचसुधासागरस्रोतस्यूतसरोजसुंदरचमत्काराः॥ सुधायाःअमृतस्यसागरःसरित्पतिः॥

मीपगमनावसरः सेमयं ज्ञात ॥ ननु लज्जा रूपप्रतिबंधकवशात् कथं गंतव्यमत आह ॥ त्रपां लज्जां
अभिलषितप्रतिबंधकमितिभावः ॥ विमुंच सर्वात्मना त्यज ॥ लज्जात्यागेनैतादृशो वितसमये प्रि
यमभिसरेरितिभावः ॥ अन्यस्यापि गन्तुमप्युत्कस्य मुहूर्त्तादि कथ्यते ॥ इति लौकिकम् ॥ अत्र विधु
दादीनां तेषु दूतीत्वादिकल्पनेन रवाघभावेन च लुप्तोत्प्रेक्षाप्यलंकारः ॥ ७५ ॥ मध्यामभिसारिका
मुदाहरति ॥ भीतासीति ॥ नायकोनायिकां वक्ति ॥ हे तन्वि ॥ एवं च भारवाहनाक्षमत्वं तेन च कंपा
द्यंगीकारानो विरक्तं ध्वन्यते ॥ पथि मार्गे भुजंगात् सर्प्पात् परस्परशादिति भावः ॥ नैव भीतासि
भयं नैव प्राप्तासि ॥ यद्वा भीते वनासि एवं च तत्कार्यं कंपादि दूरापास्तमिति द्योत्यते ॥ पथि पदं
विस्पष्टदर्शनयोग्यतां ध्वनयति ॥ भुजंगपदमवश्यपरिहरणीयत्वं भयजनकत्वं वा व्यंजयति
मद्भुजस्य अपरिहारत्तीयस्य भयाजनकस्यैवेति भावः ॥ किमपि संगे ईषत्संगे एवं च गाढालिं
गने किं करिष्यतीति न जाने इति व्यज्यते ॥ कंपं वेपथुं अंगीकरोषि उरीकरोषि सात्विकभावोदया
दितिभावः ॥ किंच अंभोधरध्वनिभिः ॥ सजलजलदनिनदैर्वकुभिर्भयं करेरितिभावः ॥ अस्तु

८३ मितासि साध्वसेन प्रभासि ॥ अत्र नस्तुमितासि इति युक्तं ॥ मद्याविमर्द्दवचने एकस्मिन्भयाजनके इति भा
वः ॥ साचिवदना असि तिर्यक्नमितासि लज्जयेति भावः ॥ किमाचरामि किंकरोमि ॥ तथाचा
त्रैदैवमेव शरणमिति भावः ॥ अत्र भुजगादेर्भीतिहेतोरपि भयानुत्पत्तिकथनात् ॥ भीत्यहे
तुभुजगसंगादेर्भीत्युत्पत्तिप्रदर्शनाच्च विशेषोक्तिविभावना संसृष्टिरितरत्स्पष्टम् ॥ ७६ ॥
प्रौढामभिसारिकामुदाहरति ॥ स्फुरदिति ॥ कापि सखी दिनैवयमत्रागता नस्वाभिलाषेणे
तिवा दिनं नायकं प्रत्याह ॥ अथेति प्रश्ने प्रश्नकार्त्स्न्ययोरथो अथेत्यमरः ॥ यदि मनोरथः अभिला
षः स एव रथः स्यंदनः गमनसाधनमित्यर्थः ॥ मनोरथपदमत्यंतदूरगामितामावेदयति न
स्यात्तन्न भवेत् तर्हि स्फुरदुरसिजभारभंगुरांगी स्फुरंतौ विलसंतौ यौ उरसिजौ स्तनौ तयो
र्भारेण भंगशीलांगी नायिका उरसिजपदं दुर्वहत्वं व्यंजयति भंगुरांगीपदेन गत्ययोग्यता
ध्वन्यते किशलयकोमलकांतिना पल्लववत्मृदुलशोभाशालिना ॥ कुत्र कांतिमधिकमिव
भाति ॥ पदेन चरणेन निशासु रात्रिषु ॥ निशापदं उच्चावचप्रदेशज्ञानवैधुर्यं तत्तच कुलेश ८३

८४ ऽभ्यत एवेत्यत आह ॥ किंच विमार्ग एव अपथमेव सर्वदा त्वज्जनापरिचितमिति भावः ॥ मार्गः स
रणिः अस्मत्परिचितेति भावः ॥ एवं चास्य जनलोचनाविषयमार्ग एवास्माकं समुचित इति ध्वन्य
ते ॥ ननु तत्र संचराभावात् कथं क्रीडेत्यत आह ॥ विपिनं अरण्यं अन्यसंचारलेशशून्यमिति भा
वः ॥ तदेव वेश्मसद्म ॥ वेश्म सद्म निकेतनमित्यमरः ॥ एवं च क्रीडास्थानं विपिनमेवास्माकं अ
त्यंतोचितमित्यभिव्यज्यते ॥ अत्र प्रौढोक्तिसिद्ध दृष्टांतस्य तद्धर्मादिकल्पनमिति तल्लक्षणलक्षित
दिगमनादिसौकर्याद्यसमर्थस्यापि मेघादेस्तत्त्वेन कल्पना प्रौढोक्तिः ॥ अभिसारिकां प्र
तिगमनादिसौकर्यसाधारणकार्यदर्शनान्मेघादेः सवितृत्वादिसंभवाच्च नापह्नवो वा समासो
क्तिः लुप्तोत्प्रेक्षा च स्फुटमन्यत् ॥ ७८ ॥ सामान्यतः परकीयाभिसारिकामुदाहृत्य तद्विशेषमु
दाहरन् ॥ ज्योत्स्नाभिसारिकामुदाहरति ॥ चंद्रोदय इति ॥ काचित्कांचित्सख्याह ॥ चंद्रोदये
चंद्रप्रदं गमनसाहाय्यसंपादकं तयाल्हादविशेषजनकतां व्यंजयति ॥ अंगकेषु अंगेषु कं
प्यगात्रेषु प्रियविरहतनुतयेति भावः ॥ अनुकंपायां कन् ॥ चंदनं मलयजं विन्यस्य आलि
प्य ॥ श्वेतं हि श्वेतवस्तु भेदप्रतीतिप्रतिबंधिका भवतीति धिया चंद्रकरनिकरसरूपं चंदनधारण ८४

मकरोदिति भावः ॥ एवं च तनुतराणामंगानां विरहपांडुरतया चंद्र[illegible]सिधितावद्दृश्यत्वेपि चं
दनलेपसंपादनेनात्यंतादृश्यत्वं ध्वन्यते ॥ विरहस्य स्थितत्वात्सम्यगिदमलक्ष्यतासंपादकमेत
दिति धियेति भावः ॥ अथवा एतावंतं समयमनेनानंगेन मामपीडयदिदानीं किमनेन विधेयमिति
धियेति भावः ॥ विनिर्गतायाः प्रियं प्रत्यभिसृतायाः ॥ मनश्चित्तं निहंतुं व्यापारयितुं ॥ एवं चैतत
हशा गर्वं चिरकारिप्रधानभूतचित्तव्यापादनेनैतन्नरेन्द्रियजातमपि व्यापादितमिति व्यज्य
ते ॥ मदनोपि मन्मथोपि तदुर्वं मसहमान इति भावः ॥ करेण किरणेन अर्पितं च क्रमशः ॥ कौं
तान् कुंदपुष्परूपान् बाणान् शरान् ॥ पुष्पशरत्वात्तस्येति भावः ॥ बिनति वर्षन्नेव दध्ये ॥ अ
न्योपि हि हस्तेन शस्त्रादिकं धत्त इति लोकोक्तिः ॥ विरहदुःसहत्वं कुंदपुष्पाणि विकाशयति स्मेति
भावः ॥ एवं च तद्दृश्यं तस्याः श्वैत्यविशेषसंपादकतयानुगुणमेव जातमित्यव्यज्यते ॥ उपजा
तिर्वृत्तम् ॥ इंद्रवज्रोपेंद्रवज्राश्रितचरणत्वात् ॥ ७९ ॥ तमिस्राभिसारिकामुदाहरति ॥ नो
त्तुंगैरिति ॥ काचित्कांचित्सख्याह ॥ स्वैरिणीजननु विलोचनयुग्मं स्वैरिणीजनो व्यभिचारिणीज
नस्तस्य नेत्रद्वंद्वं जनपदं सर्वलोकमेकरूपतां द्योतयति ॥ विलोचनपदं सख्या आहकतां व्यंज

८५ यति॥ अंबुजैः सूर्यविकाशिभिरित्यर्थः॥ नोपमेयं कमलैश्चंद्रविकाशिभिरित्यर्थः॥ नोपमेयं तत्र हेतुमाह
॥ दिनकरस्य सूर्यस्य इन्दोश्चंद्रस्य उदये यस्य न विकाशः प्रफुल्लता किंतु केवलं निविडं इत्यर्थः तेनास्ति
अंधकारे विकाशः॥ व्यतिरेकालंकारोऽत्र॥ अत्र नोदयेस्यादावुभयत्रैकेनन्ना चारिता पूर्व द्वितीयो
पादानमतिधानमाभाति॥ पूर्वं तु नञ्द्वयाभावे चकारोपेक्षास्यादिति तदभावे न तदुपादानं॥ मीलि
तं यादृग्भिरामत्ताधिकरस्यत्र वाक्यान्तर्गतयच्छब्दस्य न तच्छब्दापेक्षा॥ ८०॥ दिवाभिसारिकामु
दाहरति॥ पल्लीनामिति॥ पल्लीनां घोषाणां अधिपस्य स्वामिनः॥ पल्लीनामधिपस्य चेति वहुवच
नैकवचनाभ्यां भाग्यातिशयशालित्वं ध्वन्यते॥ यद्वा निमंत्रणापरिहार्यत्वं व्यज्यते॥ पंकजदृशांक
मलनयनानां॥ बहुवचनमादरातिशयं व्यनक्ति॥ पर्वोत्सवामंत्रणे॥ पर्वणि चैत्रादिपोर्णमा
स्यादौ उत्सवः कौतुकं॥ तदर्थमामंत्रणे जाते पल्ल्यधिपांगनाभिः संपादिते सति॥ सद्मजनाः
गृहजनाः मिथः परस्परं कृतमहोत्साहं संपादितः॥ महोत्साह उद्योगो यत्र क्रियायां॥ पुरः अ
ग्रे सांतरमित्यर्थः॥ प्रस्थिताः प्रचलिताः पल्ल्यधिपसदनमित्यर्थः॥ अन्तरे एतत्समये स
ख्याजं सकपटं किंचिद्व्यपदिश्येत्यर्थः॥ स्थितयोः अवस्थितयोः क्रीडार्थमित्यर्थः॥ विहस्य ८५

गमनवत्त्वं ध्वनयति वहुवचनेनत्वयदीयं भवल्लिवंधमात्रादेवागतास्यान्नादरकृतादिदिवन वहु
धारं तस्मादभिलाषेणैवागतेति व्यज्यते कथं केनोपायेन गंतुं भवत्सन्निधिं प्राप्तुं सहेत समर्था
भवेदित्यर्थः॥ एवं च केवलस्वाभिलाषवलेनैवेयमागतेति द्योत्यते॥ अत्र अनुमानं तु काव्या
दिः कारणाद्यवधारणमिति लक्षणलक्षितः॥ प्राप्तिरूपकार्येण मनोरथरूपकारणादनु
मानालंकारः स्पष्टमन्यत॥ ७७॥ परकीयामभिसारिकामुदाहरति॥ रभसादिति॥ कापि क
थमेतादृशावसरेऽभिसर्तुमुचितमिति वादिनीं सखीं प्रत्याह॥ हे सखि रभसात् प्रियदर्श
नोत्कंठातः॥ अभिसर्तुं प्रियं प्रति गंतुं उद्यतानां कृतोद्योगानां वनितानां अनुरागविशेषव
वतीनां नायिकानां वनितासर्वानुरागायां च योषितीत्यमरः॥ वारिदो जलदः वहलपंकसं
पादक इति भावः॥ स एव विवस्वान् भास्वान्॥ पंकितमार्गभूतासंपादक इति भावः॥ एवं चा
न्यजनसंचारायोग्य एव पथि अस्मद्गमनमनुचितमिति व्यज्यते॥ किंच अंधकारं ध्वांतं मार्ग
प्रति दर्शनैवंधकमिति भावः॥ तदेव अर्चिस्तेजः मार्गदर्शकमिति भावः॥ एवं चान्यजनमार्गदर्शन
प्रतिवंधकमेतास्माकमननुगुणमिति व्यज्यते॥ ननु पंकिलेपि पथि वहलांधकारराजावपि केभ्यि

८६ रित्यमरः ॥ यः कंचुकबंधः कूर्पासकग्रंथिः ॥ तेन बंधुरा नम्रा ॥ बंधुरं बंधुरे नम्रे चेति विश्वः ॥ अत एव च
लंतीतिर्यक्प्रसारिणी वक्षोजकुंभौ ययेति कुचकलशादीर्घतायत्र ॥ किं च स्फुरज्जदीधितिस्फुर्जंतीत्य
तः सप्रकाशा दीधितिः कांतिर्यत्र ॥ अंचलचंचलचाल्या चकवल्भषा विशेषादिति भावः ॥ किं च विस्फुरफ
गमनं ति ॥ विस्फुरंती सविशेषाग्रा तिर्यंत्र शीघ्रगमनोत्सुक्यादिति भावः ॥ अत एव चलच्चामीकरालंकृति
चलतीचंचला चामीकरालंकृतिः सौवर्णालंकरणादिर्यत्र ॥ सर्वाण्येतानि क्रियाविशेषणानि ॥
वाराङ्गनावेश्या कस्यापि कृतिनः अनिर्वचनीयसंपत्तिशालिनः ॥ यत्तु कृतिनः कुशलस्येत्याकुल
त्र कृतासंगतेरसंगतम् ॥ कीदृक्कुंजगृहे केलिनिकुंजसदने गृहपदं निरंतरवसतिशालितामावे
दयति प्रयाति अभिसरति ॥ ८२ ॥ निरूपितं परिशेषयति ॥ मुग्धाया इत्यादि ॥ आकाशवंशप्रागल्भ्यं
मुग्धायाः इवेति नज्ञाताज्ञाधान्येनेत्यर्थः ॥ प्रववल्पयति कांनवमीनायिकां निरूपयितुमभिक्र
मारचयन् प्राचीनसंमतिं दर्शयति ॥ प्रस्थानमिति ॥ अनवहिताग्निसमयसंमतवै देशगम
तिपतिविरहविधुरनायिकासंजीवितमुपदिशति ॥ हे जीवितजीवितपदं प्रियत्वं त
त्तसदुपदेशार्हं त्वं व्यंजयति ॥ वलयैः कंकणैः ॥ प्रस्थाने गमने कृतं ॥ एवं चतात्कालिकवि ८६

रहजनितनितांततापवशादेकमपि कंकणं न स्थाने स्थितमिति भावः ॥ कृतमिति क्तप्रत्ययेन
निवारणानर्हत्वं व्यज्यते ॥ किं च अजस्रं निरंतरं ॥ प्रियसखैः प्रियतममित्रैः अस्रैरश्रुभिः ॥ लो
हितास्रं रक्तमित्यमरः ॥ गतं विरहदाहवशादिति भावः ॥ प्रियसखपदेन गमनौचितीं ध्व
नयति ॥ यद्वा प्रियसखैरिति वलयान्वयि ॥ अस्रैः अश्रुभिः अजस्रं गतं अविरतं प्रचलि
तमित्यर्थः ॥ किं च धृत्या धैर्येण क्षणमपि नासितम् क्षणमपि न स्थितमित्यर्थः ॥ धृत्ये
ति स्त्रीलिंगेन मत्पत्नीसाकारित्वोचित्येः पितदकरणेन तव तु विजातीयस्य तदनुचित
मिति व्यज्यते ॥ किं च चित्तेन मनसा पुनः प्रथमत एव गंतुं व्यवसितुं उद्युक्तं एवं च संभृत
सामग्रीकतया प्रियसमस्थितिमत्वैः पितत्यक्त्वा स्थित्यभावो व्यज्यते इति वैवलया
दयः ॥ प्रियतमे कांतया तु देशांतरे गंतुं निश्चित [redacted] चेतसि कृतमित्यादिक्तप्रत्यया
र्थविरोधादसमंजसमिवाभाति ॥ प्रकृतमाह गंतव्ये सति प्रियतममंतरावस्थातुम
शक्यत्वादिति भावः ॥ प्रियसुहृत्सार्थः ॥ प्रियसुहृदां कांतमनिमित्राणां वलयादीनां सा ज
र्थः समूहः ॥ एवं च तत्रापि प्रियसुहृत्वेनैतद् संगतिरुचिता गमनौचित्यगमने चानौचि

८७ त्वपि व्यज्यते॥ किमुत[illegible]स्त्र व्यज्यते व्यज्यते॥ एवं चावश्यगन्तव्यत्वे पश्चादवस्थित्या संघप
रित्यागस्त्वत्वं तानुचितइति भावः॥ यद्वा वागतपति विदेशगतिमतिरंग(नौ)नायकं प्रत्या
ह॥ हे जीवितप्रिय जीवितप्रिय जीवितस्य प्रियनमत॥ प्रिय एवं च त्वत्प्रस्थितो मदप्रस्थिता
वपि जीवितप्रस्थितिरुचिततरेति ध्वन्यते॥ [illegible]द्वा जीवितं प्रियं यस्येति एवं च स्वस्य हम
दनयनेपि जीवितनयनमनुचितमिति व्यज्यते॥ अथवा जीवितात् जीवनात्॥ प्रिय एवं चै
तादृशोपदेशात्त्वमावेद्यते॥ प्रियतमे॥ अर्था द्वलयादीनां त्वयियातु निश्चितचेतसि कृत
निर्णये सति वलयादयः समं युगपत्॥ प्रस्थिताः कृतप्रस्थानाः एवं च तवापि गंतव्ये सति
सुहृदां साधं सुहृदां सार्थः सुहृत्वं च त्वत्प्रस्थानेन तान समं समयप्रस्थानकारणात्॥ किमुत स्त्र व्यज्यते
एवं च त्वत्प्रस्थानज्ञानमात्रादेव वलयादिभिर्ग[illegible]तं जीवितेन नापि गंतव्यमिति विप्रोपर
श्रीनरूपवेद्याद्योत्यते॥ यद्यपि प्रियपदस्य पुनरुपादानेन कथितपदत्वं दोषस्तथा
पि॥ यथोक्तानवकवनेऽनत्वयोगुणस्तथा[illegible]त्राप्येतादृशानायिकावाक्ये कथितपदत्वं
गुण एव॥ यत्वेतस्यं प्रियतमगमनोत्तरकालीनजीवितोपदेशपरतयापि संभवतीति ८७

रूपमेतेप्रतारिताइतिधियेति भावः॥ प्रभुदांतं अवरोधं॥ प्रभुदांतश्चावरोधश्चेत्यमरः॥ गतयोः प्रा
प्तयोः खिन्नकपोलयोः॥ परस्परांगसंगलाभजातसात्विकभावोदयादिति भावः॥ यूनोः तरुण
योः स्त्रीपुंसोः॥ पुमान् स्त्रियेत्येकशेषः॥ कोप्येव सर्वतो विलक्षण इत्यर्थः॥ करग्रहः आक्षे
पः विजयते सर्वोत्कर्षेण वर्तते॥ एवं चालिंगनेऽवसानाभावो व्यज्यते॥ ननु ज्योत्स्नाभिसारिकादयो भे
दाः परकीयाया एव न सर्वासामित्यत्र किं विनिगमकमिति चेत्॥ प्रकरणमेवेत्यवेहि॥ कथमन्यथा
एतत्संभोगदुःखितां इत्यादि वक्ष्यालिखत् कथं च स्वैरिणीति पदमादाय लक्ष्ये इत्यलं रचयावाखिल
स्येन॥ ८९॥ वेश्याभिसारिकामुदाहरति॥ लोलच्चोलेति॥ गतिविशेषवशाच्चलं यच्चेलमंशुकं ते
नतस्यवा चमत्कृतिश्चमत्कारो यत्र॥ चोलेति पाठे नामैकदेशवचनन्यायेन निचोलइत्यर्थः॥ लो
लपदस्थानानवस्थिते द्योतयति तच्च गमनौत्कंठ्यं॥ किं च प्रविलसत्कांचीलताझंकृति॥ प्र
विलसंती शोभाशालिनी तरंगसंगादिति भावः॥ या कांचीलता मेखलावल्ली तस्याः झंकृतिः
स्वरविशेषो यत्र॥ लतापदं स्पर्शनसमसमयकामुकोन्मादकृतां व्यनक्ति॥ यद्वा संकृतोऽभ्रम
रततिः तानुकारित्वं॥ किं च न्यंचन्न गाढः॥ यद्वान्यं चन्नीचैर्गच्छन्॥ न्यङ्नीचैरवबर्हैस्त्रसु

नवकृतार्थसिद्धमनुगुणमिति दिक् ॥ कातरनेत्रतया चिरतरं बद्धांजलि याचितः पश्चा
दर्धकृतपल्लवेन विधृतो निर्व्याजमालिंगित इत्याक्षिप्य समस्तमर्थमघृणो गंतुं प्र
वृत्तः शठः पूर्वं प्राणपरिग्रहो दयिततया सुकेऽस्तनो वल्लभ इत्युपन्यसनीयमित्याकूतत
यातुं निश्चितचेतसि कृतगमननिर्णये न तु गते इत्यर्थानवबोधनिबंधनं ॥ द्वितीय
व्याख्यायां तु न कापि शंकेति दिक् ॥ ८३ ॥ ननु काप्येनायिका स्वैवैतस्या अनेनभोवो
स्त्वितीयत आह ॥ तस्या इति अग्रिमसमयविदेशगामिपतिका प्रोषितपतिकादि
त्रितयमेदवती सन्निहितपतिकत्वात् ॥ स्वाधीनपतिका इव तु ॥ एवमग्रेपि लक्ष्य
माह ॥ लक्षणं त्वित्याभिलक्षणं तु उपलक्षणम् ॥ प्रोषिष्यतिकेति निर्देशः ॥ लट्टिवस लक्ष्य
तेरुष्यादित्यसिद्धेर्लृटः शाके तिशया देशान्तरं प्रवत्स्यत्यतिकेति वक्तव्ये मुग्धा प्रा
वत्स्यत्पतिकाम् उदाहरति ॥ प्रातोऽपि रइति ॥ काचित्सखीं प्राह ॥ प्रातःरभीरु श्वरपदं विये
गान हल्लेप्ययं अयाति निर्गमाय विदेशगमनायाकिमपि किंचिदपि विरहदुःखोद्रेक
जनकं दोषरोधादिति भावः ॥ नत्स्यतिसति पद्वृत्ति क्षामोदरी कृशोदरी क्षामा पदं

८८ उक्तिप्रत्युक्तिपांडित्यस्थितेस्त्यभाववत्त्वं तत्र मुग्धात्वं ध्वनयति ॥ यद्वा विरहवशान्निर्गत
प्राणं कंठस्थितेस्त्यपराधाभावं गमयति ॥ वरतनं आनतनं आनमयांचकार नम्रीचकार त
स्मीं भवमन्वेस्पर्धः ॥ लज्जया किमपि वक्तुमशक्यत्वादिति भावः ॥ तस्यास्तत्स्मीं अवस्थि
तावपि सखीयत्नमकरोदित्याह ॥ आलीत्यादि ॥ आलीसखीपुनः शब्दस्त्वर्थकः निभृ
तेषु संक्रियाविशेषणमेतत् ॥ लेता निकुंजविशिष्टयाचकानां विशेषणमसमवधाने
विशेष्यमात्रपरतेति न्यायात् ॥ निकुंजपदेन देशमात्रं लक्ष्यते एवं चस्वजातीयत्वे ह
लेललता परिवर्त्ततया क्रियमाणकपटस्य प्राकट्याऽनर्हत्वं द्योत्यते ॥ एत्य आग
त्य उन्मत्तकोकिलकलध्वनिं उन्मनं पिकमनोहरशब्दं एवं च वसंतसमयमवगत्या
यं स्पास्यतीति धियेति भावः उन्मत्तपदं वसंतीयत्वं द्योतयति ॥ कोकिलेति पुल्लिंग
निर्देशः कामिनीस्वनशंकाभावमथवा स्वशब्दसंजीतीयशब्दतया आमाएयाभा
वं ध्वनयति ॥ स च सखी चातुरीचमत्कारं आततान विस्तारयामास एवं च भाविवि
रहविकलतयैकशब्दानाकर्णनेऽपि नकाचित्क्षतिरिति ध्वन्यते ॥ ८४ ॥ मध्यं जोषं ८८

८९ कमस्तिनवेतितेनिश्वसितमितिव्यज्यते॥ अश्रुणामप्राकट्येनलज्जावत्त्वंमरणेयाचमदनबाधा
वत्त्वमितिमध्यात्वंध्वन्यते॥ उत्प्रेक्षालंकारः॥ ८४॥ प्रोढांप्रोष्यत्पतिकामुदाहरति॥ नाय
मिति॥ काचिदंगनाचारवतीगमनोद्युक्तंश्रीकृष्णंप्रत्याह॥ भोयदुपतेयदूनांपतिः तत्त
वाधनंश्रीकृष्णएवंवासमत्यालनानर्हत्वंव्यज्यते॥ यद्वामिथ्याभाषणेनानर्हत्वंपारलौकि
कसकलवस्ताभिज्ञत्वंवाध्वन्यते॥ सुभ्रुवांस्त्रीणांसुभ्रुपदंपुरुषाणामेनपाविधवि
रहाभावंव्यनक्ति कटुवचनंचनायकस्यव्यंजयति॥ अयंवियोगज्वरः विरहसन्तापः
अयमित्यनेनापलापानर्हत्वंद्योत्यते तनुत्यागोऽपिशरीरपरित्यागोऽपि तनुपदंस्व
हणीयतांगमयतिनस्तुचतित्यजतियतस्तेनहेतुना विहितांजलिः बद्धांजलिः एवंचस्त्री
नत्वंद्योत्यते अहंएतज्जामिपश्यंकरोमिसत्यंयथार्थंसत्यमितिपदंशपथवक्ता
मावेदयतिवद ब्रूहि किंतदित्यतआह॥ उरकंचंदनंपटीरंकुसुमैतांमूलंयतत्वंधुमि
सुहृक्कि कटुवचनंनिषेधायोग्यतांव्यंजयतिदीपतेन्तोदेशेनेतिभावः॥ तत्त्वंवंअ
तएवएतल्लोकद्वयपरत्रपरलोकेऽपिकिमुविषज्वालावलीदुःसहंगरलज्वालाजाल ८९

दुःसहंस्यात॥ विरहिजनस्येहयथैतद्दाहकंतथैवकिंपरत्रेतिवक्तव्यमितिभावः॥ एवंचम
वल्लभस्यानोत्तरमस्मत्प्राणपरित्यागइतिद्योत्यते॥ अत्र अत्रेत्यादिवक्तव्येनवल्लभनात्व
द्वियोगोऽवश्यंमन्मरणकारणमितिविज्ञायवित्तेनयथोचितमाचरणीयमितिवस्तुव्य
ज्यते॥ ८५॥ परकीयांप्रोष्यत्पतिकामुदाहरति॥ न्यस्तमिति॥ काचिदंगनानायकंप्र
त्याह॥ हे कांतसंतुद्विपदानुपादानंतुदुःखाक्रांतमावेदयति॥ पन्नगमूर्द्धिपन्नगस्य
विषधरस्यमार्गस्थितस्येत्यर्थः॥ मूर्द्धि मस्तके॥ पन्नगपदंभीतिमन्नतोद्योतयति
न्यस्तंस्थापितं॥ किंचगुरोःश्वसुरादेःभक्तिरूतरापेक्षयामाननीयतयाविभागेन्से
वावातदातत्कारित्वमित्यर्थः॥ भक्तिर्विभागेसेवायामित्युभयत्रविश्वः॥ अत्यंत
विमुक्तान्यका॥ गुरुपदंमाननीयतांव्यंजयति॥ किंचनीतिःस्वकुलमर्यादास्वक
अपास्तान्यस्तमित्यादित्रयेणतुच्छिद्रवेकत्वंव्यज्यते॥ इतिभवतःहेतोःषष्ठीहेतुप्र
योगइतिषष्ठीमयाकिंनदुःकृतंअपितुसर्वमित्यर्थः॥ अहोदुरितदुःकृतमित्यमरः॥
अतःत्वयिप्रस्थितेसतिप्रस्थानोद्युक्तेसति अंगानामवयवानांशतयातनाअस्तु

९० स्यतीअवेदनेत्यमरः॥ किंच नयनयोः लोचनयोः कोपि अनिर्वचनीयः रौरवः रौरवस्य नरकविशे
षस्यायं रौरवः॥ तत्संबंधीत्यर्थः॥ तदुक्तं तपनावीची महारौरवरौरवाइत्यमरः॥ क्रमो विन्या
सः किंच मनसः॥ चेतसः कुंभीपाकपराभवः॥ कुंभीपाकेन नरकविशेषेण पराभवः पीडा भ
विष्यतीदृंद्वस्तु नंसमंजसं॥ अंगादीनां प्रत्येकापराधितया प्रत्येकं दण्डइतिभावः॥ एवं
च युक्तैव कुकृति नो नरकावाप्तिरितिभावः॥ यत्तु रौरवः रूरोः मृगस्यायं॥ कृष्णसाररू
रूत्यं कुरित्यमरः॥ क्रमः गतिः त्वदागमनसंभावनयैव सततः सततं विलोकनेनैव मरणं
भविष्यतीतिभावः॥ किंच कुंभ्यां कलश्यां कुंभीपदं निर्गमकठिनतामावेदयति पाकः प
चनं तदेव॥ पराभवः तद्विरहानलतप्ततनुस्थितेति भावइत्यर्थइत्याहुस्तदुक्ततफल
त्ववोधने साक्षादसमर्थमितिन चित्तचमत्कारमारोहति॥ समासोक्तिरलंकारः॥ ८७॥
सामान्यवनितां प्रोष्यत्पतिका उदाहरति॥ मुद्रामिति॥ काचिद्वारवधूः कांतं काचित्प्रत्या
ह॥ वारांगना वेश्या हे कांत वलयापायकं कंकणाय एकवचनमनेकेकंकणधारणसा
मर्थ्यं व्यंजयति मुद्रां अंगुलीयकं प्रदेहि वितर ननु वलयमेवास्तीत्यत आह॥ यद्यस्मा ९०

त्पतिकामुदाहरति॥ गंतुमिति॥ काचनकांतं विरहत्याह॥ प्रिये प्रियपदं विरहासहिष्णुतां ध्व
नयति गंतुं विदेशं यातुं वदति सति प्रवृत्तेति एणीदृशः मृगलोचनायाः एणीदृशइत्यने
न चंचलता तयाच विरहकातरता द्योत्यते दीर्घ आयतं दुःखवशादितिभावः निश्व
सितं तन्निःश्वासः॥ न तु निश्वसाः॥ नासीत्तन्नाभावत्॥ किंच नयनयोः लोचनयोः जलं अ
श्रु जमित्यर्थः॥ न तु जलानि न आविरासीत् प्रकटीबभूव प्रथमसमसमयसंजात
विरहमूर्छोद्रेकवशादितिभावः॥ किं तदा तत्रासीदित्यत आह॥ परं तु एतदस्मीदि
त्यर्थः॥ कचः केश कलापैकदेशः कचइवकेचः एवंचकचार्थितुल्यतया वाचने
सामर्थ्यं व्यज्यते मूर्छावशाच्चैलोचलविस्रंसादितिभावः॥ भालस्थली ललाटदे
शो समुपाजगाम अभिससार भालस्थलीमिति स्त्रीलिंगनिर्देशेन तां प्रतित
स्याभिसरणेनौचित्ये पितन्कारितयाकस्मिकत्वं आदितकार्यवत्तायां द्योत्य
ते ताभिर्वोत्प्रेक्षा मुखेनाह किं सुधावदुवाप्येआद्गुलिपिं ब्रह्मलिखितां दुष्याक्षरपं
क्तिं पठितुं वाचयितुमिव तस्यास्तत्रसत्वादितिभावः॥ एवं च एताव देवायुः किंचिदधि

९१ प्रसन्नाय वचनामृतैः प्रसन्नानि मनोहराणि वचनानि तान्येवामृतानि तैः अमृतपदं प्रा
णदात्वं व्यंजयति अतर्पिप्रीणितः ॥ किंच सुभगास्मितद्युतिपटीरपंकद्रवैः सुभगा समी
चीना या स्मितद्युतिः सैव पटीरपंकद्रवाः सरसचंदनानि तैः सुभगपदं उज्ज्वलत्वं द्योत
यति द्युतिपदं कांतस्वांतभयध्वांतनिवारकतामावेदयति पंकपदं गाढतां गमयति
द्रवपदं सारस्यतां व्यनक्ति अचर्चि चर्चितः किंच विलसद्विलोचनचमत्कृतैः अंबु
जैः विलसती प्रसन्ने ये विलोचने नयने तयोः या निचमत्कृतानि चमत्काराः कटाक्षा
इत्यर्थः तान्येवांबुजानि कमलानि तैः विलसत्पदं देदीप्यं ध्वनयति ॥ अंबुजपदं स
रसतां साच कोपाद्यभावं ध्वनयति ॥ अपूजि पूजितः ॥ अतएवान्याः स्त्रियस्तयेन
भक्तिविशेषो ध्वन्यते तेन चोत्तमनायिकात्वं ॥ एवं चैव प्रत्यक्षपरिदृश्यमानापराधे
भीतिभीतिरिति भूम्यैः प्रियेण प्रेयसि सुहृत्तुल्यतया कपटनालिंगिः खिलव्यापारका ता३
रितयोत्तमात्वं व्यज्यते अन्यत्रापि स्मसदने समागतः सुहृच्छीतलस्वच्छनलेचंद
नकुसुमैः संपूज्यते इति लौकिकं ॥ रूपकालंकारः ॥ ८९ ॥ मध्यमामुदाहरति ॥ कांते ९१

इति ॥ काचित्कांतं विलक्ष्याह ॥ सागसि सापराधे ॥ एवं च कोपकरणमुचितमिति व्यज्यते ॥ कांते नायके कंचु
कस्पर्शि चोलस्पर्शं कुर्वति सति सांत्वनाद्यकृत्वैवेत्यर्थः ॥ स्पर्शिपदं भयचकिततां व्यनक्ति साची
कृतग्रीवया वक्रीकृतकंधरया कोपवशादिति भावः ॥ तया सुभ्रुवनायिकया कोपवशादिति भा
वः ॥ तया सुभ्रुवनायिकया कोपकषायमन्मथशरक्रूराः कोपेन क्रोधेन कषाया आरक्ताः अत
एव मन्मथशरक्रूराः कंदर्पबाणकठिनाः ॥ तद्याम्नानां नेत्रे नपल्लवरूपत्वेनारक्तता ॥ यद्वा कोपे
न कषायितिः यः मन्मथस्तद्बाणवत् क्रूराः ॥ मन्मथपदं दुःसहत्तामावेदयति ॥ कटाक्षांकुराः
अपांगच्छटाः ॥ अंकुरपदं तीक्ष्णतां व्यनक्ति मुक्ताः प्रेरिताः किंच साकूते साभिप्राये चाटु
वचनरचनाकारिणि स्मारति दरहासकेसरवचो माध्वीकधारालसा ॥ दरं ईषत् हासो हसितं
प्रासादादिति भावः ॥ तदेव केसरं किंजल्को यस्मिन्नेवंविधं यद्वचो वचनं तदेव माध्वीकं मधु
मधुमाध्वीकमधूनोरित्यमरः ॥ तस्य या धारा प्रसृतिस्तया अलसा निर्भरा माध्वीकपदमु
न्मादजनकतां व्यनक्ति अलसपदं सविलासतां ध्वनयति ॥ काचन अनिर्वचनीया प्रीतिः क
ल्पलतेव कल्पलतावत् कल्पलतातुल्यत्वं च मनोरथसंपादकत्वादिति भावः महादानीकृ
तादत्ता इत्यर्थः ॥ प्रीतिः सर्वाधिकत्वेन दाने महती कल्पता पि सकेसरमधुधारानिर्भराभव

५२ ति॥ मध्यात्वं चात्रस्फुटमेव॥ ९० ॥ अथमामुदाहरति॥ प्रस्थानेइति॥ काचित्सखी नायिकां
प्रत्याह॥ तव प्रस्थाने प्रयाणावसरे निकटवर्तिकाशोकविटपविनाशकरणायेति भावः मु
खांभोरुहे वदनकमले अर्थात्त्वदीये कमलच्छायां कमलेनातपनिवा[illegible]वारणं॥ एवं चो
भयोरेकजातीयत्वेऽपि कमलेन त्वन्मुखातपवारणरूपसेवां विधाय कृतया प्रियस्याति
शयितप्रेमवत्ताव्यज्यते॥ यद्वा सजातीयेन सजातीयखेदापनोदनमुचितमिति ध्वन्य
ते॥ किंच शिशिरया शीतलया श्रीखण्डद्रवधारया श्रीखण्डस्य चन्दनस्य यः द्रवो रस
स्तस्य या धारा तया पुरः मार्गे अग्रिमपंथानं सिंचति तस्मिन्नतादृशेऽपि प्रेयसि॥ वि
द्रुमद्रवनदीरिंगत्तरंगभ्रमिभ्रांतक्लान्तसरोजपत्रसदृशा॥ विद्रुमाणां प्रवालानां वि
द्रुमो वल्लकीदले प्रवाले वालपल्लवे इति विश्वः॥ द्रवः निर्यासस्तस्य या नदी तस्या रिंगंतः
खेलंतः शोभाशालिन इत्यर्थः॥ तरंगास्तेषां भ्रमः आवर्त्तः तत्र भ्रांतं भ्रमणं प्राप्तं अत
एव क्लांतं ग्लानिमापन्नं यत्सरोजपत्रं कमलदलं तत्सदृशा या॥ विद्रुमपद्मारक्ततां द्यो
तयति॥ रिंगत्तरंगेत्यादिना चंचलत्वं व्यज्यते॥ पत्रपदप्राशस्त्यं व्यनक्ति॥ भूयः वारं व
हुतमित्यर्थः॥ दृशा दृष्ट्या कुड्मलितो यं प्रकटयसि॥ अत्र संवृतमनुपादानमनुचितकार्य ५२

द्रवद्वियोगं त्वदीयविरहं आसाद्य प्राप्य एतत् वलयं एकत्वमविवक्षितं सहसा अक
स्मादेव एवं च तदानीं यावत्त्वरा भावो व्यज्यते॥ बहिः हस्तात् इत्यर्थः यास्यति गमिष्य
ति॥ यद्वा वलयाख्य सौवर्णकंकणं यन्नतु गजदंतादिविनिर्मितवलयापर्यंतं सुंदरे हि यद्
स्मादेतत्सौवर्णग्रिमकंकणं हस्ताद्बहिः यास्यतीत्यर्थः॥ एवं च त्वद्विरहजाततनुतावशा
दाकस्मिककंकणपतनमेत्वन्मंगलैकचिंतनप्रवणमनस्कया मया तथैवावस्थातुमश
क्यमिति भावः॥ इत्थं अमुनाप्रकारेण निगद्य उक्त्वा विगलन्नयनांबुधारा निःपतदश्रु
परंपरा प्रियतमे कांतं न मम्रू अविवक्षितार्थः करयोः हस्तयोः द्विवचनं निर्मोचनान
र्हत्वं द्योतयति वभार दध्रे॥ ८८ ॥ उक्तानामेव पुनरुत्तमादिभेदमाह॥ अहितकारिण्ये
पि इत्याह॥ उत्तमामुदाहरति॥ काचित्कांचित्प्रत्याह॥ कुचविचित्रितोरस्थलः॥ कुचा
भ्यां विचित्रितं मुद्रितं उरस्थले यस्य अन्यांगनालिंगनादिति भावः॥ एवं च प्रत्यक्षाप
राधवत्ता व्यज्यते शयनं पर्य्यंकप्रदेशं आगतः प्राप्तः कांतः वामभ्रुवा सुंदरभ्रुवा
एवं च कौटिल्याभावो द्योत्यते॥ या[illegible]मं सव्ये प्रतीपे च द्रविणे चातिसुंदर इति विश्वः॥

मनुसहरति ॥ सांद्रध्वानैरिति ॥ काचिन्नायिकासखीनायकं प्रति वक्ति ॥ हे नाथ स्वामिन् ॥ ना
थपदं स्वेच्छाकार्यकारित्वं व्यंजयति ॥ सांद्रध्वानैः ॥ अनवरतनिःस्वनैः ध्वनिध्वानस्वनाइत्यम
रः ॥ मुखरित[redacted]दिशः मुखरिताः वाचालिताः दिशः ककुभो याभिस्ताः तोयदानां मेघानां
श्रेणयः पंक्तयः धारासारैः धारापातैः धरणि[redacted]वलयं भूमंडलं सर्वतः परित
प्लावयंति आप्लुतं कुर्वंति तेन हेतुना मत्सखी एवं चास्मद्धृदयसख्या नायिकेति ध्वन्य
ते ॥ युष्मत्क्रमे वृष्यभावधितमेव विपुलं सातिशयं स्नेहं प्रेम ॥ प्रेमस्नेहो प्रणयो हार्दमित्यम
रः ॥ वहति अंगीकरोति तथाविधो द्दीपकपयोदपंक्तिविलोकनेन मद्विरहमसहमा
नः प्रियोऽधुनैवायास्यतीत्युत्प्रेक्षते इति भावः ॥ तथा त्वं हे प्रिय तत्त्वं निस्नेहः प्रेमशून्यः
असि वर्त्तसे तदिदं विस्मयाय आश्चर्याय ॥ तथाविधानुरागशालिन्यां कामिन्यां भ
न वान्न नुरागी तत् किं कथं त्वं विप्रियत्वमिति विस्मय इति भाव इति प्राचः ॥ वयं तु तोयदप
दं भिन्नलक्षणकं तथा च भिन्नश्रेणयः ॥ अर्थात् सखी पंक्तयः सांद्रध्वानैः बहुतरो
पालंभवचनैः मुखरितदिशः ॥ एवं च सर्वत्रोपालंभकरणेन सर्वतः शंक्यमानत्वं नायि १३

कामभिव्यं[redacted]ज्यते ॥ धारासारः अनवरतप्रचलिताभ्रु धाराभिः धरणि[redacted]वल
यं भूमंडलं सर्वतः सर्वप्रदेशे प्लावयंति ॥ एवं चातिशयितदुःखमावेदयते ॥ तेन हेतुना
मत्सखी न तव ॥ विपुलं स्नेहमेव एवकारेण कोपलेशशून्यत्वमावेदयते वहतीत्युक्तं
यद्वा एवकारो भिन्नक्रमो वान्वेति हे नाथ एवं दशिक्षानर्हत्वं व्यज्यते त्वं निस्नेहो यदसि तदिदं मे
विस्मयायेति काकान विस्मयायेत्यर्थः ॥ एवं च बहुतरानेकसख्युपालंभरोदनाद्युपा
यवशान्नायिकायाः स्नेहवत्त्वं तव तु न कोपि तथाविधोपदेशकारीति तव स्नेहवत्त्वे
ति नास्माकं विस्मय इति भावः ॥ यद्वा श्रेणय इति स्त्रीलिंगनिर्देशेन नायिकासजातीय
तया तदभिमतत्वदागमनसंपादनाय मेघपंक्तयः सांद्रध्वानपुरःसरधारासाररू
पोद्दीपनं विभावादि यत्त्वं कुर्वंति तेनैव स्नेहासंपादकौत्सुक्यकारणेनैव मत्सखी भृ
टितित्वय्यभिमानपरित्यागपुरःसरतया युष्मत्क्रमावधितं स्नेहं करोति ॥ तेनैव स्नेहसं
पादककारणेनैव त्वं निस्नेहोऽसि तदिदं द्वयमपि मे विस्मयाय ॥ एवं च तथाविधपयो
दपंक्तिरूपसहायसत्त्वेऽपि युष्मत्स्नेहसंपादनाभावेऽपि स्नेहसंपादनमभिनव

५४ जलदागमनरूपोद्दीपनविभावकामिनीसरलहृदयपरिज्ञानरूपस्नेहसंपादनसलेपि
स्नेहासंपादनमितिद्वयंकौतुकावहमितिभावः॥ एवंचनायिकासरलहृदयत्वंतुदुर्हृद
यइतिसनिंदवचनरूपोपालंभोऽभिव्यज्यते॥ अत्रविशेषोक्तिर्विभावनाचालंकार
इतिब्रूमः॥ ६३॥ शिक्षामुदाहरति॥ सानंदमिति॥ काचित्सखीनायिकांप्रत्याह॥ हे आ
लिसानंदंवनमालिविलोकनाय श्रीकृष्णसंदर्शनाय॥ कुंजलतापिहितप्रदेशेनिर्गत्व
प्रयाहि॥ किंतुइतिवक्ष्यमाणंविचारयेथाः॥ विचार्यकिंतदित्यतआह॥ झंकारिणः
सशब्दाः॥ मधुलिहः भ्रमराः दिवसेदिनेभ्रमंतिसंचरंति एवंचलब्धवनाभिनवसौ ६
रभ्यलोलुपतयागतालिपटलीनिनादैर्यः कोपित्वांत्रास्यतीतिव्यज्यते॥ ननुरा
त्रावेवगंतव्यमित्यतआह॥ रात्रौपुनःनिशितचपलचंचुपुटाः॥ चपलानिचंद्रिका
स्वादलंपटानिचंचुपुटानित्रोटीपुटानियेषांते॥ चंचुस्त्रोटिरुभेसमेइत्यमरः॥
चकोराःपक्षिविशेषाः भ्रमंति॥ एवंचतववदनाभिनवचंद्रचंद्रिकापानायागत
चकोरचंचुतिनदैर्यः कश्चनत्रास्यतीतिध्वन्यते॥ अत्रतत्रेत्यधिकरणानुपादानंमधु ५४

कारित्वंनायिकायांध्वनयति॥ अधमात्वंस्फुटमेव॥ उपमालंकारः॥ ६१॥ प्रसंगात्सख्या
दीन्निरूपयितुंसखीकार्याणिविभजते तस्याइत्यादि उपालंभःसनिंदवचनंतमेनमु
दाहरति॥ स्तनकनकेति॥ काचित्कांचित्प्रत्याह॥ स्तनकनकमहीधरोपकंठे॥ स्तनौकुचौ
तावेवकनकमहीधरौ स्वर्णगिरी तयोरुपकंठः संनिहितप्रदेशः तत्रकनकपदंगौरत्वंव्य
नक्तिमहीधरपदंकाठिन्योत्तुंगत्वेव्यंजयति॥ उत्कंठपदमुपरिनायककरस्पर्शयोग्यत्वंध्व
नयति॥ मकरिकामिषात्॥ पत्रावल्यादिलिखनव्याजात् उल्लसत्प्रमोदंसरोमांचमि
त्यर्थः॥ कुचस्पर्शादितिभावः॥ प्रियकरपल्लवं प्रियस्यकांतस्यहस्तपल्लवं प्रियपदंलि
खनौचितींव्यनक्तिपल्लवपदमरुणतांसाचकाश्मीरादिलिखनौचित्यंद्योतयति॥
रहसिएकांते॥ एवंचनायककरकुचसंबंधौचित्यंध्वन्यते॥ लिखंतींसखींकमलमु
खीनायिकाएवंचसंतोषातिशयोव्यज्यते॥ कमलैःक्रीडासरोजैःजघानताडयामा
स॥ कथमन्यदेवलिखतीतिधियेतिभावः॥ यद्यप्येतत्परिहासोदाहरणमपिसंभ
वतितथाप्यत्रपरिहासस्यशब्दरूपत्वेनतदभावान्नतदुदाहरणता॥ ६२॥ उपालं

९५ त्र कइत्यर्थः इतिनिवेदयस्व कथयत[illegible] तन्नामग्रहणं कुर्व[illegible]ः तिभावः॥ इत्थंपूर्वोक्तप्रकारे
णसखीजनवक्तुः सखीसमूहवाक्यंजनपरमनिवारणीयतांव्यनक्ति॥ वचइत्येकवचनं
सकलसख्येकरूपतांगमयति साचावश्योत्तरदानार्हतांसद्यःशीघ्रंएवंचातुर्यम
भिव्यज्यते प्रतिपद्यअवगत्यसीतास्मितपु[illegible]तिभिः हास्यदीप्तिभिः॥ एवंलज्जाव
त्वमावेद्यते उत्तरयांचकार उत्तरमाचख्यौ॥ एवंचतथाविधहसितेनैवमत्प्रियतम
नामायमित्युत्तरितमितिभावः॥९५॥ प्रसंगात्प्रियपरिहासमुदाहरति॥ भ्रूसंज्ञ
येति॥ हेतन्वि सखी वयस्यांभ्रूसंज्ञयाकटाक्षविशेषेणदिशसि उपकरणसामर्थ्य
र्थमाज्ञापयसि॥ वाग्भिः वचोभिः किमितिनदिशसि इत्थंअमुनाप्रकारेण विहस्यए
वंचाधरदशनदशाज्ञानमावेद्यते मुरवैरिणि मुरारौ भाषमाणे वदति स[illegible]ति॥ एवंचा
निवारणीयत्वं व्यज्यते चिरायबहुकालंदशनव्रणदूयमानविंबाधरारक्षतक्लि
श्यमानविंबोष्ठी एवंचवचनरचनासामर्थ्यमभिव्यज्यते॥ राधाबदनंमुखंआनम
यांचकारनम्रीचकार लज्जावशादितिभावः॥ यद्वा चिरायवदनंआनमयांचकारे ९५
तियोजना॥ अत्रदशनदंशप्रदर्शनेनपरिहासः॥९६॥ प्रियप[illegible]रिहासप्रसंगात्प्रिया
परिहासमुदाहरति॥ दिव्यमिति॥ पार्वतीशिवंप्रत्याह॥ हे शंभो यत्यस्मात्मौलौम
स्तकेएवंचातिप्रेमआवेद्यते तेनचसाहाय्यकारित्वंसुरधुनीमन्दाकिनी॥ एवंचान्य
थाविधानसामर्थ्यंद्योत्यते॥ अतःवारिजलंदिव्यंशपथविशेषःकथंनयुक्तमित्य
र्थः॥ तथापावकःवह्निः॥ दिव्यंकथंयतः तत्विलोचनंविलोचयतितत्नयनंएवंचत्व
दभिमतविधाननिपुणएवायमनलइतिव्यज्यते॥ तथाअहिः सर्पःकथंदिव्यंयतः
सचअहिः॥ तवअंगेदेहे एवंचाहर्निशांगसंगशालिनो भुजगस्यतदधीनतयात्व
दभीष्टसंपादकत्वमेवेतिध्वन्यते॥ एवंचदिव्यादिविधानंपरिहृत्यहारायहारंस्ति
द्भवत्कृत्याह॥ तस्मादुतो॥ अद्यघृतविधौ घृतप्रसंगेएवंचदैन्याभावोद्योत्य
ते तेनचस्वस्मिन्नाधिक्यं इत्थंअमुनाप्रकारेणशैलभुवापार्वत्या एवंचकठिनहृ
दयत्वंध्वन्यते तेनचतर्जनताडनकरणप्रवणत्वं विहस्यएवंचपरिहा[illegible]सोव्यज्यते
लपितःउक्तः शंभुःशंकरः एवंचकल्याणकरणोन्मुकरमितिव्यज्यते वः भवतां शिवा

९६ यकल्याणाय अस्तु ॥ एवं च पार्वतीकृतस्मितपरिहासतया भयविहीनस्य कल्याणक
रत्वमुचितमिति ध्वन्यते ॥ २७ ॥ प्रसंगाद्दूतीं निरूपयति ॥ दूत्येति ॥ तस्य भावकर्मणीति प
त् तस्य व्यापारः रचनाविशेष इत्यर्थः तस्य पारंगमा तद्विषयनैपुण्यवतीत्यर्थः ॥ सा
किं क्रियावतीत्याह ॥ तस्या इति प्रथमोद्दिष्टत्वात् ॥ संघट्टनमुदाहरति ॥ अंचतीति ॥ का
चिद्दूती नायिकां प्रत्याह ॥ हे सखि एवं च हितोपदेशार्हत्वं द्योत्यते रजनी रात्रिः अंचति
समायाति किंच तिमिरं तमिस्रं उदंचति प्रकटीभवति ॥ एवं च गमनयोग्यता ध्वन्यते ॥
आगमने भयं दर्शयति ॥ च इत्यपरं मनोभूः मदनः एवं चानिवारणीयत्वं व्यज्यते चं
चति हर्षति विजयसाधनसिद्ध्येति भावः ॥ एवं च आगमनविषमशरः शितशरैस्त्वां
तर्जयिष्यतीति ध्वन्यते आगमने प्रतिज्ञाहानिरूपं बाधकांतरमाह ॥ उक्तं प्रतिज्ञातं
अप्यन्यायं सविधे गमनं न त्यज एवं च स्ववचनपरित्यागादन्यत्किमपि बाधकं नास्ती
ति ध्वन्यते यत्कर्त्तव्यं तदाह तस्मिन्नायके मनः रक्तं अनुरागि विरचयेदं युक्तं इती
तिपाठे नायिकोक्तिरियं ॥ हे दूति रजनी अंचति प्राप्नोति दंति मिरं उदंचति उदेति मनो ९६

लिङादीनामेकत्रावस्थितिं व्यनक्ति ॥ एवं च तथागंतव्यं यथान्यकेनापि ज्ञायते इति व्यज्यते ॥ य
था ॥ झंकारिणः मुखराः मधुलिह इव मधुलिहः उर्जनाः दिवसे भ्रमंति ॥ झंकारिपदेन
विज्ञातमर्थं सर्वत्रावेदयिष्यंतीति द्योत्यते ॥ मधुलिहपदे ■ नोद्धत्यं वक्तव्यावक्तव्य●
विवेकविधुरत्वं पापभीरुत्वाभावश्च व्यज्यते ॥ रात्रौ पुनः चपलचंचुपुटाः पिशुनाः
पक्षिरात्रिजाततनिखिलवृत्तांतावेदकाः चकोरा इव चकोराः ॥ चकोरा हि यथा रात्रि
व्यापारे लोकस्योदरपूर्त्तिं कुर्वंति तथा रात्रिव्यापारप्रवणाः यामिका इत्यर्थः ॥ भ्र
मंति ॥ एवं च दिवा रात्रावपि दुर्जनयामिकादिबहुभयबलात् गमनमनुचितमित्यव
गत्य यदि वसितुं तदागच्छ सुखेनेत्यौदासीन्यमावेद्यते ॥ केचित्तु मधुलिहचकोरश
ब्दाभ्यां गाढाधरपानलोलुपतरुणप्रतीत्या तदुपबाधकसत्वमित्यप्याहुः ॥ २४ ॥
परिहासमुदाहरति ॥ आगारेति काचित्कंचित्प्रत्याह ॥ आगारभित्तिलिखितासु स
दनकुड्यचित्रविश्रमानासु लोकभर्तुः लोकाधिपस्य विष्णोरित्यर्थः ॥ लोकभर्तृपदं कृप
ने लज्जाहेत्वभावं द्योतयति ॥ दशासु मूर्त्तिषु मत्स्याद्यवतारेषु सप्तमः अवतारः कः किं से

८७ लीनवर्त्तिरिवाकस्मिकमित्यर्थः॥ तत्र राधालक्षणदीपकलिकायां स्नेहः प्रेम तथा निक्षि-
प्यतां आसज्यतां यथा अदः एतत्त्रैलोक्यं त्रयो लोकास्त्रैलोक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्॥ अं-
धलावण्यसारसंसारसंसारादर्शकं न भवति॥ एवं च त्वत्स्वरूपया विना राधारूपदी-
पनिर्वाणे सति न कोपि कुत्रापि सौंदर्यं पश्येदिति भावः॥ एवं च त्रिभुवनाभिरामराधा-
वश्यं त्वत्प्रसादं विना न जीवयिष्यतीति व्यज्यते॥ अन्यापि दीपदशा निर्वाणं यांती
स्नेहेन सहिता प्रकाशयतीति लौकिकम्॥ ९९॥ श्रीर्जयति॥ इति श्री त्र्यंबकपंडितात्-
मज अनंतपंडितविरचितायां रसमंजरीव्यंग्यार्थकौमुद्यां सपरिकरं नायिकानिरू-
पणं समाप्तिमसरत्॥ ॥ नायकनिरूपणे उपोद्घातसंगतिं दर्शयति॥ शृंगार-
स्येति उभयनिरूपणीयत्वात्॥ नायिकानायकोभयनिरूपणाधीननिरूपणकत्वादि-
त्यर्थः॥ यद्यपि कारणतावच्छेदकावच्छिन्ने यत्किंचित्कारणनिरूपित्तिपि कार्यनिरूपणं भ-
वत्येवेत्येतन्निरूपणमनर्थकं तथापीह॥ यथा नायकीयशृंगारालंबनविभावत्वेन
नायिकानिरूपणं तथा नायिकीयशृंगारालंबनत्वेन नायकनिरूपणमित्येतन्निरूपण ८७

८८ मर्थवत्॥ तद्विभागमाह॥ स चेत्यादिना॥ तत्र प्रथमोद्दिष्टत्वात्पतिं लक्षयति॥ विधिवदि-
ति॥ विधिवत्पाणिग्रहणाकर्तृत्वं विधिपदोपादानादविधिमत्तत्कर्तृके नातिव्याप्तिः वस्तु-
तस्तु तत्प्रशिक्तया पाणिग्रहणस्याभिन्नत्वात्॥ नैकं पति त्वं पतिमु●हरति॥ त्वं पीयूषेति
शिवोक्तिरियं॥ हे पीयूषमयूख अमृतकिरण॥ चंद्र पीयूषममृतं सुधा॥ किरणोस्रमयू-
खांशुरित्यमरः॥ शिशिरात् शीतलात् स्निग्धात्॥ स्निग्धं तु मसृणं सांद्रमितिशब्दार्णवे॥
सुधासीकरान् अमृतलवान् मुंच विसृज॥ अर्थाच्छैलसुताशरीरे॥ किंच हे भोगीन्द्र
भुजगराज त्वं किमु बिलं वसे किं बिलं वं कुरुषे एवं च विलंबो न विधेय इति व्यज्यते इदं स-
र्वत्रान्वेति॥ फणभोगैः फणविस्तारैः शनैः मंदं वीजय व्यजनानिलं संपादय॥ किंच भोः
भावीहिनि स्वर्गंगे सलिलैः पथि मार्गे सिंचसे कं कुरु॥ स्वर्वाहिनी पदं भूतले सलिलसेक-
करणे सौकर्यमभिव्यंजयति॥ एवं च चन्द्रस्वर्गंगाभ्यर्थना फलयोरेकैकत्वे न न कोपि
विशेष इति परास्तं॥ किमर्थमयमुपदेश इत्यत आह॥ सेयं सकलजनविदितप्रभावा शैल-
सुता पर्वतपुत्री॥ कठोरमहसः चंडरश्मेः कांत्या दीप्त्या क्लाम्यति ग्लायति॥ ननु पर्वत

९८ पुष्याः॥ कुङ्कुमं चन्दनं रश्मिकांत्या कांतिरित्यत आह॥ शिरीषोपमेः शिरीषपुष्पकोमले अंगे
गौत्रैरुपलक्षिता एवं च पर्वतपुत्रीत्वेन कठिनता नाशंकनीयेति भावः॥ चं द्रादित्रयस्य स्वा
धीनत्वेनाध्यासंगपरिहारपुरःसरमेतद्विधेयमित्याज्ञार्हत्वम्॥ १००॥ पतिं विभजते
अनुकूलेत्यादि॥ अनुकूलं लक्षयति॥ सार्वकालिकेति॥ सर्वकाले भवं सार्वकालिकं
अध्यात्मादित्वाट्ठञ्॥ दक्षिणेतिव्याप्तिपरिहाराय समस्यंतं॥ अनुकूलमुदाहरति पृ
थ्वीति॥ विमलकमलकोमलदलांगयाः कामिन्याः भ्रमसंभावनयं तत्संबोधनं वसुमति
एवं च महत्त्वं बंधितया प्रार्थनासंपादनाप्रवणत्वं व्यज्यते त्वं कोमला भव एवं च पृथिव्यास्त
ज्जननीत्वेऽपि स्वयं तथाविधप्रार्थनाकरणेनातिशयितप्रेमवत्त्वमभिद्योत्यते॥ किं
च दिनमणे प्रद्योतन॥ प्रद्योतनो दिनमणिरित्यमरः॥ त्वं शैत्यं शीतलतां मंजुगीकुरु
मणिपदं तत्करणसमर्थत्वाभ्यनक्ति॥ एवं च स्वस्य सूर्यवंशीयतया प्रार्थनौचित्यं त
स्य तत्संपादनौचित्यं च द्यो[illegible]त्यते॥ किंच हे वर्त्मन् मार्ग लघुतां अल्पतां प्रयाहि प्राप्नु
हि॥ किंच हे पवन समीरण त्वं खेदश्रमं उत्सारय निवारय॥ किंच दण्डकावन दंडकयोरा ९८

कां४

रः त्वं च तिन्नत्यति हर्षादिति भावः॥ तावता किमित्यत आह॥ उक्तं तद्वशीकरणं निपुणं
यदुक्तं मया प्रतिज्ञातं तन्न त्यजतन्न ध्यातः किमपि मामुंचेत्यर्थः॥ स्मृतेर्नत्यक्ष्यसि सत्यं
किंतु विस्मरिष्यतीत्यत आह॥ तस्मिन्नुक्ते मुनःरक्ते आसक्ते विरचय अन्यथोपेक्ष
या विस्मरिष्यसीति गुणिनिंकुर्वती गच्छेत्यर्थः॥ आदितत्तीयद्वादशदशाष्टमात्राद्वि
तीयचरणे चतुर्थे पंचदशास्पूर्णधेयं पिंगलेनोक्ता इतिलक्षणलक्षितं गाथावृंदः
॥२८॥ विरहनिवेदनमुदाहरति॥ चक्रइति॥ काचिद्दूती रुक्मं प्रत्याह॥ भो रुक्मिन् चं
द्रमुखी एवं च प्रकाशकारित्वं द्योत्यते राधा गोपिका धरामण्डले मण्डले प्रदीपक
लिका चक्रे रुता विधात्रेति शेषः॥ चक्रइति कर्मणि लिट्॥ किं तावतेत्यत आह॥ देव
वशाद्दृष्टयोगात् एवं च तत्र वनापराधइति व्यज्यते तस्याः राधायाः चरमापि अवस्था
पि दशाव्यवस्था प्रायेः वाहुल्येन स मुन्मीलति समुदेति॥ ततः किमित्यत आह॥
तद्धेतोर्नतेन नम्रेण शिरसा प्रणामपुरःसरमित्यर्थः॥ वयं तु अमः विज्ञापयामः व
हुवचनेन विज्ञापनाफलसंपादनौचितीव्यज्यते॥ तत्किमित्यत आह॥ साशरत्को

९९ चितेन वपुषोपलक्षितेन अच्युतेन स्थितं ॥ यद्वा एतत् अग्रेपमदृशां सहसंस्फुरति अक्षिद्व
यं कुत्र निवेशयामि इति आकलय्य नेत्रे निमील्य रोमांचितेन वपुषा उपलक्षितेन अच्युतेन स्थि
तमिति कथयेति ॥ कश्चन रासावसरस्थितं कृष्णं सखायं प्रति वक्तीत्यर्थः ॥ कलिवलीकाम
धेनुः उत्सुकतराः आकलय्येत्यस्योक्ते त्यर्थः इत्यप्याहुः ॥ के चित्त्वत्र रतेरेकत्रापर्य्याप्त्या रसा
भासत्वं ॥ एवंश्लिष्यति कामपि चुंबति कामपि कामपि रमयति रामामित्यत्रापि स्यात
तिष्ठति ॥ कुंतलाधिपसुतावारो गेराज स्वस धृत्तें रात्रिरियं जिता कमलया देवी प्रसाद्या
घवइत्यंतः पुरसुंदरी प्रतिमया विज्ञाय विज्ञापिते देवेन प्रतिपत्तिमूढेन्यमनस्ता क्षित्राः स्थि
तेनाद्रिकायाइत्यत्र कमलाव्यामेव रतेः पर्यापत्त्वान्न रसाभासवत्वमित्याहुस्तन्न उपना
यकसंस्थायां मुनिगुरुपत्नीगतायां च बहुनायकविषयायां रतौ तथा उभयनिष्ठायां ॥
आभासत्वं कथितं तथैव तिर्यगादिविषयतायामिति प्राचीनोक्ता नायिकायाः अनेक
नायकविषयकरतेरेवाभासत्वात् ॥ अत एव काव्यप्रकाशकृता तदाभासानौचित्यप्र
वर्त्तिता इत्यस्य व्याख्यानावसरे स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे विलेभे ९९

कः प्राणान् रणमखमुखे यं मृगयसे ॥ सुलग्ने को जातः शशिमुखि यमालिंगसि बलात्तप
श्रीः कस्यैषा मदननगरि ध्यायसि तु यमिति रसाभासोदाहरणमभ्यधायि ॥ यदि च नाय
कस्याप्यनेकपरनायिकाविषयकरतेर्धर्मशास्त्रानौचित्यप्रवर्तितत्वेन रसाभासत्वमि
ति विभाव्यते ॥ तदाप्यत्र नायिकासु परकीयात्वप्रतिपादकाभावात् दूषणं ॥ वस्तुतस्तु मु
निगुरुपत्नीगतायामि त्युक्त्या नायिकाविशेषविषयकरतेरेवाभासत्वान्न तत्र शंका
लेशोऽपीत्यलमप्रकृते भद्रइदमत्र बोध्यम् ॥ नयननिमीलनहेतुप्रतिसंधानसत्वाद्वि
गलितवेद्यांतराभावान्नास्य सरसता ॥ १०२ ॥ धृष्टं लक्षयति ॥ भूयइत्यादि ॥ बहुतरनिर्भ
याऽपराधजनकत्वे सति बहुतरतिरस्काराग्रणकत्वे सति विनयपरायणत्वमित्यर्थः
सत्यं तेन विशेषणाभावप्रयुक्त विशेषणाभावप्रयुक्त विशिष्टाभाववतया शठनिरासः
द्वितीयसत्यं तेन मानिनायकव्युदासः ॥ धृष्टमुदाहरति ॥ बद्धइति ॥ काचिन्नायिका स
खीं प्रत्याह ॥ किं च हारैः मुक्ताहाराभिः ॥ करकमलेः हस्तपद्मयोः ॥ द्वारतः देहलीतः वा
रितोऽपि तिरस्कृतोऽपि अप्रमातृपरिजनैः पश्चाद्वार तदृत्यनेन दर्शनायोग्यत्वं तेन च सा
पराधत्वं व्यज्यते ॥ हारैरित्यनेन रज्ज्वादिबंधनयोग्यपितदकरणेन प्रेमातिशयवत्व

१०० मावेद्यते॥ करेकमलत्वारोपतोनचारुत्वप्रतिपादनेनच सामुद्रिकलक्षणशालित्वंध्वन्य
ते॥स्वापंनिद्रां अर्थात् गमनेनत्वालासंभाव्यदूरतः व्यवहितप्रदेशाद् दृत दृष्टिः मद्दिंगितज्ञान
यतिभावः॥पुनरुपगतः पुनरागतः ततोपितल्पोपांतेशयनीयप्रांते मुक्तंस्थापितं रात्रौ
नालंकृतास्वप्यादित्यागमादितिभावः॥यद्वातावतापितस्यपापीयसोवियोगेनतत्ता नवो
क रा ५ त्यत्वोंकुलितमित्यर्थः॥अथवा तदीयतथाविध विरहेणासह्यत्वात्त्यक्त मित्यर्थः॥क
नकवलयं सुवर्णकंकण अलेखयंत्या विचारयंत्यातावद्विरहजन्य चिंतावशात् स्थाप
नस्थलविस्मरणादितिभावः॥यद्वा विरहादेवस्थापितंत्यक्तं मुगतमेवचेतिज्ञाने वि
रहादितिभावः॥मयापार्श्वे पृष्टभागे पुनएकदास्वापान्निवारितोपिशुप्त एवधृष्टः निः
शंकः दृष्टः॥अत्रकरादिवंधनैः अपराधकारित्वंद्योत्यते॥निवारितत्वविजयपरायण
त्वेस्फुटएव॥१०२॥शठंलक्षयति॥कामिनीति॥सापराधस्त्वेपिवंचना निपुणत्वमि
त्यर्थः॥शठमुदाहरति॥मौलाविति मौलौमस्तकेदाममालांविधायकृत्वाकिंचभाल
फलकेकपोलतलेपत्रावलीं मकरिकादिरचनांव्यालिख्यकलकपदं विशालतां सा
च लिखनयोग्यतां व्यनक्ति॥बाह्वोः केयूरेभूषणे निधाय आसज्य॥किंचकुचयोः मुक्ता १००

न
स्याः धिष्ठितंवनंदंडकावनंतत्संबोधनंसान्निध्यं नैकट्यंभय॥अंगीकुरु॥किंचगिरेपर्वत
मार्गाद्बहिःदूरेनिर्गच्छ॥केचित्तु दंडकावगिरेदंडकारण्ये संवंधिपर्वतसान्निध्यंभयकिंच
मार्गाद्बहिर्निर्गच्छेत्यप्याकुः॥किमर्थमिदमित्यतआह॥यतोहेतोः असोसीतामयासह
वनेनिर्गंतुं उत्कंठतेवांछतीत्यर्थः॥१०३॥दक्षिणंलक्षयति॥सकलेति॥अशेषवनायि
काविषयकान्यूनानधिकाकृत्रिमानुरागवत्त्वमित्यर्थः॥अन्यूनानधिकपदोपादान
त्कार्यानुरूपन्यूनाधिकानुरागशालिचतुरव्युदासः॥अकृत्रिमपदेनकृत्रिमानुरा
गिशठनिरासः॥दक्षिणमुदाहरति॥एतदिति॥कृष्णः एतमंगनासहस्रंपुरः अग्रे
स्फुरति सहस्रसंख्याकाः कामिन्यः पुरतः स्फुरंतीत्यर्थः॥स्फुरंतीत्यनेनकांतिविशे
षशालिताव्यज्यते॥अतः अक्षिद्वयं नयनयुगलंकुत्र निवेदयामीति॥आकलय्य
विचार्य कथय॥एवंचनायिकानां वहुत्वान्नयनयोश्चाल्पत्वात्कथं निवेशनमिति
भावः॥इत्युक्त्वानयनांवुरुहे नयकमले निमील्य॥अंवुरुपदमानंदाश्रुवत्तामावेदय
५६ ति॥वपुषादेहेनकरणेनरोमांचितेनसंजातरोमोद्गमेन अश्रुच्युतेनस्थितं॥यद्वारोमां

१०१ एवंचपरस्परानुरक्तत्वंव्यज्यतेतत्किंरतंसकिंसंभोगः॥ यत्रैतादृशचेष्टिताभावइत्यर्थः
आचारविनाशकत्वंस्फुटमेव॥ अत्रैतादृशीपतिसंधानसत्वाद्विगलितवेद्यांतरत्वाभावा
त्कथंरतिपोषइति विभावनीयं॥१०५॥ उपपतिरप्युक्तभेदैरेवानेकविधइत्याह॥ उ
पपतिरपीति॥ अनुकूलादिभेदेनेत्यादि॥ नन्वनुकूलत्वस्यपतिधर्मत्वेनोपपतिध
र्मत्वंकथमितिचेत्॥ अत्रपरांगनापदेनतदितरकामिनीमात्रमभिधीयते॥ यद्वात्र
थाव्यवस्थामेवानुकूलत्वमितिनकश्चिद्दोषः॥ वैशेषिकमुदाहरति॥ कांचीति॥ को
पिसखायंप्रत्याह॥ हेसखेकांची॥ कलक्कणितकोमलनाभिकांतिकांच्याः रसनायाः
कलंमधुरास्फुटंध्वनिः॥ ध्वनौतुमधुरास्फुटेकलइत्यमरः एतादृशंक्कणितंसिं
जितंयस्मिन्सचासौकोमलअभिनवःयोनाभिस्तस्यकांतिर्लावण्यंयस्मिन्सतंक
लपदंस्पृहणीयतांआवेदयति॥ तथापारावतध्वनितचित्रितकलपालीपाराव
तानांगृहकपोतानांयत्ध्वनितंशब्दितंतद्वत् चित्रितानानाविधाकलपालीयत्र
सः तं विविधमणितचातुर्यादितिभावः॥ पालिपदंरमणीयतांगमयतिउभयत्र १०१

स्त्रीलिंगनिर्देशोनाहेयत्वंद्योत्यते॥ तथाउद्भ्रांतलोचनचकोरं उद्भ्रांतोमुखचंद्रिकापानार्थं
चंचलोलोचनचकोरोयस्मिन्सतंउद्भ्रांतपदंलज्जाभावंव्यंजयति॥ एतादृशंवारविलास
वत्याः वारांगनायाः कमपिअनिरूप्यंअनंगरंगंकामक्रीडाप्रसंगंआशास्महे॥ सएवा
सं स्माकमस्त्वितिभावयामः॥ एवंचपूर्वोक्तगुणवैशिष्ट्यादन्यारंगरंगाद्यतिरेकोध्व
न्यते॥ यद्वाआशास्महइतिप्रत्येकान्वयिएवंचैकमेवातिशयितत्तास्यविषयः॥ किंपुनःसमु
दितंत्रितयमितिव्यज्यते॥ रंगपदेनक्रीडायामाशक्त्यतिशयोध्वन्यते॥१०६॥ प्राप्तावसरत्वा
द्वैशिकंविभजते॥ वैशिकस्त्विति॥ वस्तुतस्तुललितशांतोदात्तोद्धतानांप्रत्येकमनुकूलादि
भेदेनषोडशत्वेप्युत्तममध्यमाधमभेदैरष्टचत्वारिंशन्नायकभेदाः अन्येपिवहवस्तेपि
स्वयमूह्याः॥ उत्तममुदाहरति॥ चक्षुःप्रांतमिति॥ कांचित्कांचित्प्रत्याह॥ पक्ष्मलदृशः
प्रशस्तानिपक्ष्माणियस्याः तादृशीदृक्यस्यास्तस्याः नायिकायाः चक्षुःप्रांतंनयनको
णंशोणारविन्दश्रियंरक्तोत्पलच्छायंकोपवशाद्विभावः॥ उद्वीक्ष्यविलोक्यउच्चैर्नजल्प
ति॥ शनैरेववदतीतिभावः॥ किंचस्मितंहसितंनतुहसितानिनवितनुते॥ किंचवीथीतां

१०२ कूलपर्णकवलीनू गृह्णाति ॥ किंतु तल्पोपांतं शयनीयसमीपदेशमुपेत्य पुलकभ्राजत्क
पोलद्युतिः ॥ पुलकैः रोमांचैः शयनसमीपप्रदेशप्राप्तिजन्यहर्षोदयादिति भावः ॥ भ्राजती
विलसती कपोलद्युतिर्गंडलावण्यं यस्याः सा ॥ कांतं केवलमेकं आननं तेन नम्रेण भयाच्चिंता
वशादिति भावः ॥ शिरसा मस्तकेन उपलक्षित इत्यर्थः ॥ मुक्तास्रजं हारं गुंफति तन्वीतयइ
तिभावः ॥ १०७ ॥ मध्यममुदाहरति ॥ आस्यमिति ॥ कश्चित्सखायं वक्ति ॥ यद्यपीदं आस्यं
मुखं हास्यवर्जितं स्मितरहितं तथा वचोभिः लास्येन गीतादिना वीतं रहितं तथा नेत्रं शो
णसरोजकांति ॥ कोकनदद्युति ॥ कोपवशादिति भावः ॥ तदपि तथापि कापि एतन्नयना
विषयीभूते प्रदेशे क्षणं स्थीयतां ॥ एवं च मनोभावग्राहकत्वं व्यज्यते ॥ अवस्थितेः फल
माह ॥ सुदृशः इदमग्रे पिन्वेति मालायाः स्रजः करणोद्यमः ॥ कृत्स्नोत्साहः ॥ किंच कुचांभो
जयोः स्तनकमलयोः ॥ आभोगपदं शोभातिशयं व्यनक्ति ॥ मकरिकारंभः रचनाविशे
षः ॥ कुचाभोगयोरिति पाठे कुचोत्तुंगयोरित्यर्थः ॥ किंच कुंतलधोरणीषु केशसंघाते
षु सायंतनः इदं प्रागपन्वेति ॥ धूपः सुगंधद्रव्येणाधिवासः दृश्यते एवं चेता दृशसाम १०२

स्रजं विन्यस्य मृगदृशः मृगदृक्पदं मामवयवं चाश्लिष्यतीति तत्क्रियावधानमभिव्यंजयति
किंचासं विश्लेषं भंसमुपार्जयन् उत्पादयन् कांचीनिवेशछलात् ॥ रसनास्थापनव्याजात् ॥ मृ
दुना हस्तेन शनैरित्यर्थः ॥ वामभ्रुवः कुटिलभ्रुवः एवं च वंचनायोग्यत्वं द्योत्यते एवं च मृग
दृशा इत्यनर्थकमित्यपास्तं ॥ नीवीग्रंथिं अपाकरोति रिरंसयेति भावः शठत्वं चात्र स्फुटमे
व ॥ १०४ ॥ उपपतिं लक्षयति ॥ आचारेति ॥ तमुदाहरति ॥ शंकेति ॥ यत्र रतेशंकाभ्रंशः खलि
तेन शंकया भयेन शृंखलितं निवद्धं तेन नयनप्रांतेन नेत्रोपांतेन न प्रेक्ष्यते ॥ शृंखलितप
देन प्रसरणाभावो द्योत्यते ॥ यत्र वा केयूरध्वनिभृशिभीतिचकितं केयूरं बाहुभूषणं त
स्य ध्वनिर्निनादः तेन भृशिभीतिः ॥ बहुतरं भयं तेन चकितं निश्चलं न श्लिष्यते नालिंग्य
ते किंच यत्र वा ॥ अलग्नदशनं दंतसंबंधं विना दंतक्षते जाते केश्चिच्छिन्नतात्व्यमेतदिति भि
येति भावः ॥ अत एव शनैर्मंदं ॥ विंबाधरः विंबतुल्याधरोऽष्ठः विंबपदमाकारविशेषं
व्यनक्ति ॥ न पीयते यत्रैतादृशं चुंबनं नेत्यर्थः ॥ किंच यत्र वा मणितं रतिकूजितं न विधी
यते नभ्रुति विषयीक्रियते सर्वमेतत्प्रच्छन्नकामित्वादित्यर्थः ॥ कामिनोः स्त्रीपुंसोः

१०३ कोमलांगीं पुनरपि तस्य करेण हस्तेन पातयेथाः॥ ततः क्रीडया हितां स्यासस्यत्वादिति भा
वः॥१०९॥ ननु मानी चतुरश्चान्यास्ति सक्तान्तर्भूत इत्यत आह॥ मानीत्यादि॥ एकारश्च
पदे तत्र भवतीति त्रिष्वन्वेति॥ अंतर्भवत्येव न स्वतंत्र भेद इत्यर्थः॥ इत्येवकारः अयोगव्य
वच्छेदार्थः॥ एवं च दक्षिणस्यापि मानित्वचातुर्यवत्वादन्ययोगव्यवच्छेदार्थकत्वम
संभवीति दूषणमद्भुषणं वेदितव्यं॥ तत्र मानिनमुदाहरति॥ वाल्याकूतमिति॥ का
चित्कांचित्प्रत्याह॥ हे कांत तव यस्मात् प्रातःकालीनं अहमधुनैवागमिष्यतीति
वचः वचनं तथाविधकार्य्यादर्शनादंतरमन्याद्दशमिति भावः॥ यतः वज्रोपमेयं
वज्रतुल्यं कठिनमिति भावः॥ तवेमनः एवं च परपीडाज्ञानविधुरस्या[illegible]धुनैवागमि
ष्यामीति प्रातःकालीनं एवं वचनं वदितानीं तनमपि तव वचनमलीकमेवेति व्यज्यते
इमां वाचं श्रुत्वा अथ नायिकायाः॥ विनयेन कृतं सांत्वनं अपास्य परित्यज्य व्याजा
त् कपटात्॥ एवं च शठत्वं ध्वन्यते वहिः केलिसदनाद्दित्यादि परिहृतालापेत्यत्र संभा
षणेन केवलं संभाषणपरित्यागः॥ अपि तु विलोकनस्यापीत्याह॥ वीतविलोकने १०३

त्यक्तविलोकनेन केवलं विलोकनत्यागः किंतु संमुखतापिनेत्याह॥ विवृत्तानने परिवर्त्तिता
स्ये एवं चैतादृशस्य केलिसदनात् व्याजादपि निर्गमे कुपितत्वमाविरयति॥ प्राणेशाए
वं च शीलन तथाविधविलोकनौचितीव्यज्यते प्रस्थिते गंतुमुद्यते सति॥ एवं चैतादृ
शवाग्मात्रश्रवणादेव इत्थं प्रस्थित इत्यभिमानवत्त्वमाविष्कृते॥ वामभ्रुवः सुन्दरभ्रुवः हंत
इति खेदे रूपणादीनां विरहकातरयेति भावः दृष्टयः कटाक्षाः पतंति॥ एवं नायि
काहृष्टिनिवारणं नास्तीति द्योत्यते॥ प्रातर्व्याजात्॥ प्रातःकालीन कार्य्यमिषात्
इत्यर्थमाहुः केचित्॥ प्रातः प्रस्थिते प्रतीत्याहुरपरे॥११०॥ प्रथमो द्दिष्टत्वाद्दाग्व्यं
ग्यसमागमं चतुरमुदाहरति॥ तमोजटाल इति॥ कोपि नायिकां वक्ति॥ हे शातो
दरि कृशोदरि एवं चासहायतयागमनमसंभवीति व्यज्यते॥ निशायाः रात्र्याः का
लिसमये तमोजटाले॥ तमोजटालास्तमस्तोमाः यस्मिन्॥ प्राणेश्वरादातोजलव्य
तरस्यामिति चैलर॥ हरिदंतराले हरितां दिशां अंतरालमभ्यन्तरं तस्मिन्॥ आशाश्च
हरितश्चताः अभ्यंतरं त्वन्तरालमिति चेत्यमरः॥ निर्गतायाः प्रचलितायास्तव वनानां

तर

१०४ अल्पवनानां निकटे सविधे ॥ नदीनां तटे तीरे सहायः सहचरः कः घटेत भवेत् ॥ एवं च सर्वतः
प्रसारि गाढे तिमिरे प्रचलितायास्तव जनसंचाररहितवनेनिकटनदीतटेन कोपि सहच
र इति अहमेव सहचरो भवामीति व्यज्यते ॥ अत्र वक्तृव्यङ्ग्यरूपवस्तुना हमेव तव संकेतप्रा
पणे समर्थ इति वस्तु व्यज्यते ॥ १११ ॥ चेष्टाव्यंग्यसमागमे चतुरमुदाहरति ॥ कांत इति
काचित्कांचित्प्रत्याह ॥ कांते कमनीयरूपशालिनि नायके एवं च संकेतदानोचितीव्यज्यते
किमपि अनिर्वचनीयशोभाशालि कनककंजबीरं सुवर्णफलविशेषं करे हस्ते कुर्वति सति
गृह्णाति सति एवं च स्तनसदृशकनककंजबीरकरग्रहणरूपचेष्टया त्वत्कुचमर्दनमिच्छ
न रतिं कदा आ ॥ स्यामीति व्यज्यते इंदुमुखी चकुव दनानायिका तदभिप्रायविज्ञेति
भावः इंदुमुखीपदेन हर्षोत्कर्षो ध्वन्यते ॥ आगारलिखिते गृहभित्तिनिर्मिते एवं च
संकेतदाने सुलभत्वमावेद्यते भानौ सूर्ये बिंदुं भ्रून्यमदर्शकमित्यर्थः ॥ दत्तेन तत्तव
ती ॥ एवं च सूर्यास्ते तव रतिं दास्ये इति व्यज्यते ॥ य द्वा बिंदुं कलंकज्ञापकमिति भावः
एवं च चन्द्रोदये तव रतिं दास्ये इति व्यज्यते इत्यर्थः ॥ अत्र नायिकाया चेष्टाव्यंग्यप्रदे १०४

श्री सख्या दग्रे किं भावीति दृश्यमित्यतोपि मनोभावग्राहकत्वं द्योत्यते यद्वा नायकः स्व ३०३
मनस्येव विभावयति ॥ आस्यमिति ॥ केचित्तु यद्यपि आस्यं हास्यवर्जितं लास्येन वीतं व
चस्तथापि शोणसरोजकांति र्येयाकाया दिति भावः ॥ नेत्रकापि प्रदेशे संलग्नं स्थीयताम्
विश्राम्यतां कोपोत्तरं तत्वं परित्यज्य नेत्रमेकं तु माद्दृशे प्रदेशे स्थिरीक्रियतामित्यर्थ
व्यतिरेकस्यादित्यत आह ॥ यतो हेतोः ॥ सुदृशः तव मालायाः करणोद्यमः कुचाभो
गयोर्मकरिकारंभः कुंतले धोरणिषु धूपः सायंतनः दृश्यते एवं च मयि दृष्ट्या दाने
सर्वमेतद् वृथा स्यादिति भावः ॥ इति नायको क्तिरियमित्यप्याहुः ॥ १०८ ॥ अधमसुख
हरति ॥ उदयतीति ॥ काचित्सखीं प्रत्याह हे सखि ॥ यस्य हृदि मनसि कापि किंचिद्
पि एय पि इ द मग्र प्यन्चे ति ॥ लज्जा व्रीडा नोदयति नो कुरुते एवं च सर्वविषयिणी
लज्जानास्त्येवेत्यर्थः ॥ आत्मनेपदस्यानियतत्वाद्युक्ते परस्मैपदं ॥ यद्वोणीता वि २
त्यस्य स्वरूपं ॥ किं च यस्य करुणापि न किंचित्कोपि भीतिलेशः ॥ अतो वकुलमुकु
कोष लं कोमलं ॥ वकुलानां मुकुलास्त एव कोषाः सर्वसौगंध्यनिधानत्वादिति भावः ॥ तद्वरे

१०५ मध्येदेशः॥मृणालपदं सूक्ष्मत्वमपि द्योतयति॥उरूरंभाहेमकदल्येवरंभापदं वर्त्तु
लत्वगौरत्वे अपि व्यनक्ति सा चेद्यदि उरसि वक्षसि तदा तापस्य अर्थात्तद्विरहस्य
शांतिर्विनाशः हं तदुतिहर्षकथनं भविष्यति अपितु भविष्यत्येव॥एवं च यत्रेदम
केकमपि तापापनोदकं तत्र किं मुधा त्वं समुदितमिति भावः॥रूपकालंकारः॥११३॥
॥प्रोषितमुपपतिमुदाहरति॥यात्यादिति॥कश्चित्कंचित्प्रत्याह॥सलिलकेलिकु
तूहलाय जलक्रीडाकौतुकाय सरः सरोवरं यांत्याः गच्छंत्याः वामदृशः सुंदरन
यनायाः वर्त्मनि मार्गे व्याजात् कपटात्॥एवं च प्रच्छन्नकामुकत्वं व्यज्यते॥उपेत्य
आगत्य वर्त्तमाने मयि एवं च विलासविशेषाभाववत्ता भावः ध्वन्यते यद्वाखुवः व्या
जात् उपेत्य उपसमीपमागत्य वर्त्मनि वर्त्तमाने इति योजना॥अंतः स्मितमुपैति
अंतः गूढं हास्यं तस्य कोतिर्यत्र क्रियायां चमत्कृततद्भूतरंगैः॥मनोहारिदृग्भ्रमैः कि
मपि केन चित् प्रकारेण एवं चान्यजनज्ञेयत्वं द्योत्यते॥अंगीकृतं संकेतं चेष्टि
तं स्मरामि चिंतयामि॥अत्रोपपतित्वं प्रोषितत्वं च स्फुटमेव॥११४॥प्रोषितवेश्यावि १०५

षमुदाहरति॥अधरेति॥कश्चित्कंचित्प्रत्याह॥पुरस्सुदृशः वारांगनायाः अधरं
परिपतन् निचोलबंधं॥अधरतः अनवलंबितः॥अतएव परिपतन् विस्रंसन् निचोल
स्य वसनस्य बंधो ग्रंथिर्यत्र क्रियायां तथा मुषितनकारं मुषितः चोरितः परिहृतो वा न
कारः नने इति वचनं यत्र मुषितपदं कदाचित्कतरभिव्यक्तेरप्यभावं व्यनक्ति॥अव
क्रदृष्टिपातं अकुटिलकटाक्षो यत्र सर्वदा प्रसन्नत्वादि–तिभावः॥तथाप्रकट
हसितं प्रकटं स्फुटं हसितं यत्र तथा॥उन्नतास्यबिंबं नमताहितं आस्यबिंबं वद
नबिंबं यत्र॥बिंबपदं सुधामयत्वमास्ये व्यंजयति॥सर्वत्र लज्जाविरहादिति भावः
तादृशं स्मरचेष्टितं कामविलसितं स्मरामि ध्यायामि॥एवं च स्वीयादिवैलक्ष
ण्यादिदमेव चिंतयामि नान्यदिति व्यज्यते॥११५॥प्रसंगान्नायकाभासं लक्षय
ति॥अनभिज्ञ इति॥अनभिज्ञः संकेतचेष्टितज्ञानविकलः अतएव नायकाभा
सः तद्वत् आभासते न तु सद्रूपः॥तमुदाहरति॥अन्यदिति॥कापिदूतीवक्ति
अन्ये जनसंचारविरहिणि सदनिगेहे वहुविधा अनेकप्रकारा भंगी विभ्रमरचना

रा १

१०६ योजिता ॥ किंच पुष्पव्याजं पुष्पावचयच्छलमुपेत्य प्राप्य पुष्पावचयच्छलेनेत्यर्थः ॥ निर्जनं
जनरहितवनं प्रति निर्गतं चलितं त्वया ना निर्जनपदाभ्यां लज्जानहेतुत्वमावेद्यते ॥ अतोऽप्यनंतरं
दृष्ट्योऽपि स्फारीकृताः ॥ किमद्यापि तल्पमेवायमित्याविश्वशादिति भावः ॥ किंच ताम्बूला
हरणच्छलेन तांबूलव्याजेन वक्षोरुहौ स्तनौ वक्षोरुहपदं स्वतएवाभिव्यक्तत्वं व्यनक्ति ॥
व्यक्तौ प्रकटौ विहितौ हृदिति सततेवापि स्वन्यसदनपरिहासविपिननिवासकटाक्षनिक्षे
पविलासस्तनकलशगोपननिरासाद्यभिप्रायप्रकाशकसाहसेनापीत्यर्थः ॥ सनायक
एव च नामानभिधानेन दुःखविशेषो द्योत्यते ॥ यदि नवेत्ति जानाति तर्हि कियतायत्नेन
ज्ञास्यति एवं चेतरन्यज्ज्ञापकं नास्तीति भावः ॥ एवं चान्यः कश्चन मदभिप्रायवेदी आनेय
इति व्यज्यते ॥ ११६ ॥ ननु उक्तादयो भेदाः कथं न नायकस्येत्यत आह ॥ न चेति ॥ उत्तरय
ति ॥ तस्या इत्यादि ॥ तस्याः नायिकायाः अवस्थाभेदेन कालकृतविशेषेण तस्य नाय
कस्य स्वभावभेदेन प्रकृतिभेदेन स्वभावमेव विवृणोति ॥ अनुकूलत्वमित्यादि ॥ अत्रा
यं निर्जलितार्थः नायकस्य उक्तादिभेदवत्त्वे तुल्ययुक्तिकृतया पारवश्यादिता दिभेदवत्त्वे अनौ १०६

चित्यं न मनुपयुक्तमिवाभाति ॥ केचित्तु कनकजं वीरं किमपि प्रकारवैचित्र्येण कुर्वंतीति सतीत्यर्थः
इत्याहुः ॥ यद्यप्यत्र चेष्टाया व्यंजकत्वमुक्तं तथापि ॥ द्वारोपांत निरंतरे मयि तया सोऽष्म
मारश्रिया प्रोल्लासयोरुयुगं परस्परसमायुक्तं समापादितम् ॥ आनीतः पुरतः शिरोंशुक
मधः क्षिप्तेत्तले लोचने वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते ॥ इत्यादाविव चेष्टा
वैशिष्ट्यादर्थकस्यैव व्यंजकत्वं बोध्यम् ॥ ११२ ॥ प्रसंगादन्यदप्याह ॥ प्रोषितइति ॥ पति
रूपपतिर्वैशेषिकश्चेति त्रयः प्रोषिता भवंतीत्यर्थः ॥ तत्र प्रोषितपतिमुदाहरति ॥ उ
रूरंभेति ॥ कोऽपि विरही वक्ति ॥ यस्याः नायिकायाः केशाः शैवालमेव अश्रौ वालपदं श्या
मतामपि ध्वनयति ॥ वक्त्रं चंद्र एव ॰ लपितं वचनममृतमेव ॥ अमृतपदं मधुरता
मपि गमयति ॥ किंच दृगपि नेत्रमपि कमलं नीरजमेव कमलपदं विस्तारमपि व्यन
क्ति ॥ किंच पाणिः पल्लव एव पल्लवपदमरुणतामपि व्यंजयति ॥ वलिरेखापि सरि
देव ॥ उभयत्राप्यकूलमविवक्षितं सरित्पदं कामिदृष्टेरुल्लंघ्यत्वमप्यावेदयति ॥ नाभिः
कूप एव कूपपदं गंभीरत्वं ॥ तत्र कामिनयनमनसोर्निर्गमायोग्यतामपि व्यंजयति

१०७ त्वेन जगदयितुः स्त्रीतित्यच्यते ॥ आमोदिनी बहुतरसंतोषवती जायतां भवतु ॥ केचित्तु परि
मलैः गंधविशेषैः आमोदिनी गंधवती भवत्वित्याहुः ॥ आस्तां तिष्ठतु कोप इति भावः ॥ के
चित्तु आस्तां मउकमित्याहुः स्वहृदयालुरयित दर्शनोन्मुखं ॥ इदं प्रत्यक्षपरिदृश्यमान
विकलोचनं नयनं अत एव मुहुः वारं वारं व्यावर्त्तयंती व्यापापराधगणतारज्वाकृष्ट
मिव बलात्ततः परावर्त्तयंती यस्मै कुप्यसि तस्य तपो वृन्दानि तपस्तोमान्वन्दामहे नम
स्कुर्मः एवं च य एव कोकनिवारको मल्लक्षणः कश्चित्तं प्रत्यपि कोपकारणमत्येतु त
दीय पुण्योद्रेकादिति भावः ॥ एवं च नायकं प्रतियत्र तवकोपि पुण्योद्रेकात् तत्र तत्प्र
सादस्य का वार्त्तेतित्यच्यते ॥ केचित्तु यस्मै प्रियसे इति व्याचख्युः ॥ ११७ ॥ विटं ल
क्षयति ॥ कामतंत्रेति ॥ तंत्रप्रधाने सिद्धांत इति विश्वः ॥ तमुदाहरति ॥ आयात इ
ति ॥ हे कृशोदरि एवं च मौनस्यावस्थित्यभावो विवेकराहित्यं वा द्योत्यते ॥ कुमुदेश्वरश्चं
द्रः आयातः प्राप्तः सोप्युदित इत्यर्थः ॥ किंच सर्वेश्वरः सर्वासामीश्वरः प्राणरूपत्वात् ॥
यद्वा ईश्वरः नियोजकः ॥ शीतमंदसुरभित्वेन वशीकर्तृत्वादित्यर्थः ॥ मारुतो वायुः विज १०७

यते ॥ किंच भैरवो दारुणः विरहिणीजनदुःखदत्वादिभावः ॥ भृंगो भ्रमरः स्फुरति विलसति ॥ किं
च प्राणेश्वरः नायकः निकटं सविधं न मुंचति त्यजति सर्वदा निकट एवेति भावः ॥ ईश्वरप
दवंदनीयतां ध्वनयति ॥ एतावता किमित्यत आह ॥ एते चंद्रादयः सिद्धरसाः सिद्धनि
ष्पन्नरसाः शृंगारो येस्ते उद्दीपनालंबनविभावा इत्यर्थः ॥ किंच अनवद्योत्सव अनव
द्यः अनिंद्यः महानिति यावत् ॥ उत्सवः कार्य्यसमारंभो यस्य एतादृशः प्रसूनविशिखः
कुसुमबाणः एवं च सामर्थ्यविशेषो ध्वन्यते वैद्यः अगदंकारः ॥ अगदंकारो भिषक् वैद्य
इत्यमरः ॥ एवं सति असौ मानव्याधिः मान एव व्याधिः संतापकत्वादिति भावः ॥ त्वं चेत
सि त्वन्मसि कथं केनोपायेन स्थास्यति असावितिपदं स्फुटतया भ्रष्ट इति विषयत्वं तेन च
प्रतीकारयोग्यत्वं व्यनक्ति ॥ अथ च कुमुदेश्वरसर्वेश्वरभैरवप्राणेश्वराभिधरसानां
सिद्धत्वे ॥ अप्रतिहतोपक्रमे अमरत हस्ते चिकित्सके चिकित्सति व्याधिर्न स्थातुमर्हती
त्यर्थः ॥ ११८ ॥ चेटं लक्षयति ॥ संधाने संयोजने ॥ तमुदाहरति ॥ सेति कश्चित्कंचित्प्र
त्याह ॥ सा प्रसिद्धकुलात्कल्पादिगुणा चन्द्रसुंदरमुखी च पितमुद्राधिवदनानायिकासः प्रसि
द्धसर्वविभवः नंदस्तनुः नंदस्य आनंदजनकस्य स्तनुः एवं च पितृगुणवत्त्वेनानंदजनक

॥१०८॥ त्वस्यावश्यकत्वमित्यावेदयते स्तनुः पुत्रेनुजे वा वित्यमरः ॥ दैवात् असंकेतादित्यर्थः ॥ निकुंज
भवने कुंजसदनं समुपाजगाम ॥ अत्रांतरे एकत्र मिलनकाले सहचरो वयस्यः अर्थान्नंदस्य
नोः तरलो सूर्ये कठोरे तीव्रे सति एवं च पानीयस्य हा योग्यत्वं व्यज्यते पानीयपानकपटेन
अनुपानदुलेन सरः प्रतस्थे चचाल ॥ आत्मानं तत्संयोगांतरायमन्वानस्तपितोस्मीतिस
रोवरं प्रतिजगामेत्यर्थः ॥ ११९ ॥ विदूषकमुदाहरति ॥ आनीयेति ॥ नायकः कंचित्स्त्र्या
ह ॥ नीरजमुखी कमलवदना शयनोपकंठे तल्पसमीपं आनीय प्रापय्य कंचकंचुक
मोचनाय यावदुत्कंठितोस्मि ॥ अत्र कंचपदमनर्थकमिवाभाति ॥ के चित्तु कंचु
कस्य नायिकासंबंधिद्योतनार्थमिदमित्याहुः ॥ अत्रांतरे एतन्मध्ये विदूषकेन प्रातस्त
तः प्रातःकालीन तरुणकुक्कुटकुलेनादः तरुणताम्रचूडकलध्वनिः ॥ तरुणपदं
स्वरे दैर्घ्यमावेदयति ॥ तत्र सर्वस्तुतिविषयत्वं तत्र कामिनीप्रतारणं नर्हत्वं ध्वनय
ति ॥ अत्र कलपदमधिकमिवाभाति ॥ अकारि कृतः ॥ विदूषकत्वं चात्र स्फुटमेव ॥
१२० ॥ इति श्रीत्र्यंबकपंडितात्मजानंतपंडितविरचितायां रसमंजरीव्यंग्यार्थकौमु
द्यां सपरिकरं नायकनिरूपणं समाप्तिमगमत् ॥ साधननिरूपणमंतरा साध्यनिरू ॥१०८॥

चित्यायत्या रसभंगापत्तेः ॥ अत एवाहुः प्रांचः ॥ अनौचित्यादृते नान्यद्रसभंगस्य कारणमि
ति वस्तुतस्तु यद्वैदवत्त्वे अनौचित्यमापततीति तद्वदवत्त्वाभावेप्यन्यभेदत्वेन का चित्क्षतिः ॥
कथमन्यथा प्रोषितभेदमुदाहृतवानृ स्वयमिति यत्किंचित् ॥ एतत्प्रसंगात्तत्साहाय्यानाह
एतेषामिति ॥ नर्मसचिवः नर्मणा अनुकूलव्यापारेण सचेतिसमयेतीति सचिवः सहा
य इत्यर्थः ॥ यद्वा नर्मणि क्रीडायां सचिवः प्रधानः सहाय इत्यर्थः ॥ तदनुकूलव्यापारसं
पादक इति यावत् ॥ के चित्तु पीठमर्द विटश्चेव विदूषक इति त्रिधा स्तुत्या वेटस्य विट
एवांतर्भावमाहुः ॥ तत्र पीठमर्दमुदाहरति ॥ कोपमिति ॥ हे सुंदरि एवं च कोपरूपमालि
ंगीकरणेनो चिती व्यज्यते ॥ अयं एतादृशः कोपविधिः कोधांगीकारः ॥ आत्मनो
नुचितकारित्वाद्धेय इति भावः ॥ किंतु करुणगर्भे ॥ करुणदया गर्भे मध्ये यस्य एता
दृशं कोपपरित्यागादिति भावः ॥ तच्च आमिष्यामितमानयेत्यादि रूपं वा वचनं प्रयच्छ
देहि अत एव पीयूषद्रवदीर्घिकापरिमलैः अमृतसारवापीसंघट्टनैः मे श्रीभरः ॥ ए
वेनाहं स्वस्य कार्यार्थमभ्यर्थये इति भावः ॥ एवं च त्वत्प्रसन्नतायां मत्कृतस्य दुःख व

१०९ निधिदर्शनमन्तराकथमेतादृश्यो वध्र्वा इति भावः॥ अत्रानुमानालंकारः॥१२१॥ शृंगारं लक्ष
यति॥रतीति॥ रतिः स्थायी भावोस्य रतिर्नाम प्रीतिः॥ सा चेयं मम अहमस्या हितसाधनमि
त्याकारं ज्ञानं भावनैव वासंगमेच्छारूपो भिलाष एव रतिरित्यपि केचिदाहुः॥ तदुक्तं रतिर्म
नोनुकूलेर्थे मनः प्रवणायितमिति इदं च लौकिकरतेर्लक्षणं न त्वलौकिकवासनारूपसा
मातिकरते रित्यपि केचिदाहुः॥ स्थायित्वं च सजातीयविजातीयभावाविच्छिन्नप्रवाहचित्त
वृत्तिविशेषत्वं चित्तवृत्तीनामाशुविनाशित्वेपि वासनात्मतया सूक्ष्मरूपतया अवस्थान
तः स्थायित्वं॥ अतएवाभिहितं॥ विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः॥ आत्मभावं नय
त्यन्यान् स स्थायी लवणाकरः॥ उक्तं चान्यैः॥ चिरं चित्तेवतिष्ठंते संबध्यंतेनुबंधिभिः
विभावादिभिः तथा सजातीयविजातीयैरतिरस्कृतमूर्त्तिमान्ना यावद्वसंवर्त्तमानः स्थायी
भाव उदाहृतः भावत्वं च भावयति वासयतीति व्युत्पत्त्या चर्वणीयमयी भवनयोग्यत्वं त
दुक्तं॥ सुखदुःखादिभिर्भावैर्भावस्तद्भावसूचनमिति॥ अत्रेदं बोध्यं॥ आनंदांशो भाना
वरणांश्च आनंदरूपतया प्रकाशमानो रत्यवच्छिन्ने चैतन्ये शृंगारः॥ आवरणं चाज्ञानमे १०९

व शृंगारं विभजते स चेति॥ द्विविध इति॥ उभयस्यैव रतिप्रकृतिकत्वात्॥ तदुक्तं अनुकूलौ निष ११०
वेते यत्रान्योन्यं विलासिनौ॥ दर्शनस्पर्शनादीनि स संभोगो यमुदाहृतः॥ भावो यदा रतिर्ना
म प्रकर्षमधिगच्छति॥ नाभीष्टं विप्रलंभस्तदोच्यत इति॥ लक्षणं तु विप्रलंभान्यत्वे सति रतिप्र
कृतिकत्वं संयोगत्वं संगमप्रत्याशाकालीनत्वे सति स्वाधीनसंगमाभावविशिष्टरतिप्रकृति
कत्वं विप्रलंभत्वं सत्यंतोपादानात्॥ मनोरन्यतरस्मिन् मृते न विप्रलंभः स्वाधीनपदो
पादानात् विदेशस्थयोरपि दूतीप्रेषणादौ संभोग एकदेशस्थयोरपि कोपादिप्रतिबंधे वि
प्रलंभ एव॥ तत्र प्रथमोद्दिष्टत्वात् संयोगमुदाहरति॥ वियतीति॥ काचित्कस्याश्चि द्विपरीतर
तेकौ विस्मृत्याह॥ हे सखि वियति अंतरिक्षे जलदः केशकलापः जलदपदं केशकलापान्
श्यामं तां विरहे तापोपशांतिं स्वेदजलवत्त्वं वा व्यंजयति विलोलति चंचलो भवति॥ एवं च
विपरीतरते केशकलापस्य शय्याद्याधारवत्तया नांतरिक्षस्थितिरिति विपरीतमावेद्यते
तथा विधुः मुखचंद्रः विधुपदं मुखलक्ष्यपदं सुधारूपत्वमभिव्यंजयति॥ चलतिचेष्ट
ते॥ चुंबनोत्सुक्यादिति भावः॥ स्खलति च क्रियासु॥ संकुचितलज्जाप्रदर्शनव्याजादानंदोद्रे

११० तिभावः ॥ तथा कपोतः कण्ठः कपोतपदं कण्ठं लक्षयन् ध्वनौ माधुर्यमभिव्यनक्ति कूजति श
ब्दायते एवं च भणितमभिव्यज्यते ॥ तारकाततिः मुक्ताकलापः कुसुमोच्चयो वा तारकापदं
मुक्ताकुसुमं वा लक्षयन् वर्त्तुलत्वोज्वलत्वे व्यंजयति ॥ निपतति कण्ठात् केशकलापात्
वा रतोद्धत्येन हारत्रुटनात् केशकलापविस्रंसनाद्वेति भावः ॥ तथा भ्रमरवाहिन्याः वी
चिः त्रिवली वीचिपदं त्रिवलीं लक्षयन् ॥ श्रमस्वेदजलसंभृतत्वं व्यनक्ति तच्चरतप्रकर्षं
भ्रमरवाहिनीपदोपादानेनाधिकायां सरत्वं चिरसंतापोपशांतिप्रवणत्वं त्रिवल्यामु
परिवर्त्तमानत्वं बाव्यंजति ॥ वस्तुतस्तु भ्रमरवाहिन्याः वीचिः हारः उत्पर्थः श्रीदोलति
चांचल्यं प्राप्नोति विपरीतरताद् इति भावः ॥ अत्र जंदादिशब्दानां प्रकृतार्थानुपयुक्त
त्वात् ॥ केशकलापमुखकण्ठहारलताकुसुमोत्कर त्रिवल्याद्यर्थांतरसंक्रमाक्षि
क्षितान्यापरवाच्यध्वनित्वम् ॥ १२२ ॥ विप्रलंभमुदाहरति ॥ प्रादुर्भूत इति ॥ काचि
त्सखी नायकं प्रत्याह ॥ संबुद्धिपदानुपादानं स्नेहभावं द्योतयति ॥ नवजलधरे अ
भिनवमेघे प्रादुर्भूते ॥ एवं च अदृष्टपूर्वत्वं तत्त्वसीताविशयं व्यनक्ति जलधरपदं उद्दीप ११०

पणसंभवात् शृंगारं निरूपयितुं निरूपितविभावादिप्रसंगात् सात्त्विकानाह ॥ स्तंभः स्वेद इति 306
विस्तरभयात्तल्लक्षणं प्रत्येकोदाहरणान्यनभिधाय सर्वान्येकपद्येनोदाहरति ॥ भेदो वाचि
ति ॥ काचित्काचिदित्याह ॥ हे सखि वाचि वचने भेदः स्वरभंगः दृशोर्नेत्रयोः जलं अश्रु कु
चतटे स्वेदः अधरे ओष्ठे प्रकंपः वेपथुः चुंबनलालसत्वादिति भावः ॥ गंडतटी पांडुः पां
डुरा विरहवशादिति भावः ॥ एवं च वैवर्ण्यमभिव्यज्यते ॥ अत्र गंडे पांडुरता इति युक्तं
वपुः शरीरं पुलकितं रोमांचितं मनः चेतः लीनं एवं च बाह्यज्ञानशून्यतामावेदयते ॥ नयन
श्रियो नेत्रलक्ष्म्याः आलस्यं नेत्रमप्यलसितं किं पुनरंगानीति अर्जवः ॥ वस्तुतस्तु आल
स्यस्य व्यभिचारिभावत्वेन सात्त्विकभावोदाहरणे प्रदर्शनमयुक्तमित्यतो नयनलक्ष्मीस्व
गमनकारीत्यर्थे कमप्यविशेषणमेतत् ॥ चरणोस्तंभगतिनिरोधः समुज्जृंभते विलसती
त्यर्थः ॥ तत्किं तर्हि राजपथे राजमार्गे अनया निजाम धरणीपालः निजामाख्यो देवगिरि
णा आलोकितः दृष्टः ॥ यद्यपि निजामाली यावन्न भ्रमति प्राप्नोतीति निजामः स चासौ धरणीपा
306 लः उःसहदानवादिविदारकत्वादिति भावः ॥ एता दशाः श्रीकृष्ण इत्यर्थः ॥ एवं चैवं विधगुण

१११ त्वं युक्तमिति व्यज्यते॥ नयनं सर्वतो भ्रमति अर्थात्तस्याः समंतादेव यतो लघुसाररहितं एवं च
मन्नेतस्तस्यामेव लीनं नयनमपि तामेवालोकयितुमिति तस्ततो भ्रमतीति नमन्यते सुखाव
हमिति व्यज्यते॥१२४॥ चिंतामुदाहरति मयेति॥ रुष्यः सखायं प्रति वक्ति॥ हे सखे मया त
स्मिन् संकेतिते कुंजोपकंठे न स विधेअघमुकुः॥ एवं च एकदा संपादितस्य निःफलत्वं
द्योत्यते॥ कलहंसनादः कादंबनिनादः॥ वसंते तस्या अतिमाधुरत्वादिति भावः॥ कादंबः
कलहंसः स्यादित्यमरः॥ विधेयः कर्त्तव्यः॥ एवं समधौ वसंतस्य विभ्रांति आवहंती कल ति
हंसनादेनेति भावः॥ नेत्रोत्पलतोरणानि नयननलिनमालिकां कुर्वीत विदधीत॥ एवं
च मय्येवं विधचेष्टमाने सा पश्येतवा न वेति चिंता व्यज्यते॥१२५॥ स्मृतिमुदाहरति॥ रा
मइति॥ लक्ष्मण ७१ दीर्घदुःखवकितः॥ लक्ष्मणस्य दीर्घदुःखं ते न च किंकैतः व्याकुलः व्य
पांना विष्करोति न प्रकटयति इदमेवाह॥ ऊष्मतरं श्वासं न मुंचति एवं च दुःखस्यातिव ढुला
दात्यंतिकगोपनानर्हत्वं व्यज्यते चक्षुषि नेत्रे सलिलं अश्रु न धत्ते किंतु वार्तां वर्त्तमान
दहनक्रूरैः॥ वातावर्त्तेत वात्यया विवर्त्तमानो यो दहनः॥ एवं च निर्गमायोग्यत्वं ज्वाल्य १११

मानत्वं ध्वन्यते तदेतत् क्रूरैः घातुकैः अनंगज्वरैः क्षामः कृशः विदेहराजतनयां सीतां भूयो
नवरं स्वनुवर्त्तते तिष्ठति एवं च स्वदुःखस्यातिवर्क्कुत्वाद्दोभावीति गोपयन् सीतास्मृतिजन्यांतःसंता
पव्याकुल एवास्त इति भावः॥१२६॥ गुणकीर्तनं लक्षयति॥ विरहकालीनेति॥ एवं च संयोगका
लीनव्युदासः॥ तमुदाहरति॥ स्पर्शइति कोपि विरही वक्ति हे सखे॥ तस्यानायिकायाः स्तन त
टस्पर्श एव स्पर्शः॥ स्पर्शपदं सुखविशेषजनकतां लक्षयन्नितरस्पर्शाधिकतमत्वं व्यंजयति
तथा तस्याः वक्रवीक्षणमेव वीक्षणं॥ वीक्षणपदं सुखातिशय जनकत्वं लक्षयदि
तरविलोकनाधिकतमत्वं व्यनक्ति॥ तथा तस्याः केलिकथालापसमय एव समयः॥ समय
पदं लोकोत्तरसुखजनकत्वं लक्षयदितरसमयाधिकत्वं व्यंजयति॥ अविवक्षितान्यप
रवाच्यो ध्वनिरयम्॥१२७॥ उद्वेगं लक्षयति॥ कामक्लेशजनित इति॥ मुमुक्षोस्तथाविध
ज्ञानस्योद्वेगस्त्वे निवारणाय कामक्लेशजनितेति॥ तमुदाहरति॥ गरलद्रुमेति॥ विरहिज
नोक्तिरियं॥ इंदुबिंबं चंद्रमण्डलं गरलद्रुमकंदं गरलं विषं॥ क्ष्वेडस्तु गरलं विषमित्यमरः
तस्यपोद्रुमस्तस्य कंद एवं चातिदुःखदत्वं व्यज्यते॥ किंच वसंतः करुणावारिजवारणः करुण

११२ दयासेववारिजंकमलं आर्द्रचित्तभूमिकत्वादितिभावः॥ अथचवारणो गजः वारणपदद्वयोः कमल
नसमर्थतांव्यनक्ति साचान्यद्वयोः कमलकत्वेन स्वस्यतदन्यंताभाववत्वंद्योतयति॥ तथारजनी
रात्रिः स्मरभूपतेः मदनमहीपतेः कृपाणी विरहिजननिकृंतनकारित्वादितिभावः॥ एवंस
तिहेधातः ब्रह्मन् एवंचसर्वकर्तृत्वादुपालंभयोग्यत्वंध्वन्यते अतःपरं एतदुपरि किंकरणीयं
एवंचमरणमेवममेदानीमुपस्थितमितिव्यज्यते॥ एवंचतवैतारसवस्तु विरचनमनुचि
ततरमितिद्योत्यते॥ अत्र कन्दर्पइवकंदर्पवारणइववारणः कृपाणीवकृपाणीति लुप्तो
त्प्रेक्षारूपकंवालंकारः॥ एवंचसर्वसंमतानींदुर्विवादीन्युपमेयान्युक्त्वा गरलद्रुमकं
दादेरुपमानस्य स्वमतेनकल्पितत्वात् तन्मतनामालंकारः॥ तदुक्तं॥ तन्मतमितियत्रोक्तौ वक्त्र
न्यमतेनसिद्धमुपमेयं॥ स्यात् स्वोपमातथाविशिष्टे सिद्धमिति सचस्फुटा आत्मन
नुपमेयत्वसिद्धये गरलस्यद्रुमायेोपादानादुपदानेनाभिदर्शनेनानुप्राणित उद्भेदः
स्फुटएव॥१२७॥ प्रलापंलक्षयति॥ प्रियामिति॥ प्रियाविषयकइत्यर्थः॥ कल्पनानि
युक्तः काल्पनिकः॥ अंतःकरणविक्षेपो मनोव्यापारः॥ तमुदाहरति॥ अद्धिसमिति ११२

कत्वंव्यंजयति॥ प्रकटीभूतपदं चिरकालावस्थायित्वं तत्रकृततरदुःखप्रदत्वंध्वनयतित्वत्प
दंदृष्टिका मात्वद्गमनमार्गदर्शनेच्छावंतः पंकेरुहदलदृशः सरोजपत्रनेत्रायाः पंकेरुहपदं
नेत्रमालिन्यमभिव्यनक्ति॥ प्राणाः कण्ठदेशंप्रयांति एवंचप्राणोत्क्रमणकालएवायमिति
व्यज्यते॥ तथान्यत् किंवा तवविधुंत्वद्वदनचन्द्रं द्रष्टुं अतएवउड्डीयगंतुं वक्षःवक्षःस्थलंवि
सिनीपल्लवस्यतापापनोदनार्थमानीतस्येतिभावः॥ पल्लवपद मत्यंतकोमलत्वशी
तलत्वेव्यंजयति छलेनव्याजेनपर्षं सृजति॥ अत्र विरहदुःखपापनोदकतया बिसिनी
पल्लवानांवक्षःसंगेयक्षस्यजनसंभावनयासएवालंकारः छलापह्नुतिश्चेत्यलंकारसं
सृष्टिः॥१२८॥ विप्रलंभकार्य्यदशावस्थानिरूपयितुंतद्विभागमाह॥ विप्रलंभेचेति त
त्रप्रथमोद्दिष्टत्वाद भिलाषंलक्षयति॥ तत्रेति॥ तमुदाहरति॥ तस्यामिति॥ कोपिपूर्वानुरा
गीवक्ति॥ तस्यांसुतनुसरसीसरत्वादितिभावः॥ स्वेदपूर्णत्वादितिभावइत्यपिकेचित्॥ चे
तोमानसंनयनंनेत्रं अर्पास्वीयं निपतितंनतुक्षिप्तं एवंचस्वापराधाभावंव्यंजयतिहेस
खेचेतःनिमग्नंयतःगुरुससारंसर्वेन्द्रियश्लेष्टत्वादितिभावः॥ एवंगणाभिन्नत्वेन निमग्न

११३ चंद्रे इति संबोधनेनोचतां व्यंजयति॥ सा च प्रियाननसमता गवेनिवेधनेष्ट्यादप्यसिंगे वेभावे
वत्स सिद्धं हंसेदरतइति यद्वा मृगपमेयं कामिनीवदनमिति इदं किं कुत्सितेयतः मृगदृशः नायि
कायाः मखे अद्वितीयं सर्वोत्कृष्टता श्रितानिप्रहारवं दाद्रिकमतवारणरूपमिति इदं किं कुत्सितेय
तः मृगदृशो दृगंबुजेनेत्रकमलेमन्यते वउन्मादके एवं च कामिनीनयनमेवोन्मादकं नत्वमिति
व्यज्यते पद्महृदगंबुजे अन्यदेव कपत्तादि भंग्या अन्यादृशमेव असाधारणगुणमित्यर्थः॥ एवं च नत
विधत्वद्वारणरूपमरविंदमिति ध्वन्यते॥ किंच दृग्वृंगमभ्रमरझंकारंशाद्विशेषणं वोद्रेका
दिति भावः॥ एवं चत्वत्कमपदित्वं तेन चोन्मत्तं तेनापि चानर्थकव[illegible]र्त्वं च द्योत्यते॥ इ
दं किं॥ यतः तादृक्तनुः न तथाविधसौंदर्योत्कर्षशालि शरीरे नास्तीत्यर्थः॥ एतादृश
संभाषणमपि न समीचीनमित्याह॥ कर्मीणि एतादृशा वचनानि धिक् निंद्यानी
त्यर्थः॥ यतः ईदृशं लोकोत्तरचमत्कारकारि रूपातिशयशालि ईक्षणीयं कामिनीरू
पं वस्तु पुनः क्व एवं चैतादृशा रथालापेन देवशासंपन्नकामिनीदर्शनांतरायक
रणमनुचितमिति व्यज्यते॥ यद्वा हे भंगझंकारं आवहसि यतस्तनुः कृशांगी न एवं ११३

च तस्यां विद्यमानायाम प्यन्नपयात्वया न किं चिदपि श्वसितुं शक्यमिति ध्वन्यते॥ किंच ताद
क्कर्माणि तथाविधव्यापारान् धिक्॥ येनेदृशमभिनवरूपं शालि ईक्षणीयं कामिनी प्रास्य
नुकूला एवव्यापाराः समीचीना नान्ये इति द्योत्यते एवं च निराकांक्षत्वमन्नवस्तुतस्त्वत्रेनि
कां रांक्षौभिधानं तु न्मादपरिपोषकत्वादनुगुणमेवेत्युपरम्यते तथा विधान्ययोजनायामि
ति दिक्॥ १३० ॥ व्याधिं लक्षयति॥ मदनवेदनेति॥ रोगादिजन्यकाश्यादिनिरासाय मद
नवेदनोसमुत्थितेति॥ तमुदाहरति॥ कोदंडमिति॥ कापि दूती नायकं प्रत्याह॥ हे सखे त
स्याः नायिकायाः॥ भ्रूवल्लीनयनांचलं मन[illegible]कामस्य कोदंडं धनुः विशिखो बाणः वस
तिः वुसतिस्थानं यथा अस्ति तथा तस्याः॥ भ्रूवल्लीनयनांतैचलं मनसि वासमुन्मीलति
वर्त्तते॥ यद्वा कामस्य कोदंडं विशिखः॥ मनोनिवसतिः वर्त्तते॥ एवं च कोदंडादीनां विशि
ष्टस्वरूपाद्यनभिधानेन साधारण्यमावेद्यते॥ तथा तस्याः भ्रूवल्लीनयनांचलं मन
सि वासः तत्रापि समुन्मीलति॥ एवं च मदनकोदंडादिरूपः कामिनीभ्रूवल्यादीनामाधि
क्यं व्यज्यते॥ इत्थममुना प्रकारेण साम्यविधानान्नयात् मदनस्य तत्त्वे[illegible]प्रभवति॥

११४ सति ॥ यद्वा प्रभवति मदनकोदंडाद्यधिककामिनीभ्रूवल्यादिसत्वेन प्रकर्षशालिनि त्वयि सा
म्यविधौ साम्यस्य विधिः कर्त्तव्यता तस्यां सत्यां एवं च वस्तुगत्या त्वय्याधिक्ये प्यस्माभिः सा
म्ये क्रियमाणे सतीत्यर्थः ॥ एवं च साम्ये सतीति वक्तव्ये विधिपदमधिकमिति न शंक्यम्
हे स्वामिन् एवं च प्रार्थनौचित्यमावेद्यते ॥ एवं च स त्वं तु अधुना तरमर्थवत् तस्यां तथाविधिसितां यथा एषा तनु
तां कार्श्यं तन्वाना विस्तारयंती क्रमात् अवस्थांतरात् ॥ अतनु तां तनुराहित्यं अनंगतामि
ति यावत् ॥ नागच्छति प्राप्नोति ॥ एवं च मदनस्य तव च नायिकाभ्रूतुल्यत्वेनाधिका तद्रूपतां
प्राप्नोतीत्युक्तं अतस्तदभावस्त्वया विधेय इति व्यज्यते ॥ यद्वा मदनादप्यधिकबलवत्तया
त्वया मदंतबाधावशाद् शक्त्याऽतद्रूपता मा प्राप्नुकामा नायिका तद्बाधापरिहारपुरःसरतया नुग्रा
ह्येति व्यज्यते ॥ तयोरितिपाठे हे स्वामिन् कामस्य कोदंडं विशिखो मनोवसतिः तस्या अपि ना
यिकाया अपि भ्रूवल्लीनयनांचलं तेमानसिवासः त्वन्मनो वसतिरित्यर्थः समुन्मीलति
वर्त्तते ॥ प्रकृतमाह ॥ इत्थं अमुना प्रकारेण तयोः कामकामिन्योः साम्यविधौ प्रभवति
सति तथाविधिसितां एवं च विरहिवाधाप्रदमदनसाम्यमात्राल्लैतस्यां कोपकरणमुचितमि ११४

कापि सहचरीं प्रत्याह ॥ हे सहचरि मे चक्षुः अद्धि संवीक्षणं नद्वयोः ॥ संवीक्षणं यस्य तथा त
दिति रिक्तो न बलोकीत्यर्थः ॥ तथा मे मनः ॥ अद्धि संमीलनं नद्वयोः संमीलनं यस्य तथा तदिति
रिक्ता प्राप्तीत्यर्थः ॥ तथा मे पाणिः ॥ अद्धि संस्पर्शनं नद्वयोः संस्पर्शो यस्य तथा तदन्या संस्प
र्शीत्यर्थः ॥ अद्य किं करिष्यति एवं च नयनादिकरणव्यापाराणां मदन्याविषयकत्वेन तद्वि
रहे केनोपायेन निर्वाहो भवतीति व्यज्यते ॥ १२८ ॥ उन्मादं लक्षयति ॥ औत्सुक्येति ॥ औत्सुक्यं
कालासहिष्णुता मनोविपर्यासो मनोव्याकुलता ॥ तं विभजते ॥ कापिकइति ॥ तत्रप्रथ
मोद्दिष्टत्वा कापिकमुदाहरति ॥ फलमिति ॥ काचित्कां चित्प्रत्याह ॥ कामवलोक्य प्रेक्ष्य ए
वं च मुखभ्रांतियोग्यत्वं मावेद्यते ॥ मृगाक्ष्याः मुखं वदनमिति हेतोः परितासं उपहासं
कर्त्तुं अभ्युद्यतो भव तु उद्युक्तो भवतु ॥ अथानंतरं शिथिलितवाचः तस्याः प्रियायाः
माने अभिमाने आशंक्य पुलकजातो रोमांचवत् तो सात्विकभावो दयादिति भावः ॥ पा
णिपंकेरुहेण करकमलेन स्पृशति अनुनयार्थमिति भावः ॥ अत्रोपमयानुप्राणि
तः संशयालंकारः ॥ १३९ ॥ वाचिकमुदाहरति ॥ किं रे इति ॥ कोपि विरही चक्रि ॥ रे विधे

११५ इति एवं च मल्लवल्लीनयनांचलयोर्मदनसंबंधित्वेध्यनौन्नत्याहत्वेपि तन्मनसः स्वनिवासस्थान
तयोपेक्षाकरणमनुचितमिति ध्वन्यते एवं चमल्ले विलासनयनांचलावभासजनकसंलापसु
हासायमप्येवेहमविरारेव वागमिथ्यामीतिमनः संरक्षणकरणमावश्यकमिति द्योत्यते
॥१३१॥ ज उ तामुदाहरति ॥ पाणिरिति ॥ कापि सखी नायकं प्रत्याह ॥ पाणिः हस्तः नीरखकं
कणः निःसंजितकटकः व्यापाराद्भितिभावः ॥ स्तनतटी कुचतटी निःकंपमानां भुक्ता एवं च
प्राणानां कण्ठे एवं स्थितिमावेद्यते ॥ दृष्टिः निश्चलतारका निश्चेष्टकनीनिका कटाक्षवि
क्षेपाभावादितिभावः कुण्डलं कर्णभूषणं निस्तांउवं पदं स्थिरत्वं लक्षयत् कामिमनोवि
नोदजनकविलासाभावं व्यंजयति ॥ हे कांत यदि त्वन्नामस्मरणेन सख्यादिकृतत्वन्नामो
च्चारणेन कोपि सूक्ष्मतया निर्वचनीयः पुलकारंभः रोमांचोद्गमः नो समुल्लंभते प्रकाशते
तर्हि कृशतनोः तन्वंग्या चित्रार्पितया चित्रप्रतिमया सह अमे सह को भेदः भवेत् न कोपीत्यर्थः
एवं च सर्वांगीणजाड्यदर्शनादकस्मादस्माकं तन्निधनधीरेवाभवत् पॅरंदेवादिसखा
दिरहितत्वन्नामजनितपुलकदर्शनजीवनबुद्धिरभवदितिद्योत्यते ॥१३२॥ दर्शनस्या ११५

वस्थामूलकत्वात्तद्विभजते ॥ स्वप्नेत्यादि ॥ तत्र प्रथमोद्दिष्टत्वाच्चित्रदर्शनमुदाहरति ॥ मु
क्ताहारमिति ॥ काचिन्नायिका सखीं प्रत्याह ॥ हे तन्वि कुचगिरेः स्तनपर्वतस्य गिरिपरंस
संचारयोग्यतां व्यनक्ति ॥ मुक्ताहारं मुक्तापदं प्युद्धत्वं व्यंजयति हारपदं चौर्ययोग्यतां
ध्वनयति ॥ न च हृतवान् ॥ चोरितवान् इदमग्रेप्यन्वेति तथा हस्तात् कंकणं रत्नखचित
मिति भावः ॥ तथा कर्णात्स्वर्णाभरणमपि सुवर्णकलिंकरणमपि अद्य स्वप्ने निद्रायां वकु
लमुकुलं च मुलकुसुमं भूषणं संदधानः एवं च निकुंजवसतिलालसत्वमावेद्यते हृदयं
मच्चित्तं अहरत् ॥ अयं कस्मादेव तिन प्रतीमः न जानीमः ॥ एवं च वासदृश्यहारादिभिर
स्यापहारकाः स्तस्कराः सेति विदिताः परं त्वेतस्य हृदयापहारिणः कोपि विदितइ
ति द्योत्यते ॥१३३॥ चित्रदर्शनमुदाहरति ॥ नीवीमिति ॥ काचित्कांचित्प्रत्याह ॥ बालासु
ग्धा एवं च मोत्ति योग्यत्वं व्यज्यते ॥ पटे विलिखितं चित्रितं दयितं एवं च दर्शनयोग्यत्वं ध
न्यते विलोक्य पुरे वपूर्ववत् किमयं नीवीं धरेत् मोचयेत् तथा उरसि जे कुचे नखेन वि
लिखेत् नखक्षतानि दद्यादित्यर्थः ॥ तथा रंत खुरं अधरं दशनेन दंतेन अकस्मात् अत

११६ किं तं दृशोतु इत्थं विहारशंकां केलिमयवितर्केण जहार तत्प्राण ॥१३४॥ सा सा दर्शनमुदाहरति
चेतइति ॥ नायिका स्वकीटी निग्राह हे चेतः चंचलतां व्याकुलतां विषयोत्तरेखामितिभा
वः त्यज ॥ तथाह प्रियसखि एवं च मदुक्तमवश्यं विधेयमिति व्यज्यते श्रीडेलज्जे मां प्रियदर्श
नोपुक्तमिति भावः ॥ नपीउयमनीपित नेगादिति भावः ॥ तथा भातः वंधो दर्शनसुख
दातृत्वादिति भावः ॥ निमेषपक्ष्मपातदृशोन संचलतावाने वांतरायइति भावः ॥ तथाकाक्ष्ण
क्षम्यतां मनसो वधारणार्थमिति भावः किमर्थमित्यत आह मरुंदु निमस्तके वर्हमयूर
पिच्छं कर्णयोः कुवलयं करवंशीं दधानः सायं प्रसिद्धविभवः सुंदरः एवं च स्पृहणीयदर्श
नत्वं ध्वन्यते दामोदरः कृष्णः । एवं च व्यसनशालित्वं तव चक्षुर्लभदर्शनत्वं द्योत्यते तेन य
नगोचरः नयनविषयी भवतः ॥१३५॥ इति श्री अवंकपण्डितात्मजानंतपण्डितविरचिता
यां रसमंजरीव्यंग्यार्थकौमुद्यां अवस्थानिरूपणं समाप्तिमगमत् ॥ ग्रंथसमाप्तिं सू
चयन् कवीन् स्वकृतग्रंथश्रवणांगीकारं प्रार्थयति ॥ माध्वीकेत्यादि ॥ उभाभ्यां माध्वी
कस्यंदसंदोह सुंदरीमाध्वीकस्यमधुनः स्यंदः प्रस्रावः तस्य संदोहः सारसंग्रहः तेन सु ११६

तिव्यज्यते ॥ यथा क्रमात् तनुतां कार्श्यं श्रयंतन्वाना एवं चातनुत्वमवश्यं भावीति व्यज्यते एषा अ
तनुतां शरीरराहित्यं नगच्छति ॥ एवं च स्वसाम्यमसहमानः कामः काम पिवेदनां प्रयच्छन्न प्रा
णापहरणोद्यममातनोति ॥ तावत्स्वदनुजीविन्या नायिकायास्तन्निवारणपुरःसरं तत्प्रा
संरक्षणकारित्वमुचितमिति द्योत्यते ॥ अन्योपि स्वामी स्वस्मिन् जीवति समीचीनजनसमा
नं निजसेवकमन्यबाधानिवृत्तिपुरःसरं संरक्षतीति लोके क्रमः ॥ यद्वा इत्थं साम्येप्यनंग
त्वनिरासेन किं चिद्वैधर्म्यमवश्यं स्थापनीयमिति व्यज्यते ॥ एवं चैतदकरणे एक एव मद
नः क्रियतीन व्यथां विरहिजनस्य विधत्ते तत्राप्येतस्यास्तद्रूपत्वे एतत्साहाय्यसंभृतमदः
किं किं न करिष्यतीति ध्वन्यते एवं च तत्वाप्यनिष्टमग्रे भावीति द्योत्यते ॥ यद्वा हे स्वामिन् एवं
च स्वते चलत्वे ध्वन्यते तत्तदुपदेष्टा न हत्वं तदपि प्रार्थनोचितस्त्वं व्यनक्ति तस्याः भवद्दीन
यनां चलं मनः कामस्य कोदंडं विशिखः निवसति ः ते तव तस्याः मनसिवासो पि अपि
रवधारणार्थकः वासरएव समुन्मीलतिइत्थं तयो र्वैसत्येः साम्य विधौ एषा यथा अ
तनुतां तनुराहित्यं मरणमिति यावत् ॥ एवं च शरीरनिवृत्त्या मनोरनिवृत्तिरपि व्यज्यते नग

११७ तदीयकुतुकान्नयायदिह किंचिदावेदितं तदेतदखिलं पदेनरहरे [redacted]र्पितम् ॥२॥ अ
ब्देलोचनरंध्रषड्विधु १६९२ लसत्प्रस्तारसंलक्षिते मासे माधवसंज्ञके हरिदिने १२
पक्षेऽवलक्षेभृगो ॥ पुंस्तम्भनिवासिनाबुधमुदेऽनन्ताभिधेनादरात् ॥ काश्यामीश
कृपावशात्किरचिताव्यङ्ग्यार्थसत्कौमुदी ॥३॥ यद्यपिहृदयहारिव्यङ्ग्यमन्यत्रका
व्ये प्रतिपदमपि भानोर्वाग्विलासेरसाले ॥ तदपिनचमयेदं ततग्रंथवाकुल्यभी
त्या प्रकटितमिहधीभिर्भावनीयं बुधैस्तत् ॥४॥ इतिश्रीगोतमीयतीरपुण्यस्तं
भस्थितिमितिविलासशालिनीलकण्ठपण्डिततनूजबालोपंडितजश्रीवीरसिं
हदेवतनूजपौढप्रतापद्युमणिमरीचिनिरस्तसकलजनदुःखौघध्वांतश्रीचन्द्र ता
भानुकुतूहलकुमुदवनविकासिनीरसमंजरीव्यङ्ग्यार्थकौमुदी संपूर्णतामग
मत् ॥ ॥ ॥ वर्षेविक्रमराज्यतोवसुशरेभेन्दुमिते १८५८ फाल्गुने शुक्ले शुक्र
दिनेतिथौनव ९ मिते भाग्याख्यकेपत्तने ॥ आरामेश्वरमुद्गलेसुयवनाधीशेनि
जामेप्रभोर्मन्त्रिंशासतितत्समर्पितधुरःकायस्थवंशप्रभोः ॥१॥ मिट्ठूलालसु ११७

११८ नामकस्यभवनेतेनैवसंमानितात्तत्तद्वृत्तद्रविलोस्सुपूरितगृहस्समृशेरगिर्य्यादृतः ॥ भार
द्वाजमुनेःकुलाब्धिजविधोःश्रीइलमस्यात्मजः श्रीमत्सुंदरिगर्भरत्नमवनीपालेकसंसे
वितः ॥२॥ सीतारामइतिप्रथामधिगतः शुक्लान्वयालंकृतिः श्रीमच्छंभुपदाब्जपूज
नपटुस्तद्धृक्तिपूतात्मकः ॥ भानुत्कारसमञ्जरीतिलकिकांवानंतसन्नोदितांसद्व्यं
ग्यार्थककौमुदीमलिखदानन्देनविद्वन्मुदे ॥३॥ सम्पूर्णतामगादियम् ॥ श्रीर्जय
तु ॥

इति रसमञ्जरी

82/9(A) 82/9(A) 82/9(A) 82/9 82/9(A)

॥ व्यङ्ग्यार्थकौमुदी ॥ छ ॥ व्यङ्ग्या सहिता

दरीमनोहरा अथवा माधवीकस्यन्दसंदोहाच्चासौ सुंदरी चेति विग्रहः ॥ रसमंजरीग्रंथनामम
मरूपया कवयः कर्णभूषणं कुर्वंतु भूषत्वेनेत्यर्थः ॥ अन्या मंजरी माधवीकस्यंदसुंदरीक
र्णावतंसी क्रियतामिति लौकिकम् ॥१३६॥ तात इति यस्य कविकुलालंकारस्य चूडामणेः क
विवर्गालंकरणशिखारत्नं गणेश्वराख्यस्तातः जनकः तथा यस्य सुरसरित्कल्लोलकि
र्मीरिता सुरसरितो भागीरथ्याः कल्लोलाः तरंगाः तैः किर्मीरिता चित्रिता चित्रे किर्मीर
कमल्माष इत्यमरः ॥ विदर्भभूः विदर्भपृथ्वीदेशः वसतिः स्थानं तेन श्रीभानुनाम्ना कविना
स्वकृतेन आत्मनिर्मितेन पद्येन श्लोकेन एकत्वमविवक्षितम् ॥ योजिता संघिता वा
ग्देवी श्रुतिपारिजातकुसुमस्पर्द्धाकरी वाग्देव्याः श्रोत्रे यत्पारिजातकुसुमं तत्सदृशा
मंजरी च मंजरी जयतु आकल्पं तिष्ठतु ॥१३७॥ श्रीः ॥ ॥ छ ॥ स्वस्ति श्रीस्तादतुलं समस्त
वसुधाधीशस्य सर्वोत्कटस्फाररोर्वीवलये केवलपणगुणग्रामस्य कल्याणवृद्धिः ॥ श्रीमद्व
द्रूमणौ बुधव्रजमनश्चिंतामणौ रणवप्रोद्यत्कलशिरोमणेः श्रुतिलसद्धर्मैकरक्षामणेः
णेः ९ ॥ यदीयगुणवर्णने दशशतीमुखानां परं सखेदमिव भोगिनः किमपि वेकामवत्